ॐ

श्रीभगवद्रामानुजसिद्धान्तनिर्धारणसार्वभौम श्रीकवितार्किकसिंह सर्वतन्त्रस्वतन्त्र श्रीमन्निगमान्तमहादेशिकैरनुगृहीता:

श्रीमदधिकारसंग्रहश्लोका:कारिकाश्च

निखिलकवितार्किकचूडामणिना श्रीमद्वरदनाथापरनाम्ना 'कुमारवरदाचार्येण' विरचित:

श्रीमद्रहस्यत्रयसारार्थः

श्रीमन्महीशूरराजधान्यां विद्योतमान श्रीब्रह्मतन्त्रस्वतन्त्र परकालस्थान्यां (३०) तमे पदे मूर्धाभिषिक्तै: श्रीमद्रङ्गनाथब्रह्मतन्त्र परकालमहादेशिकै: पूर्वाश्रमे विरचित: कारिकारूप:

रहस्यत्रयसारार्थसंग्रहश्च

इत्येतत्त्रयं

श्रीपरकालास्थान्यां (३३) तमे पदे मूर्धाभिषिक्तै: श्रीलक्ष्मी हयग्रीवदिव्यपादुकासेवक 'श्रीमदभिनवरङ्गनाथब्रह्मतन्त्र परकालमहादेशिकै:' (शा.१७३९) तमे प्रतिष्ठापिताया: श्रीमद्वेदान्तदेशिकविहारसभाया:कार्यदर्शिना श्रीब्रह्मतन्त्रस्वतन्त्र परकालास्थानश्रीकार्यकर्त्रा कस्तूरि श्रीनिवासरङ्गाचार्येण मुद्रयित्वा प्रकाशितम्

जयसंवत्सर मार्गशीर्षमासि— १९५४

ॐ

श्रीभगवद्रामानुजसिद्धान्तनिर्धारणसार्वभौम श्रीकवितार्किकसिंह
सर्वतन्त्रस्वतन्त्र श्रीमन्निगमान्तमहादेशिकैरनुगृहीताः

श्रीमदधिकारसंग्रहश्लोकाःकारिकाश्च

निखिलकवितार्किकचूडामणिना श्रीमद्वरदनाथापरनाम्ना
'कुमारवरदाचार्येण' विरचितः

श्रीमद्रहस्यत्रयसारार्थः

श्रीमन्महीशूरराजधान्यां विद्योतमान श्रीब्रह्मतन्त्रस्वतन्त्र परकालस्थान्यां (३०) तमे पदे मूर्धाभिषिक्तैः श्रीमद्रङ्गनाथब्रह्मतन्त्र
परकालमहादेशिकैः पूर्वाश्रमे विरचितः कारिकारूपः

रहस्यत्रयसारार्थसंग्रहश्च

इत्येतत्त्रयं

श्रीपरकालास्थान्यां (३३) तमे पदे मूर्धाभिषिक्तैः श्रीलक्ष्मी-
हयग्रीवदिव्यपादुकासेवक 'श्रीमदभिनवरङ्गनाथब्रह्मतन्त्र
परकालमहादेशिकैः' (शा. १७३९) तमे प्रतिष्ठापितायाः

श्रीमद्वेदान्तदेशिकविहारसभायाःकार्यदर्शिना
श्रीब्रह्मतन्त्रस्वतन्त्र परकालास्थानश्रीकार्यकर्त्रा
कस्तूरि श्रीनिवासरङ्गाचार्येण
मुद्रयित्वा प्रकाशितम्

जयसंवत्सर मार्गशीर्षमासि— १९५४

[illegible]

श्रीः

श्रीलक्ष्मीहयवदनपरब्रह्मणेनमः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकविरचिताः

श्री म द धि का र सं ग्र ह श्लो काः

गुरुपरम्परासारः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥

एते मह्यमपोढमन्मथशरोन्माथाय नाथादयः
त्रय्यन्तप्रतिनन्दनीयविविधोदन्तास्स्वदन्तामिह ।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः
स्पर्धाविप्लव विप्रलम्भपदवी वैदेशिका देशिकाः ॥
हृद्या हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष
क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम् ।
दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूत
तत्तत्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका ॥

उपोद्घाताधिकारः

आभगवत्तःप्रथितामनघामाचार्यसन्ततिं वन्दे ।
मनसि मम यत्प्रसादाद्वसति रहस्यत्रयस्य सारोऽयम् ॥

कर्मब्रह्मात्मके शास्त्रे कौतुस्कुतनिवर्तकान् ।
वन्दे हस्तिगिरीशस्य वीथीशोधककिङ्करान् ॥

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किंकरत्वाधिराज्यम् ।
विधिपरिणतिभेदाद्वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ॥

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवतिहि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपा गृह्यमाणःकदाचित्
मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥

सारनिष्कर्षाधिकारः

श्रुतिपथविपरीतं क्ष्वेळकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः ।
तदिहविबुधगुप्तं मृत्युभीता विचिन्वन्ति
उपनिषदमृताब्धावुत्तमं सारमार्याः ॥

शाखानामुपरिस्थितेन मनुना मूलेन लब्धात्मकः
सत्ताहेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन् ।
वेदोत्तंसविहारसारथिदयागुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथस्सयूथस्सनः ॥

प्रधानप्रतितन्त्राधिकारः

आधेयत्वप्रभृतिनियमैरादिकर्तुश्शरीरं
सत्तास्थेमप्रयतनफलेष्वेतदायत्तमेतत् ।
विश्वं पश्यन्निति भगवतिव्यापकादर्शदृष्टे
गम्भीराणामकृतकगिरां गाहते चित्तवृत्तिम् ॥

यद्येतं यतिसार्वभौमकथितं विद्यादविद्यातमः-
प्रत्यूपं प्रतितन्त्रमन्तिमयुगे कश्चिद्विपश्चित्तमः ।

तत्रैकत्र झडित्युपैति विलयं तत्तन्मतस्थापना
हेवाकप्रथमानहैतुककथा कल्लोलकोलाहलः ॥

अर्थपञ्चकाधिकारः

आदौ प्राप्यं परमनघं प्राप्तृरूपं चमादौ
इष्टोपायन्त्वयनमसोरीरिफितार्थं चतुर्थ्याम् ।
तद्व्याघातं मकारान्तगिरि व्यञ्जयन्तं मनुं तं
तत्प्रायं च द्वयमपि विदन् सम्मतस्सर्ववेदी ॥
प्राप्यं ब्रह्म समस्तशेषिपरमं प्राप्ताहमस्योचितः
प्राप्तिर्दायधनक्रमादिह मम प्राप्तास्वतस्सूरिवत् ।
हन्तैनामतिवृत्तवानहमहम्मत्याविमत्याश्रयः
सेतुस्सम्प्रतिशेषदम्पति(शेषसंसदि) मरन्यासस्तु मे शिष्यते ॥

तत्त्वत्रयाधिकारः

प्रकृत्यात्मभ्रान्तिर्गलति चिदचिल्लक्षणधिया
तथा जीवेशैक्यप्रभृतिकलहस्तद्विभजनात् ।
अतो भोक्ता भोग्यं तदुभयनियन्तेति निगमैः
विभक्तं नस्तत्वत्रयमुपदिशन्त्यक्षतधियः ॥
आवापोद्वापतःस्युःकतिकतिकविधीचित्रवत्तत्तदर्थे
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहना युक्तिकान्ताःकृतान्ताः ।
तत्त्वालोकस्तु लोभं प्रभवति सहसा निस्समस्तान् समस्तान्
पुंस्त्वे तत्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुता(दि)धीः ॥

परदेवतापारमार्थ्याधिकारः

आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणाम्
अन्यत्रैश्वर्यमित्याद्यनिपुणफणितीरादियन्ते न सन्तः ।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नःपतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः ॥
जनपदभुवनादिस्थानजैत्रासनस्थेष्वनुगतानिजवार्तं नश्वरेष्वीश्वरेषु ।
परिचितनिगमान्तःपश्यतिश्रीसहायं जगतिगतिमविद्यादन्तुरे जन्तुरेकः ॥

मुमुक्षुत्वाधिकारः

कालावर्तान् प्रकृतिविकृतीः कामभोगेषु दोषान्
ज्वालागर्तप्रतिमदुरितोदर्कदुःखानुभूतिम् ।
याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्
काराकल्पं वपुरपि विदन् कस्तितिक्षेत बन्धम् ॥

विषमधुबहिष्कुर्वन् धीरो बहिर्विषयात्मकं
परिमितसुखस्वात्मप्राप्तिप्रयासपराङ्मुखः ।
निरवधिमहानन्दब्रह्मानुभूतिकुतूहली
जगति भविता दैवात्कश्चिज्जिहासित संसृतिः ॥

अधिकारिविभागाधिकारः

मुमुक्षुत्वे तुल्ये सति च मधुविद्यादिषु यथा
व्यवस्थासंसिद्ध्यत्यधिकृतिविशेषेण विदुषाम् ।
विकल्पेतन्यासे स्थितिरितरविद्यासु च तथा
नियत्या वैयात्यं नियमयितुमेवं प्रभवति ॥

प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदं
प्रपन्नश्च द्वेधा सुचरितपरीपाकभिदया ।
विलम्बेन प्राप्तिर्भजनसुखमेकस्य विपुलं
परस्याशु प्राप्तिःपरिमितरसा जीवितदशा ॥

उपायविभागाधिकारः

उपायस्स्वप्राप्तेरुपनिषदधीतस्स भगवान्
प्रसत्त्यै तस्योक्तेप्रपदननिदिध्यासनगती ।
तदारोहः पुंसस्सुकृतपरिपाकेन महता
निदानं तत्रापि स्वयमखिलनिर्माण निपुणः ॥

कर्मज्ञानमुपासनं च शरणव्रज्येतिचावस्थितान्
सन्मार्गानपवर्गसाधनविधौ सद्द्वारकाऽद्वारकान् ।
एकव्याकृतियोगसम्भृतपृथग्भावानुभावानिमान्
सम्यक्प्रेक्ष्य शरण्यसारथिगिरामन्ते रमन्ते बुधाः ॥

प्रपत्तियोग्याधिकारः

अर्थित्वेन समर्थता त्रिकतनुस्साम्पिण्डिताधिक्रिया
साचाष्टाङ्गषडङ्ग्योगनियतावस्था व्यवस्थापिता ।
श्रौती सर्वशरण्यता भगवतस्स्मृत्याऽपि सत्यापिता
सत्यादिष्विव नैगमेष्वधिकृतिस्सर्वास्पदे सत्पथे ॥

भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतःपर्युदासः
कालक्षेपाक्षमत्वं त्विति नियतिवशादापतद्भिश्चतुर्भिः ।
एकद्वित्र्यादियोगव्यतिभिदुरनिजाधिक्रियास्संश्रयन्ते
सन्तश्श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्काः ॥

परिकरविभागाधिकारः

इयानित्थंभूतस्सकृदयमवश्यं भवनवान्
दया दिव्याम्भोधौ जगदखिलमन्तर्यमयति ।
भवध्वंसोद्युक्ते भगवतिभरन्यसवपुषः
प्रपत्तेरादिष्टःपरिकरविशेषश्श्रुतिमुखैः ॥

प्रख्यातः पञ्चषाङ्गस्सकृदिति भगवच्छासनैरेषयोगः
तत्र द्वाभ्यामपायाद्विरतिरनितरोपायतैकेन बोध्या ।
एकेन स्वान्तदार्ढ्यं निजभरविषयेऽन्येन तत्साध्यतेच्छा
तत्त्वज्ञानप्रयुक्तात्विहसपरिकरेतादधीन्यादिबुद्धिः ॥

साङ्गप्रपदनाधिकारः

अभीष्टे दुस्साधे स्वतइतरतोवाक्वचनतत्
भरन्यासं याचनान्वितमभिवदन्ति प्रपदनम्
इतःपश्चादस्मद्यतननिरपेक्षेण भवता
समर्थ्योऽसावर्थस्त्वितिमतिविशेषं तमविदुः ॥

युग्यस्यन्दनसारथिक्रमवतित्रय्यन्तसंदर्शिते
तत्वानां त्रितये यथार्हविविधव्यापारसंतानिनि ।
हेतुत्वं त्रिषु कर्तृभाव उभयोस्स्वाधीनतैकत्र तत्
स्वामिस्वीकृतयद्भरोऽयमलसस्तत्र स्वयं निर्भरः ॥

कृतकृत्याधिकारः

समर्थे सर्वज्ञे सहज सुहृदि स्वीकृतभरे
यदर्थं कर्तव्यं न पुनरिह यत्किंचिदपि नः ।
नियच्छन्तस्तास्मिन्निरुपधिमहानन्दजलधौ
कृतार्थीकुर्मस्स्वं कृपणमपि कैङ्कर्यधनिनः ॥
भगवतिहरौ पारं गन्तुं भरन्यसनं कृतं
परिमित सुखप्राप्त्यै कृत्यं प्रहीणमकृत्यवत् ।
भवति च वपुर्वृत्तिः पूर्वं कृतैर्नियतक्रमा
परमिह विभोराज्ञासेतुर्बुधैरनुपाल्यते ॥

स्वनिष्ठाऽभिज्ञानाधिकारः

स्वरूपोपायार्थेष्ववितथनिविष्टस्थिरमतेः
स्वनिष्ठाऽभिज्ञानं सुभगमपर्गादुपनतात् ।
प्रथिम्ना यस्यादौ प्रभवति विनीतस्स्थगयितुं
गभीरान् दुष्पूरान्गगनसहतश्छिद्रनिवहान् ॥
स्वापोद्बोधव्यतिकरनिभे भोग मोक्षान्तराळे
कालं कंचिज्जगति विधिना केनचित्स्थाप्यमानाः
तत्त्वोपायप्रभृतिविषये स्वामिदत्तां स्वनिष्ठां
शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयन्ति ॥

उत्तरकृत्याधिकारः

सन्तोषार्थं विमृशति मुहुस्सद्भिरध्यात्मविद्यां
नित्यं ब्रूते निशमयति च स्वादुसुव्याहृतानि ।
अङ्गीकुर्वन्ननघललितां वृत्तिमादेहपातात्
दृष्टादृष्टस्वभरविगमे दत्तदृष्टिःप्रपन्नः ॥
प्रणयिनमिव प्राप्त पश्चात्प्रिया स्वसमन्वितम्
महतिमुहुरामृष्टे दृष्ट्वा मनौ मणिदर्पणे ।
प्रपदनधनास्सन्तश्शुद्धैः प्रभुं परिभुञ्जते
प्रसृमरमहामोदस्मेर प्रसूनसमैः क्रमैः ॥

पुरुषार्थकाष्ठाधिकारः

स्वतन्त्रस्वामित्वात्स्वबहुमतिपात्रेषु नियतं
श्रियःकान्तो देवस्सखलु विनियुङ्क्ते चिदचितौ ।
यथा लोकाम्नायं यतिपतिमुखैराहितधियां
ततो नःकैङ्कर्यं तदभिमतपर्यन्तमभवत् ॥
नाथेनः तृणमन्यदन्यदपि वा तन्नाभिनालीकिनी
नालीकस्पृहणीयसौरभमुचा वाचा नयाचामहे ।
शुद्धानांतु लभेमहि स्थिरधियां शुद्धान्त सिद्धान्तिनां
मुक्तैश्वर्यदिनप्रभातसमयासत्तिं प्रसत्तिं मुहुः ॥

शास्त्रीयनियमनाधिकारः

मुकुन्दे निक्षिप्य स्वभरमनघो मुक्तवदसौ
स्वतन्त्राज्ञासिद्धां स्वयमविदितस्वामिहृदयः ।
परित्यागे सद्यस्स्वपरविविधानर्थजननात्
अलङ्घ्यामामोक्षादनुसरति शास्त्रीयसरणिम् ॥
श्रुतिस्मृत्याचारैः स्वमतिगतिभिः शुद्धमनसां
सुसङ्कल्पैः धर्म्यैः कुलचरणदेशादिसमयैः ।
नियोगैर्योगानां नियमयितुरादेरभिमतं
निमित्तस्वप्राद्यैरपि निपुणमन्विच्छति बुधः ॥

अपराधपरिहाराधिकारः

स्वच्छस्वादुसदाऽवदातसुभगां दैवादयं देहभृत्
मालिन्यप्रशमाय माधवदया मन्दाकिनीं विन्दति ।
यद्यप्येवमसावसारविषयस्रोतःप्रसूतैःपुनः
पङ्कैरेव कळङ्कयन्निजतनुं प्राज्ञैर्न संश्लिष्यते ॥
प्रारब्धेतरपूर्वपापमखिलं प्रामादिकंचोत्तरं
न्यासेन क्षपयन्ननभ्युपगतप्रारब्धखण्डं च नः ।
धीपूर्वोत्तर पाप्मनामजननाज्जातेऽपि तन्निष्कृतेः
कौटिल्येसति शिक्षयाऽप्यनघयन्क्रोडीकरोति प्रभुः ॥

स्थानविशेषाधिकारः

यत्रैकाग्र्यं भवति भगवत्पादसेवार्चनादे-
यत्रैकान्त्यव्यवसितधियो यस्य कस्यापि लाभः ।
वासस्थानं तदिह कृतिनां भाति वैकुण्ठकल्पं
प्रायो देशा मुनिभिरुदिताःप्रायकौचित्यवन्तः ॥
सा काशीति न चाकशीति भुवि साऽयोध्येति नाध्यास्यते
साऽवन्तीति न कल्मषादवति सा काञ्चीति नोदञ्चति ।
धत्ते सा मधुरेति नोत्तमधुरं सान्यापि नान्या पुरी
या वैकुण्ठकथासुधारसभुजां रोचेत नोचेतसे ।

निर्याणाधिकारः

मनसि करणग्रामं प्राणे मनःपुरुषे च तं
झटिति घटयन्भूतेष्वेनं परे च तमात्मनि ।
स्वविदविदुषोरित्थं साधारणे सरणेर्मुखे
नयतिपरतो नाडीभेदैर्यथोचितमीश्वरः ॥
दहरकुहरे देवस्तिष्ठन्निषद्वरदीर्घिका
निपतितनिजापत्यादित्साऽवतीर्णपितृक्रमात् ।
धमनिमिहनस्तास्मिन्काले सएव शताधिका-
मकृतकपुरप्रस्थानार्थं प्रवेशयति प्रभुः ॥

गतिचिन्तनाधिकारः

ज्वलनदिवसज्योत्स्नापक्षोत्तरायणवत्सरान्
पवनतपनप्रालेयांशून्क्रमादचिरद्युतिम् ।
जलधरपतिं देवाधीशं प्रजापतिमागत-
स्तरति विरजां दूरेवाचस्ततःपरमद्भुतम् ॥
पितृपथघटीयन्त्रारोहावरोहपरिश्रमै-
र्निरयपदवीयातायातक्रमैश्चनिरन्तरैः ।
अधिगतपरिश्रान्तीनाञ्चाधरैरतिवाह्य नः
सुखयति निजच्छायादायी स्वयं हरिचन्दनः ॥

परिपूर्णब्रह्मानुभवाधिकारः

वितमसिपदे लक्ष्मीकान्तं विचित्रविभूतिकं
सचिवगमितस्सम्पद्याविर्भवत्सहजाकृतिः ।
स्फुटतदपृथक्सिद्धिस्सिद्ध्यद्गुणाष्टकतत्फलो
भजति परमं साम्यं भोगे निवृत्तिकथोज्झितम् ॥

अविश्रान्तश्रद्धा शतकलह कल्लोलकलुषा
ममाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभाः ।
मधुक्षीरन्यायस्वगुणविभवासंजनकनत्
महानन्दब्रह्मानुभवपरिवाहा बहुविधाः ॥

अर्थानुशासनभागसंग्रहश्लोकाः

सन्दृष्टस्सारवाग्वित्स्वपरनिशितधीस्सङ्गजिन्नैकसंस्थः
स्पष्टोपायोऽतिखिन्नस्सपरिकरभरन्यासनिष्पन्नकृत्यः ।
स्वावस्थार्हं सपर्याविधिमिह नियतं व्यागसं क्वापि बिभ्रत्
निर्मुक्तस्थूलसूक्ष्मप्रकृतिरनुभवत्यच्युतं नित्यमेकः ॥

सिद्धोपायशोधनाधिकारः

युगपदखिलं प्रत्यक्षेण स्वतस्सततं विदन्
निरवधिदयादिव्योदन्वानशक्यविवर्जितः ।
जलधिसुतयासार्धं देवो जगत्परिपालयन्
परमपुरुषास्सिद्धोपायःप्रतीष्टभरस्सताम् ॥

विश्राम्यद्भिरुपर्युपर्यपि दिवा नक्तं बहिर्दर्शनैः
अस्मद्देशिकसम्प्रदायरहितैरद्यापि नालक्षितः ।
स्वप्राप्तेस्स्वयमेव साधनतया जोघुष्यमाणश्श्रुतौ
सत्वस्थेषु भजेत सन्निधिमसौ शान्तावधिश्शेवधिः ॥

साध्योपायशोधनाकारः

यथाऽधिकरणं प्रभुर्यजनदानहोमार्चना-
भरन्यसनभावनाप्रभृतिभिस्समाराधितः ।
फलं दिशति देहिनामितिहि सम्प्रदायस्थितिः
श्रुतिस्मृतिगुरूक्तिभिर्नयवतीभिराभाति नः ॥

तत्तद्वैतुकहेतुके कृतधियस्तर्केन्द्रजालक्रमे
बिभ्राणाःकथकप्रधानगणने निष्ठां कनिष्ठाश्रयाम् ।
अध्यात्मश्रुतिसम्प्रदायकतकैरद्धा विशुद्धाशयाः
सिद्धोपायवशीक्रियामितिहि नस्साध्यां समध्यापयन् ॥

प्रभावव्यवस्थाऽधिकारः

स्वरूपं यद्याद्दग्गुणविभवलीलादि च विभोः
तदाज्ञासेतुश्च श्रुतिभिरवसेयं तदखिलम् ।
तथा तद्भक्तानां तदुपसदनादेश्च महिमा
यथाऽधीतं सद्भिर्यतिपतिमुखैरध्यवसितः ॥
चातुर्वर्ण्यचतुर्विधाश्रममुखे भेदे यथावस्थिते
वृत्तं तन्निखिलं गुणानुगुणया वृत्त्या विशिष्टं श्रिताः ।
त्यागोपप्लवनित्यदूरशरणव्रज्याविधौ कोविदाः
चिन्तामभ्युपगन्तुमन्तिमयुगेऽप्येकान्तिनस्सन्ति नः ॥

प्रभावरक्षाधिकारः

शिलादेस्त्रीत्वादिर्विपरिणतिरस्त्वद्भुतमिदं
ततोऽप्येतच्चित्रं यदुतदहनस्यैव हिमता ।
तृणस्यैवास्त्रत्वं रिपुषु निहतेरेव हितता
पदत्रेणैवेह त्रिभुवनपरित्राणमिति च ॥
रागद्वेषमदादिकैरिहमहारक्षोभिरक्षोभितम्
नित्ये रक्षितरि स्थिते निजभरन्यासाभिधानं तपः ।
यत्कक्षीकृतमल्पशेत विविधान् धर्मानधर्मद्रुहः
तद्धर्मार्णवलेशवर्णनमपि प्राचां न वाचां पदम् ॥

मूलमन्त्राधिकारः

तारं पूर्वं तदनु हृदयं तच्च नारायणाये-
त्याम्नायोक्तं पदमवयतां सार्थमाचार्यदत्तम् ।
अङ्गीकुर्वन्नलसमनसामात्मरक्षाभरं नः
क्षिप्रं देवः क्षिपतु निखिलान् किङ्करैश्वर्यविघ्नान् ॥

कल्याणमावहतु कार्तयुगं स्वधर्मं प्रख्यापयन्प्रणिहितेषु नरादिकेषु ।
आद्यङ्कमप्यधिगतो रथमष्टचक्रं बन्धुस्सतां बदरिकाश्रमतापसो नः ॥

यदन्तस्थमशेषेण वाङ्मयं वेदवैदिकम् ।
तस्मै व्यापकमुख्याय मन्त्राय महते नमः ॥

इह मूलमन्त्रसंवृतमर्थमशेषेण कश्चिदनुभवति ।
स्फटिकतलनिहितनिधिमिव देशिकदत्तेन चक्षुषा जन्तुः ॥

इत्थं सङ्कुटितःपदैस्त्रिभिरसावेकद्विपञ्चाक्षरै-
रर्थैस्तत्वहितप्रयोजनमयैरध्यात्मसारैस्त्रिभिः ।
आद्यस्त्र्यक्षरवेदसूतिरजहत्स्थूलादिवृत्तित्रयः
त्रैगुण्यप्रशमं प्रयच्छति सतां त्रय्यन्तसारो मनुः ॥

द्वयाधिकारः

आकर्णितो वितनुते कृतकृत्यकक्ष्यामाम्रेडितो दिशति यश्च कृतार्थभावम् ।
प्रत्यूषतां भजति संसृतिकाळरात्रेः पद्मासहायशरणागतिमन्त्र एषः ॥

एकं द्वयं त्र्यवयवं सुखलभ्यतुर्यं व्यक्तार्थपञ्चकमुपात्तषडङ्गयोगम् ।
सप्तार्णवी महिमवद्विवृताष्टवर्णं रङ्गेसतामिह रसं नवमं प्रसूते ॥

न वेदान्ताच्छास्त्रं न मधुमथनात्तत्त्वमाधिकम्
न तद्भक्तात्तीर्थं न तदभिमतात्सात्विकपदम् ।
नसत्त्वादारोग्यं न बुधभजनाद्बोधजनकम्
न मुक्तेस्सौख्यं न द्वयवचनतः क्षेमकरणम् ॥

चरमश्लोकाधिकारः

यउपनिषदामन्ते यस्मादनन्तदयाम्बुधेः
त्रुटितजनताशोकःश्लोकस्स्वयं समजायत ।
तमिह विधिना कृष्णं धर्मं प्रपद्य सनातनम्
शमितदुरिताश्शङ्कातङ्कत्यजस्सुखमास्महे ॥

दुर्विज्ञानैर्नियमगहनैर्दूरविश्रान्तिदेशैः
बालानर्हैर्बहुभिरयनैश्शोचतां नस्सुपन्थाः ।
निष्प्रत्यूहं निजपदमसौ नेतुकामस्स्वभूम्ना
सत्पाथेयं किमपि विदधे सारथिस्सर्वनेता ॥

व्यासाम्नायपयोधिकौस्तुभनिभं हृद्यं हरेरुत्तमं
श्लोकं केचन लोकवेदपदवीविश्वासितार्थं विदुः ।
येषां मुक्तिषु मुक्तिसौधविशिखासोपानपङ्क्तिष्वमी
वैशम्पायन शौनकप्रभृतयश्श्रेष्ठाः शिरःकम्पिनः ॥

आचार्यकृत्याधिकारः

अधिजिगमिषुराद्यं धाम दिव्यं त्रिधाम्नश्श्रुतविविधपरीक्षा शोधिते क्वापि पात्रे ।
अनघगुणदशायामाहितस्नेहमार्यः प्रदिशति निरपायं सम्प्रदायप्रदीपम् ॥

प्रत्यग्वस्तु विलक्षणः प्रकृतितस्त्रातापतिस्तत्परः
तस्मिन्नात्मभरार्पणं हिततमं तच्छेषवृत्तिः फलम् ।
इत्थं तत्वहिते पुमर्थ इति नत्रेधाविभक्तं धनं
दायत्वेन दयाधनास्स्वयमदुर्दत्तात्मनां देशिकाः ॥

निरवधिदयादिव्योदन्वत्तरङ्गनिरङ्कुशै-
र्नियमयति यश्शिष्यान् शिक्षाक्रमैर्गुणसङ्क्रमैः ।
अचरमगुरोराज्ञापारम्परीपरवानसौ
न परमिहतांस्तल्लक्षेण स्वमप्यभिरक्षति ॥

शिष्यकृत्याधिकारः

अशिथिलगुरुभक्तिस्तत्प्रशंसादिशीलः प्रचुरबहुमतिस्तद्वस्तुवास्त्वादिकेऽपि ।
गुणवतिविनियोक्तुं गोपयन्संप्रदायं कृतविदनघवृत्तिः किन्नविन्देन्निधानम् ॥

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासनात्
आचार्यादिहदेवतां समधिकामन्यान्नमन्यामहे ।
यस्यासौ भजते कदाचिदजहद्भूमास्वयं भूमिकां
मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः ॥

निगमनाधिकारः

करबदरितविश्वः कश्चिदाचार्यदृष्ट्या मुषितनिखिलमोहो मूलमन्त्रादिभोगः ।
सगुणविषयसिद्धौ सम्प्रदायं प्रयच्छन् सुचरितसिलहारी सूरिबृन्दाभिवन्द्यः ।

इति यतिराजमहानपरिमळपरिवाहवासितां पिबत ।
विबुधपरिषन्निषेव्यां वेदान्तोदयन सम्प्रदायसुधाम् ॥

कलकण्ठगणास्वाद्ये कामस्याख्ये निजाङ्कुरे ।
निम्बवृत्तिभिरुद्गीर्णे न चूतः परितप्यते ॥
निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनम्
निर्धूतेतरपारतन्त्र्यनिरया नीतास्सुखं वासराः ।
अङ्गीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे ॥

आस्तिक्यवान्निशितबुद्धिरनभ्यसूयुस्सत्सम्प्रदायपरिशुद्धमनास्सदर्थी ।
सङ्केतभीतिरहितस्सतृणेष्वसक्तस्सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥

रहस्यत्रयसारोऽयं वेङ्कटेशविपश्चिता ।
शरण्यदम्पतिविदां सम्मतस्समगृह्यत ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्रहस्यत्रयसारग्रन्थस्थकारिकाः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

अर्थानुशासनभागे (५) तत्त्वत्रयाधिकारः

धियस्स्वयंप्रकाशत्वं मुक्तौ स्वाभाविकं यथा ।
बद्धे कदाचित्संरुद्धं तथाऽत्रापि नियम्यते ॥
उपयुक्तेषु वैशद्यं त्रिवर्गनिरपेक्षता । करणत्रयसारूप्यमिति सौख्यरसायनम् ॥
(अ.८) स्वतन्त्राङ्गप्रपत्तिभ्यां प्रपन्नावत्रतावुभौ ।
फलसाधनभक्तिभ्यां भक्तावपि च दर्शितौ ॥

(९) उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया ।
सा तत्क्रतुनयग्राह्या नाकारान्तरवर्जनम् ॥
(१२) मुमुक्षुमात्रसामान्यं स्वरूपादिसमर्पणम् ।
अकिंचने भरन्यासस्त्वधिकोऽङ्गितया स्थितः ॥
अत्र रक्षाभरन्यासस्समस्सर्वफलार्थिनाम् ।
स्वरूपफलनिक्षेपस्त्वधिको मोक्षकाङ्क्षिणाम् ॥
स्वनिर्भरत्वपर्यन्त रक्षकैकार्थ्यभावनम् ।
त्यक्तरक्षाभरस्वाम्यं रक्ष्यस्यात्मभरार्पणम् ॥
प्रवृत्तिरनुकूलेषु निवृत्तिश्चान्यतः फलम् ।
प्रारब्धसुकृताच्चस्यात्सङ्कल्पे च प्रपत्तितः ॥
(१६) नित्यं श्रियासमेतस्य भक्तैरात्मवतस्सदा ।
सहसद्वारकंचस्याच्छेषित्वं परमात्मनः ॥
(१७) आज्ञानुज्ञाविभागेन द्विधा शास्त्रीयपद्धतिः ।
निग्रहानुदयायाद्या परा तत्तत्फलाप्तये ॥ १० ॥
अनुज्ञया प्रवृत्तेऽपि क्रमकोपादिसम्भवे ।
आज्ञातिक्रमदोषस्यान्नियमोऽतो दुरत्ययः ॥
प्रत्यवायपरीहारे फलान्तरसमन्विते । तत्र संवलितं प्राहुरधिकारं विचक्षणाः
नित्यकाम्यस्वरूपैक्ये विनियोगपृथक्त्ववतः ।
फलार्थं क्रियमाणेऽपि नित्यं भवति तन्त्रतः ॥
अनुज्ञामात्रसिद्धेषु कैङ्कर्येषु विचक्षणैः ।
अकृतौ तत्फलालाभो नतु दोष इतीरितम् ॥
(१८) न प्राग्वद्बुद्धिपूर्वाघे नचात्यन्तमनुग्रहः ।
लघुर्दण्डः प्रपन्नस्य राजपुत्रापराधवत् ॥
अविवेकप्रभुत्वादेर्निदानस्य निवर्तनात् ।
अर्थकामापचाराणामयत्नोन्मूलनं भवेत् ॥
अनुतापादुपरमात्प्रायश्चित्तोन्मुखत्वतः ।
तत्पूरणाच्चापराधास्सर्वे नश्यन्ति पादशः ॥
पूर्वस्मिन्वा परस्मिन्वा कल्पे निर्विण्णचेतसाम् ।
निवर्त्यतारतम्येऽपि प्रपत्तिर्नाविशिष्यते ॥

एवमेव गुरूणां वा लघूनामपि वागसाम् ।
सकृत्प्रपत्तिरेवैका सद्यः प्रशमकारणम् ॥
(२२) सायुज्यमुभयोरत्र भोक्तव्यस्याविशिष्टता ।
सार्ष्टिता तत्र भोगस्य तारतम्यविहीनता ॥
(२३) यदर्थंतु कृतोन्यासस्तदर्थं न पुनःक्रिया ।
पूर्वमप्यपराधीनप्रवृत्तावस्य नान्वयः ॥
स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम् ।
स्वदत्तस्वधिया स्वार्थं स्वस्मिन्नयस्यति मां स्वयम् ॥

भरस्वीकाररहितं रक्षासङ्कल्पवर्जितम् । गुणादिकमिहेष्टंहि शरण्यस्य विशेषणम्
ऐकरस्यजुषोश्शेषि दम्पत्योस्सर्वकर्मसु । विशेषणविशेष्यत्वं श्रुतं कस्मान्नरोचते
प्रतर्दनादिविद्यासु वेद्येऽपि परमात्मनि । अचेतनवदिच्छामश्चेतनं च विशेषणम्

इत्थं प्रपत्तिविद्यायां तत्तन्मन्त्रानुसारतः ।
विभुःपत्नया गुणाद्यैश्च विशिष्टो विषयोऽत्र नः ॥
समस्तपुरुषार्थानां साधकस्य दयानिधेः ।
श्रीमतःपूर्वसिद्धत्वात्सिद्धोपायमिमं विदुः ॥
भक्तिप्रपत्तिप्रमुखं तद्वशीकारकारणम् ।
तत्तत्फलार्थिसाध्यत्वात्साध्योपायं विदुर्बुधाः ।
साध्योपायोत्तरङ्गेण सिद्धोपायस्य शेषिणः ॥
लीलाप्रवाहः कारुण्यप्रवाहेण निरुध्यते ।
तेनैव सर्वे लीयन्ते सिकतासेतुबन्धवत् ॥
स्वतन्त्रस्यापि सङ्कल्पाः स्वकैङ्कर्यनिरोधकाः ।
प्रसादनस्योपायत्वे शास्त्रीयेऽपि फलं प्रति ॥
कर्तृत्वाव्यवधानाद्यैः सिद्धोपायप्रधानता ।
स्वतन्त्रन्यासनिष्ठानां सिद्धोपाये विभौ स्थितिः ॥
पञ्चा(क्षणा)त्स्वयत्नविरतिव्यक्त्यै प्रोक्ता विशेषतः ।
अतो यदर्थं स्वभरस्सिद्धोपाये निवेशितः ।
तदर्थं शान्तयत्नोऽसौ सिद्धोपायं प्रतीक्षते ॥
प्रपत्तेर्लक्षणे मन्त्रे विधौ वाक्यान्तरेषु च ।
भाष्यादौ सम्प्रदायेचोपायत्वं ब्रह्मणि स्थितम् ॥

पूर्वसिद्धस्य देशादेर्धर्मत्वं यद्वदिष्यते ।
एवं तत्त्वविदः प्राहुः कृष्णं धर्मं सनातनम् ॥
(२४) अतस्त्रैवर्णिकत्वादेर्भावोऽभावोऽपि कस्यचित् ।
नाधिकारः प्रपत्तेस्यादाकिञ्चन्यमनाश्रितः ॥
हविस्समर्पणादत्र प्रयोगविधिशक्तितः ।
आत्मरक्षाभरन्यासोऽकिंचनस्यातिरिच्यते ॥
अतश्श्रीराममिश्राद्यैर्भरन्यासविवक्षया ।
स्वप्रवृत्तिनिवृत्त्यंशः प्रपत्तिरिति लक्षितः ॥
अकृतेतु भरन्यासे रक्षापेक्षणमात्रतः ।
पश्चात्स्वयत्नविरतिर्नप्रसिद्ध्यति लोकवत् ॥
आकिंचन्यभरन्यासोपायत्वप्रार्थनात्मनाम् ।
त्रयाणां सौहृदं सूक्ष्मं यःपश्यति स पश्यति ॥
जितकौस्तुभचौर्यस्य सम्राजस्सर्व पाप्मनाम् ।
शिष्टंह्यात्मापहारस्य निष्कृतिस्स्वभरार्पणम् ॥
परशेषत्वधीमात्रमधिकारविशेषकम् । पश्चादात्मापहारस्य निरोधायच कल्पते ॥
ज्ञानान्मोक्षोपदेशोहि तत्पूर्वोपासनादिना ।
उपासनादिरूपाद्वा साक्षान्मोक्षो विवक्षितः ॥
वाक्यमात्रेण सिद्धत्वात्सिद्धोपाय इहोच्यते ।
प्रपत्तिरिति वादोऽपि विधिनाऽत्र विहन्यते ॥
(२५) प्रतिपत्तिविशेषार्थमन्यत्रान्यत्वकीर्तनम् ।
विशेषविधिसाकाङ्क्षास्तत्र तत्तत्प्रवृत्तयः ॥
अतो जातेर्निकृष्टायास्सर्वस्यावा विनाशतः ।
साजात्यं विष्णुभक्तानामिति मन्दमिदं वचः ॥
वैष्णवत्वेन मान्यत्वं समानं मुनिसम्मतम् ।
जात्यादिध्वंसतस्साम्यं मुक्तिकाले भविष्यति ॥
प्रकृतोपासनन्यायात्तदङ्गानामुपस्थितौ ।
अन्येषां चैतदङ्गत्वत्यागोऽत्र प्रतिपाद्यते ॥
आज्ञाविरोधिभिस्स्वाहि प्रायश्चित्तपराङ्मुखैः ।
स्वाधिकारोचितस्सर्वैः प्रत्यवायो दुरत्ययः ॥

आज्ञाऽनुपालने तत्तत्प्रत्यवायनिवारणम् ।
स्वामिसन्तोषतःप्रीतिरिति लाभद्वयं स्थिरम् ॥
अनिच्छातोनिवर्तेत स्वर्गाद्यंकर्मणांफलम् ।
अमर्यादस्यदुर्वारः प्रत्यवायोऽन्यहेतुकः ॥
सुदुष्करेणशोचेद्यो येन येनेष्टहेतुना । स स तस्याहमेवेति चरमश्लोकसङ्ग्रहः ॥
भावाभावौनधर्माणां प्रपत्तेरङ्गमिष्यते ।
स्वतन्त्रशिष्टयाशक्येहाशेषाभावोऽधिकारगः ॥
क्रत्वनङ्गतया येतु तदानीमननुष्ठिताः ।
स्वकाले स्वविधेरेव कार्यास्ते तद्वदत्र नः ॥
अधर्मपरिहारेपि धर्मत्वेन विवक्षिते । स्यात्स्वतन्त्रविधेरेव नित्यं तस्य परिग्रहः ॥
आनुकूल्यपरित्यागं प्रातिकूल्यपरिग्रहम् ।
प्रपत्यङ्गंप्रतिज्ञातु न शक्यं साधुसंसदि ॥
प्रपन्नमधिकृत्यैव सदाचारानतिक्रमः ।
प्रपत्त्यद्ध्यायपठितः प्रतिसन्धीयतामिह ॥
प्रायश्चित्तान्तराशक्तः कालक्षेपाक्षमोऽपि वा ।
पुनः प्रपद्यते नाथमभिन्दन् लोकसङ्ग्रहम् ॥
प्रपन्नस्यनिषिद्धैरप्यलेपमुपपादयन् ।
यथाऽभिमतसद्वृत्त निष्ठेभ्यः किमसूयति ॥
आज्ञाऽतिलङ्घनेयस्य रक्षकत्वं न भज्यते ।
आज्ञाऽनुपालने तस्य कथं तदुपरुध्यते ॥
नचाचारंविना किञ्चित् कैङ्कर्यमुपपद्यते ।
नहिशौचमकृत्वैव समाराधनमर्हति ॥
आचारप्रभवोधर्मो धर्मस्य प्रभुरच्युतः ।
इति पञ्चमवेदेऽपि सर्वशास्त्रार्थईरितः ॥
प्रपत्तिप्रतिसन्धानमाप्तैर्यदुपदिश्यते ।
तस्याधिकारनियतहानोपादानसिद्धये ॥
प्रतिसन्धानतोऽपिस्यादधीपूर्वेष्वलेपधीः ।
बुद्धिपूर्वेष्वपि पुनः प्रपत्तेरेव सङ्ग्रहः ॥
अतो निरपराधेन वर्तितव्यं कृतात्मना ।

अपराधप्रसंगे च पुनः प्रपदनं क्षमम् ॥
आहारगृहमन्त्रार्थं जात्यादिनियमैर्युतः ।
कुर्याल्लक्ष्मीशकैङ्कर्यं शक्त्याऽनन्यप्रयोजनः ॥
आचारात्मगुणोपाय पुरुषार्थविशेषतः ।
अधिकारिणिवैशिष्ट्यं प्रकृष्येतोत्तरोत्तरम् ॥
(२७)पदवाक्ययोजनाभागे श्रीमूलमन्त्राधिकारे
त्राणेस्वामित्वमौचित्यं न्यासाद्यास्सहकारिणः ।
प्रधानहेतुस्स्वातन्त्र्यविशिष्टा करुणा विभोः ॥
निश्चिते परशेषत्वे शेषं सम्परिपूर्यते ।
अनिश्चिते पुनस्तस्मिन्नन्यत्सर्वमसत्समम् ॥
श्रीमान् स्वतन्त्रःस्वामी च सर्वत्रान्यानपेक्षया ।
निरपेक्षस्वतन्त्रत्वं स्वाम्यं चान्यस्य न क्वचित् ॥
तारस्यनमसश्चेमौ सारौदेशिकदर्शितौ ।
अनन्यशरणत्वादेरधिकारस्य सिद्धये ॥
स्वेच्छयैव परेशस्य तादधीन्यबलात्तु नः ।
भगवद्भक्तशेषत्वं स्वेच्छयाऽपि क्वचित भवेत् ॥
गुणाधिकेहिविषये गुणसारस्य वेदिनः ।
रामे रामानुजस्येव दास्यं गुणकृतं भवेत् ॥
दास्यमैश्वर्ययोगेन ज्ञातीनां च करोम्यहम् ।
अर्धभोक्ता च भोगानां वाग्दुरुक्तानि च क्षमे ॥
इति स्वोक्तिनयादेव स्वभक्तविषये प्रभुः ।
आत्मात्मीयस्य सर्वस्यसंकल्पयति शेषताम् ॥
अन्योन्यशेषभावोहि परस्वातन्त्र्यसम्भवः ।
तत्तदाकारभेदेन युक्त इत्युपपादितम् ॥
एवं शिक्षितनानार्थनमश्शब्दसमान्विताः ।
सर्वेकरणतां यान्तिमन्त्रास्स्वात्मसमर्पणे ॥
जीवसामान्यमुखतःश्रृङ्गग्राहिकयाऽपि वा ।
मकारौ तारनमसोस्स्वानुसन्धानदाविह ॥
इह या स्वानुसन्धानप्रक्रियैकस्य दर्शिता ।

अन्येषामपि तत्साम्यात् नान्योन्यशरणा इमे ॥
अतःस्वपररक्षायां पराधीनेषु जन्तुषु ।
निरपेक्षशरण्यत्वं नियतंकमलापतौ ॥
कारणत्वमबाध्यत्वमुपायत्वमुपेयता ।
इति शारीरकस्थाप्यमिह चापि व्यवस्थितम् ॥
इह सङ्ग्रहतःश्रीमान् गोप्ता शेषीसमाधिकदरिद्रः ।
शरणं सर्वशरीरीप्राप्यःसेव्यश्च साधुभिर्भाव्यः ॥
पदत्रयेण संक्षेपाद्भाव्याऽनन्यार्हशेषता ।
अनन्योपायता स्वस्य तथाऽनन्यपुमर्थता ॥
इह निजपक्षविरुद्धैरीदृशनिष्ठाविरोधिभिश्चान्यैः ।
द्विचतुष्कसारवेदी गङ्गाह्रद इव नगच्छतिक्षोभम् ॥
अत्र स्वलाभापेक्षाऽपि स्वामिलाभावसायिनी ।
स्वामिप्रयोजनापेक्षाऽप्यतःस्वानन्दहेतुका ॥
स्वतःस्वार्हं यथा भागं पुत्रःपितुरपेक्षते ।
सापराधस्तथा दासः कैङ्कर्यं परमात्मनः ॥
एकमेवस्वरूपेण परेण च निरूपितम् ।
इष्टप्राप्तिरनिष्टस्य निवृत्तिश्चेति कीर्त्यते ॥
केचित्तु चरमश्लोके द्वयेचोक्तक्रमादिह ।
भरन्यासपरं तारं शेषं फलपरं विदुः ।
तदेवं पदवाक्यार्थैः तत्वविद्गुरुदर्शि तैः ।
तत्तत्कुदृष्टि कथितं निरस्तं योजनान्तरम् ॥
अविद्यापूतनोन्मुक्तैरनवज्ञातसत्पथैः ।
असदास्वादसव्रीळैरादिष्टमिति दर्शितम् ॥

द्वयाधिकारे

परभक्त्यादिमूलत्वं कैङ्कर्यस्य यदुच्यते ।
गद्यादिषु तदप्याहुरपवर्गदशाश्रयम् ॥
उत्तरोत्तरयोस्स्वामि साक्षात्करणभोगयोः ।
पूर्वं पूर्वक्षणेष्टत्वात् तन्मूलत्वमुदीरितम् ॥

शरीरपातसमये हार्दस्यानुग्रहस्स्वयम् ।
परिपाकं प्रपन्नानां प्रयच्छति तथाविधम् ॥
अङ्कोलतैलसिक्तानां बीजानामचिराद्यथा ।
विपाकःफलपर्यन्तः तथाऽत्रेति निदर्शितम् ॥
दुष्टेन्द्रियवशाच्चित्तं नृणां यत्कल्मषैर्वृतम् ।
तदन्तकाले संशुद्धिं याति नारायणालये ॥
इति व्रतविशेषे यत्सात्त्वतादिषु शिष्यते ।
तद्वदत्रोपपद्येत गद्योक्तान्त्यदशागमः ॥
अनुग्रहविशेषेण केनचित् परमात्मनः ।
कुरुकाधीशनाथाद्याः प्रागप्यन्वभवन्प्रभुम् ॥
अर्थस्वभावानुष्ठानलोकदृष्टिगुरूक्तिभिः ।
श्रुत्या स्मृत्या च संसिद्धं घटकार्थावलम्बनम् ॥
स्वाम्युपाय उपेयश्च स्वरूपादिसमर्पणे ।
प्रथितः प्रतिसम्बन्धी श्रीमान्निगमचक्षुषाम् ॥
परावरसुखग्राह्यं प्रसबोधप्रसावकम् ।
स्वरूपात्स्वामिनोरूपमुपादेयतमं विदुः ॥
चित्तालम्बनसौकर्यकृपोत्तम्भकतादिभिः ।
उपायत्वमिह स्वामिपादयोरनुसंहितम् ॥
चरणाविति निर्देशः पत्नीवैशिष्ट्यबाधकः ।
इति मन्दैरिदं प्रोक्तं श्रीमच्छब्दविरोधतः ॥
शब्दस्वरसतःप्राप्तं वैशिष्ट्यं प्रथमं श्रुतम् ।
विशेष्यचरणद्वित्वं न हि बाधितुमर्हति ॥
चरणाविति वक्तव्यमिति यच्च प्रसञ्जितम् ।
ग्रन्थज्ञैरपहास्यं तत् पतिप्राधान्यतोऽन्वयात् ॥
न सम्राजिसपत्नीके सद्वितीयोक्तिसाहसम् ।
तथात्रेऽप्यपरामृश्य दर्शितं गुरुसाहसम् ॥
भरन्यासबलादेव स्वयत्नविनिवृत्तये ।
अत्रोपायान्तरस्थाने रक्षको विनिवेशितः ॥
अप्रार्थितः परिहरन् स्वपरैस्स्वरक्षां तादर्थ्यधीपरिहृतस्वपरार्थभावः ।

अन्योपभोगविरहादनघःप्रपन्नोभुङ्क्ते स्वभोगमखिलं पतिभोगशेषम् ॥

वैराग्यविजितस्वांतैः प्रपत्तिविजितेश्वरैः ।
अनुक्रोशैकविजितैरित्युपादेशि देशिकैः ॥
इदमष्टपदंव्यासे समासे षट्पदं विदुः
वाक्यं पञ्चपदैर्युक्तमित्याख्यातप्रधानकम् ॥

चरमश्लोकाधिकारे

अधिकारं पुरस्कृत्योपायस्य निरपेक्षतां ।
एकशब्देन वक्तीति केचिद्वाक्यविदो विदुः ॥
नैरपेक्ष्यं पुरस्कृत्य विहितस्य लघीयसः ।
उपायस्याधिकारं तु श्लोकद्योत्यं विदुः परे ॥
इत्थमर्थाविशेषेऽपि योजनाभेदमात्रतः ।
प्राचां विमर्शस्संवृत्तो भाष्यकारैरवारितः ॥
अज्ञातपूर्ववृत्तान्तैर्यत्तत्रारोपितं परैः ।
तत्तु श्रीविष्णुचित्ताद्यैर्निर्मूलमिति दर्शितम् ॥
अशक्तस्यातिकृच्छ्रेषु दुराशादार्ढ्यशालिनः ।
कस्यचिद्बुद्धिदौर्बल्यं लघुत्यागस्य कारणम् ॥
तत्र प्रपत्त्यनर्हाणामन्यदित्यपियुज्यते ।
व्यासादिषु तु नैवैषा नीतिस्संशयघातिषु ॥
अतःस्वरूपत्यागोक्तौ कैङ्कर्यस्यापचारता ।
उपायत्वमतित्यागे तत्स्वरूपाङ्गता भवेत् ॥
सात्विकत्यागयुक्तानां धर्माणामेतदङ्गता ।
नूनं विस्मृतकाकादिवृत्तान्तैरुपवर्णिता ॥
सकृत्प्रपदनेनैव धर्मान्तरदवीयसा ।
तत्क्षणेऽभिमतं पूर्वे संप्रापुरिति शुश्रुम ॥
प्रसक्ताङ्गत्वबाधेतु ब्रह्मास्त्रसमतेजसः ।
उपायस्वप्रभावश्च कैङ्कर्यादि च सुस्थिरम् ॥
सङ्कल्पमात्रमेवाङ्गं श्रुतमाचरणं पुनः ।
अनङ्गमाज्ञया प्राप्तं न सङ्कल्पनिबन्धनम् ॥

आहारग्रहमन्त्रार्थजात्यादिनियमैर्युतः ।
कुर्याल्लक्ष्मीशकैङ्कर्यं शक्त्याऽनन्यप्रयोजनः ॥
मङ्गल्यसूत्रवस्त्रादीन् संरक्षति यथा वधूः ।
तथा प्रपन्नः शास्त्रीय पतिकैङ्कर्यपद्धतिम् ॥
यद्वन्मङ्गल्यसूत्रादेस्त्यागे संरक्षणेऽपि वा ।
रक्षेन्निरुन्ध्याद्भोगैर्वा पतिस्तद्वदिहापि नः ॥
अवज्ञाऽर्थमनर्थाय भक्तजन्मादिचिन्तनम् ।
शास्त्रव्यवस्थामात्रार्थं न तु तद्दूष्यति क्वचित् ॥
अत एव हि शास्त्रेषु तत्तज्जात्यैव दर्शिताः ।
धर्मव्याधतुलाधार शबरी विदुरादयः ॥
स्वजात्यनुगुणैर्येषां वृत्तिरप्यैतिहासिकी ।
विशेषविधिसिद्धं तु तद्बलात्तत्र युज्यते ॥
देशकालाधिकार्यादि विशेषेषु व्यवस्थिताः ।
न धर्माःप्राप्तिमर्हन्ति देशकालान्तरादिषु ॥
केचित्तत्तदुपाख्यान तात्पर्यग्रहणाक्षमाः ।
कलिहोलाहलक्रीडां वर्धयन्ति रमापतेः ॥
मातृभिःपितृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्याभूषयितव्याश्च वहुकल्याणमीप्सुभिः ॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः ।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥
एवमादिषु पूजोक्तिर्यथौचित्यान्नियम्यते ।
भक्तम्लेच्छादि पूजोक्तिरेवमेव नियम्यताम् ॥
साक्षाल्लक्ष्मीपतावेव कृतं कैंकर्यमञ्जसा ।
सारफल्कविभागेन द्विधा सद्भिरुदीर्यते ॥
कृतकृत्यस्य कैंकर्यं यदनन्यप्रयोजनम् ।
गुर्वादिरक्षणार्थं वा तत्सारं संप्रचक्षते ॥
डंभार्थं परपीडार्थं तन्निरोधार्थमेव वा ।
प्रयोजनान्तरार्थं वा कैंकर्यं फल्गुइष्यते ॥
अतःशक्यानि सर्वाणि न प्रपत्त्यर्थमाचरेत् ।

अशक्येषु च सामर्थ्यं न तदर्थं समार्जयेत् ॥
आत्माशक्यवृथायास निवारणमिहापि वा ।
लज्जापुरस्सरत्यागवादोऽप्यत्र नियम्यताम् ॥
सुदुष्करेषु धर्मेषु कुशकाशावलम्बतः ।
आशालेशानुवृत्तिर्वा त्यागोक्त्या विनिवार्यते ॥
अविशिष्टफलत्वेन विकल्पो यश्च सूत्रितः ।
तन्मुखेनापि वाऽत्रेष्टं ब्रह्मास्त्रन्यायसूचनम् ॥
अतोऽशक्ताधिकारत्वमाकिञ्चन्यपुरस्क्रिया ।
अनङ्गभावोधर्माणामशक्यारम्भवारणम् ॥
तत्प्रत्याशाप्रशमनं ब्रह्मास्त्रन्यायसूचनम् ।
सर्वधर्मपरित्यागशब्दार्थास्साधुसम्मताः ॥
देवतान्तरधर्मादि त्यागोक्तिरविरोधिनी ।
उपासकेपि तुल्यत्वादिह सा न विशेषिता ॥
अवतारस्य सत्यत्वमजहत्स्वस्वभावता ।
शुद्धसत्वमयत्वं च स्वेच्छामत्रानिदानता ॥
धर्मग्लानौसमुदयः साधुसंरक्षणार्थता ।
इति जन्मरहस्यं यो वेत्ति नास्य पुनर्भवः ॥
स्वतन्त्रस्यापि नैवस्यादाश्रयो दुर्लभस्यतु ।
अस्वतन्त्रात्फलं नस्यात्सुलभादाश्रितादपि ॥
अस्वतन्त्रे न कैङ्कर्यं सिद्ध्येत्स्वैरप्रसङ्गतः ।
दुर्लभसाध्यमप्येतन्नद्वयंलोकनीतितः ॥
प्राप्यस्यैव प्रापकत्वं स्वप्राधान्यानिवारणम् ।
प्रपत्तेर्व्याजमात्रत्वमन्योपायैरनन्वयः ॥
तदङ्गैरप्यसम्बन्धः सर्वसाध्येष्वभिन्नता ।
इत्थमर्थाष्षडाचार्यैः एकशब्दस्य दर्शिताः ॥
केचित्त्विहैकशब्दार्थं शरण्यैक्यं प्रचक्षते ।
विशिनष्टि तथाऽपि श्रीः गुणविग्रहवत्प्रभुम् ॥
ईश्वरीसर्वभूतानामियं भगवतःप्रिया ।
संश्रितत्राणदक्षायां सहधर्मचरी स्मृता ॥

एकंजगदुपादनामित्युक्तेऽपि प्रमाणतः ।
यथाऽपेक्षितवैशिष्ट्यं तथाऽत्रापि भविष्यति ॥
एकोपास्तिविधानेऽपि गुणादीनां यथाऽन्वयः ।
तथैकशरणव्रज्याविधानेऽप्यनुसन्यताम् ॥
यथा गुणादिवैशिष्ट्ये सिद्धोपायैक्यमक्षतम् ।
एवं पत्नीविशिष्टत्वेऽप्यभीष्टं शास्त्रचक्षुषाम् ॥
प्रभाप्रभावतोर्यद्वदेकोक्ताविनरान्वयः ।
एवमन्यतरोक्तौस्यात्सहवृत्यभिधानतः ॥
स्मरन्ति चैनां मुनयः संसारार्णवतारिणीम् ।
ऊचतुः स्वयमप्येतत् सात्वतादिषु तावुभौ ॥
उपायोपेयदशयोर्द्वयेपि श्रीःसमन्विता ।
इष्टा च शेषिणि द्वन्द्वे शेषवृत्तिर्यथोचिता ॥
अतोऽनन्यपरानेकश्रुतिस्मृत्यनुसारतः ।
पत्नीविशिष्ट एवैकः प्रपत्तव्य इहोदितः ॥
अन्यविश्वाससिद्ध्यर्थं भक्त्युपायविधिं वदन् ।
सर्वशास्त्रेष्वविश्वासमाधत्ते मुखभेदतः ॥
मद्योपहतभांडस्थतीर्थदृष्टान्तवर्णनम् ।
अहंकारान्वयेतुस्यात्प्रपत्तावपि भक्तिवत् ॥
उपभुक्तौषधन्यायादुत्तरापथ्यमर्दनम् ।
अनन्यपरनिर्बाधश्रुतिस्मृतिशतैर्हतम् ॥
विवेकिनां प्रपन्नानां धीपूर्वागस्यनुद्यमः ।
मध्यानामनुतापादिः शिक्षाकठिनचेतसाम् ॥
प्रीतिमेव समुद्दिश्य स्वतन्त्राज्ञानुपालने ।
निग्रहानुदयोऽप्यस्य नान्तरीयक एव वा ॥
ब्रह्मवित्पापवर्गाणामनन्तानां महीयसां ।
तद्द्वेषिसंक्रमंजानन् त्रस्येत्तदपराधतः ॥
सापराधेषु संसर्गेऽप्यपराधान्वहत्यसौ ।
वोढुमीश्वरकृत्यानि तद्विरोधादभीप्सति ॥
बन्धुनाशादयः पूर्वं बहवश्शोकहेतवः ।

तत्तत्समुचितैस्सम्यगुपदेशैरपोदिताः ॥
सुदुष्करत्वाद्धर्माणामपारत्वाद्विरोधिनां ।
सिद्धःफलविलम्बाच्च शोकोऽत्र विनिवार्यते ॥
प्रायश्चित्तविशेषेषु सर्वस्वारादिकेषु च ।
नात्महिंसनदोषोऽस्ति तथाऽऽर्तशरणागतौ ॥
दृप्तस्यतु यथाशास्त्रं चिरं जीवितुमिच्छतः ।
प्राणरक्षणशास्त्रार्थलङ्घनं त्वपराधनम् ॥
एकं सर्वप्रदं धर्मं श्रियाजुष्टसमाश्रितैः ।
अपेतशोकैराचर्यैरयं पन्थाःप्रदर्शितः ॥
संप्रदायप्रक्रियाभागे आचार्यकृत्याधिकारे. (प्रत्येयस्तु) ६९ तमपुटे ॥
साक्षान्मुक्तेरुपायान्यो विद्याभेदानुपादिशत् ।
कथ्यते मोक्षशास्त्रेषु सतु श्रेष्ठतमोगुरुः ॥
आचार्यवत्तयामोक्षमामनन्ति स्मरन्ति च ।
इहामुत्रच तत्पादौ शरणं देशिकाविदुः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्रहस्यत्रयसारग्रन्थस्थकारिकास्सपूर्णाः

श्रीः

श्रीमते श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमते वरदार्यमहादेशिकाय नमः

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्योमे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मणयोगीन्द्र सिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहम्भजे ॥

श्री रहस्यत्रयसारार्थसंग्रहः

पद्मानायक पादपद्मयुगले पर्यायभृंगात्मना
चेतोमे चिरपक्षपातविभवादास्वादमासीदतु ।
अध्यात्म श्रुतिदुग्धसिन्धुलहरी संचारसम्भावितैः
हंसश्रीरधिगम्यते सुकृतिभिर्यत्रोल्लसद्बुद्धिभिः ॥

श्रीमद्वरदनाथेन वेदान्ताचार्यसूनुना ।
रहस्यत्रयसारार्थसंग्रहोऽयं प्रकाश्यते ॥

सदाचार्यकटाक्षेण शरणागतस्य रहस्यत्रयार्थो नित्यभोग्य इति सत्वोत्तराणां सम्प्रदायः—रहस्यत्रयमिति श्रीमदष्टाक्षरो द्वयं चरमश्लोकश्च कथ्यते तत्र श्रीमदष्टाक्षरेण स्वस्वरूप परस्वरूपादिविज्ञानं प्राधान्येन क्रियते । तेन प्रतिबुद्धस्याधिकारिणः शरणागतिमन्त्रेण शरणागत्यनुष्ठानप्रकारः प्रकाश्यते–

अनेन मन्त्रेणानुष्ठेयस्य प्रपदनस्यापेक्षिताधिकारनैरपेक्ष्यादीनर्थान् विशदमेव प्रकाशयन् सर्वपापमोक्षणपूर्वक भगवत्प्राप्तिरूप पुरुषार्थोपायभूतां शरणागति कर्तव्यत्वेन विधाय न्यस्तभरमधिकारिणं निश्शोकयति चरमश्लोकः ॥

अत्र प्रथमरहस्यं पदत्रयात्मकं, द्वितीयं तु, पदषट्करूपं तृतीयं पुनर्द्वादशपदयुक्तमित्युत्तरोत्तरं पदद्वैगुण्यं द्रष्टव्यम् । अत्र त्रयाणां व्याख्येयव्याख्यानभावेन मिथोऽन्वयः प्रसिध्यति । तत्र श्रीमदष्टाक्षरस्य शेषशेपिसर्वतत्त्व कण्ठोक्त्या 'न मन्त्रोष्टाक्षरात्परः' इत्यादिप्रमाणसहस्रेणचाचार्यैर्विशेषतः संग्रहःक्रियते । इतरव्यापकमन्त्राभ्यामेतस्य मन्त्रस्यातिशयेनार्थविशेष प्रतिपादकत्वमन्त्रार्थप्रकाशनेनैव ज्ञाप्यते । विष्णुगायत्र्यामप्येतन्मन्त्राक्षरस्य प्रथमोपादानमेतत्प्रभावातिशयद्योतनार्थमिति मन्तव्यम् ॥

अयं च मन्त्रः यदा प्रणवेन साकमष्टाक्षरो भवति तदास्य वैदिकत्वं त्रैवर्णिकाधिकारत्वं च भवति । यदा प्रणवरहितत्वं तदा तान्त्रिकत्वं सर्ववर्णाधिकारत्वं च । तच्चोक्तम्—

वैदिकं ब्राह्मणानां स्याद्राज्ञां वैदिकतान्त्रिकम् ।
तान्त्रिकं वैश्यशूद्राणां सर्वेषां तान्त्रिकन्तु वा ॥

इति । इदं वचनं प्रायिकं ब्राह्मणप्राशस्त्यपरं शूद्राणां वैदिकानधिकारपरं च वैश्यस्यापि वैदिकेऽप्यधिकारात् । अन्यच्चाप्यत्र—

न स्वरःप्रणवोङ्गानि नाप्यन्यविधयस्तथा ।
स्त्रीणांतु शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ॥

इत्यादिवचनमनुसन्धेयम् । इयं चात्र स्वरव्यवस्था ।

षष्ठाद्ययोरुदात्तस्स्यात्स्वरितोन्त्याद्वितीययोः ।
प्रचयस्त्रिचतुर्थाभ्यां निहितं पञ्चमाक्षरम् ॥
उदात्तस्वर ओंकारः—

इति । कथं तर्हि प्रणववैधुर्ये मन्त्रस्याष्टाक्षरत्वं भवति । उच्यते—

तत्रोत्तरायणस्यादिर्बिन्दुमान्विष्णुरन्ततः ।
बीजमष्टाक्षरस्यस्यात्तेनाष्टाक्षरता भवेत् ॥

इति । इदं वचनं प्रणववैधुर्येऽप्यष्टाक्षरत्वमुपपादयतीत्यस्यार्थउपदेशादवाव

गम्यत इति विविच्य लिख्यते। यदात्वयं मन्त्रः प्रणवचतुर्थीविधुरः तदा प्रति लोमानामप्यधिकारो भवति। दृश्यते हि-

नमो नारायणेत्युक्त्वा श्वपाकः पुनरागमत्।

इति वराहपुराणवचनं तदा संकीर्तनमात्रत्वमेवेति न कश्चिद्विरोधः। अयं च मन्त्रः पदत्रयात्मक इति श्रुतिरेव विभज्य दर्शयति—'ओमित्येकाक्षरं, नम इति द्वे अक्षरे, नारायणायेति पञ्चाक्षराणि' इत्येवमादिका। तत्र प्रथमपदं अक्षरत्रयात्मकम्। अकारोकारमकारभेदात्। तत्र अकारस्सर्वकारणभूतं सर्व रक्षकं सर्वशेषिणं श्रियःपतिमाह। तथा हि-

समस्तशब्दमूलत्वादकारस्य स्वभावतः।
समस्तवाच्यमूलत्वाद्ब्रह्मणोऽपि स्वभावतः॥
वाच्यवाचकसम्बन्धस्तयोरर्थात्प्रतीयते।

इति। इदं वचनं सर्वशब्दकारणभूतोऽकारस्सर्ववाचककारणभूतं परमात्मानमाहेति वदति। अकारस्य सर्वशब्दकारणत्वं सर्ववेदमूलभूतप्रणवप्रकृतित्वात्। श्रूयते हि 'योवेदादौ स्वरःप्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यःपरस्समहेश्वरः' इति। अत्र प्रणवप्रकृतिरकारः। तथा च अकारप्रकृतिकत्वादकारविशिष्टस्य प्रणवस्य यःपरः यो वाच्यतया प्रधानः स महेश्वरः सनारायण इत्यर्थः। 'अकारो विष्णुवाचकः' इति नियमात्। 'अइति भगवता नारायणस्य प्रथमाभिधानमभिदधता किंनाम मङ्गलं नकृतम्' इति शाब्दिकैरभिधानाच्च। 'अक्षराणामकारोऽस्मि' इति भगवद्वचनाच्च। कथं तर्हि महेश्वरशब्दः प्रयुज्यते? महानीश्वरो महेश्वर इति श्रियःपतेरेवाभिधानमिति न विरोधः। अतएव 'तमीश्वराणां परमं महेश्वरं, तंदैवतानां परमं च दैवतम्' इति जगत्कारणत्वेन सम्प्रतिपन्ननारायणपरतया तत्रतत्र महेश्वरशब्दः प्रयुज्यते॥

एवंचसति इतरेषां तन्नामधारणात्तद्गुणलेशयोगित्वात्तच्छेषत्वाच्चेति सर्वमुपपन्नमेव। 'अकारोवै सर्वा वाक्' इत्यादीन्यपि वचनानि अकारस्य सर्वशब्दमूलत्वमाहुः। तेन भगवतस्सर्वकारणत्वसिद्धिः॥

ननु कथं नित्यानामीश्वरः कारणम्? इत्थम्। अनित्यास्तावत् अनित्येच्छयोत्पन्नाः नित्यास्तावत् अनित्येच्छया सिद्धा इति तत्तद्धर्मिग्राहकप्रमाणे-

रेवावगम्यते तदुक्तमभियुक्तैः—

इच्छातएव तव विश्वपदार्थसत्ता
नित्यं प्रियास्तवतु केचन तेहि नित्या ।

इति । अतः ईश्वरस्य सर्वकारणत्वसिद्धिः । तच्च कारणं त्रिविधम् । निमित्तोपादानसहकारिभेदात् । सङ्कल्पविशिष्टवेषेण निमित्तत्वम् । सूक्ष्मचिदचिद्विशिष्टवेषेण उपादानत्वम् । सहकारि भूतकालाद्यन्तर्यामितया सहकारित्वमिति विभागः । 'अवरक्षण' इति धातावकारमात्रावशेषतया व्युत्पन्नोऽयमकारस्सर्वरक्षकं श्रियःपतिमाह । इयमत्र व्युत्पत्तिः 'अवरक्षण' इत्यस्माद्धातोरन्येभ्योऽपि च दृश्यत इति क्विप्रत्यये कृते 'लोपो व्योर्वली' इतिधातेर्वकारस्य लोपे कृतेरेव पृक्तस्येति प्रत्ययवकारेच लुप्तेसति अइति व्यवतिष्ठते कृदन्तत्वेन कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां तादर्थ्ये विहितचतुर्थ्यैकवचने कृते आयइति भवति । पुनस्सुपांसुलुगिति सुब्लोपे कृते अइति (लु) चतुर्थ्यन्तं पालयितृत्ववाचिपदं भवति । दृश्यते हि—

लक्ष्म्यासह हृषीकेशो देव्या कारुण्यरूपया ।
रक्षकः सर्वसिद्धान्ते वेदान्तेषु च गीयते ॥

इत्यादि । तथाचसति एतन्मन्त्रविवरणरूपेण शरणागतिमन्त्रेण श्रियःपतित्वस्य कण्ठोक्तत्वादत्राप्युपयुक्तसहधर्मचारिणीसम्बन्धो ज्ञातव्य इयुक्तं भव। अतो रक्षकत्वमपि भवतीत्युक्तम् । 'ब्रह्मणेत्वा महस ओमित्यात्मानं युञ्जीत' इति प्रणव विवरणरूपे वाक्ये ब्रह्मण इति चतुर्थ्युत्पादनादत्रापि चतुर्थ्युत्पादयितव्या । सातु छान्दसत्वादत्र लुप्तेति मन्तव्यमित्युक्तं प्रागेव । तथा तादर्थ्ये चतुर्थी वक्तव्येति मकारवाच्यस्य जीवस्य अकारवाच्यपरमात्मापेक्षया तादर्थ्यं प्रतीयते । अतो भगवतश्शेषित्वं सिद्धं भवति । तादर्थ्यमेव शेषत्वं शेषत्वप्रतिसम्बन्धी शेषीत्यभिधीयते । अत्र प्रमाणानि—'पतिं विश्वस्यात्मेश्वरम्' 'अस्या ममच शेषंहि विभूतिरुभयात्मिका ।'

इत्येवमादीनि स्वयमेवानुसन्धेयानि । 'उभयाधिष्ठानंचैकं शेषित्वम्' इत्यच पूर्वेषां वचनम्, अस्यार्थः । यथा पुत्रापेक्षया मातापित्रोर्द्वयोरप्येकं शेषि

यथा च । पत्न्यपेक्षया भर्तुश्शेषित्वात्पितुरेव सर्वशेषित्वं । एवमस्मदपेक्षया दिव्यदम्पत्योश्शेषित्वमेकमेव । परस्परविचारे लक्ष्म्यपेक्षया भर्तुर्भगवत एव शेषित्वमिति स्वव्यतिरिक्तसर्वशेषित्वं भगवतएवेति सिद्धं भवति । लक्ष्म्यास्तु एको न सर्वशेषित्वमुक्तम् । तदुक्तमाचार्यैः—

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥

इति । तत्र भगवच्छास्त्रोक्तानि बहूनि प्रमाणान्यनुसन्धेयानि । तथा हि विष्वक्सेनाय भगवानाह—

परव्यूहादिकान् पंचप्रकारानात्मनो वदन् ।
तथा लक्ष्म्याः प्रभावं च वक्ष्ये शृणु समाहितः ॥
गुणतश्च स्वरूपेण व्याप्तिः साधारणी मता ।
यथा मया जगद्व्याप्तं स्वरूपेण स्वभावतः ॥
तया व्याप्तं जगत्सर्वं नियन्त्रीच तथेश्वरी ।
मया व्याप्ता यथा साहि तया व्याप्तोऽहमीश्वरः ॥
मम तस्याश्च सेनेश वैलक्षण्यमिदं शृणु ।
मच्छेषभूता सर्वेषामीश्वरी वल्लभा मम ॥
तस्याश्च जगतश्चाहमीश्वरो वेदविश्रुतः ।
अस्या मम च शेषं हि विभूतिरुभयात्मिका ॥
इति श्रुतिशिरस्सिद्धं मच्छास्त्रेष्वपि मानद ।
तथा भूमिश्च नीळाच शेषभूते मते मम ॥
यथाऽत्मनां तु सर्वेषां ज्ञानतो व्याप्तिरिष्यते ।
स्वरूपतस्तु न तयोर्गुणतो व्याप्तिरिष्यते ॥

इति । अस्मिन्नेव शास्त्रे तन्त्रान्तरे लक्ष्मीवाक्यम् ।

अहन्ता ब्रह्मणस्तस्य साहमस्मि सनातनी ।
आत्मा ससर्वभूतानामहं भूतो हरिस्स्मृतः ॥
अहन्ता सर्वभूतानामहमस्मि सनातनी ।
येन भावेन भवति वासुदेवस्सनातनः ॥
भवद्भावात्मकं ब्रह्म ततस्तच्छास्त्रगं परम् ।

भवान्नारायणो देवो भावो लक्ष्मीरहं परा ॥
लक्ष्मीनारायणाख्यं तदतो ब्रह्म सनातनम् ।
अहं तया समाक्रान्तो ह्यहमर्थःप्रसिध्यति ॥
अहमर्थस्समुग्धाच सा हन्ता परिकीर्तिता ।
अन्योन्येनाविनाभावादन्योन्येन समन्वयात् ॥
तादर्थ्यं विद्धि सम्बन्धं मम नाथस्यचोभयोः ।

इति । न केवलं भगवच्छास्त्रएवैतदुच्यते । इममर्थं पराशरोऽपि व्यक्तमुक्तवान्

नित्यैवैषा जगन्माता विष्णोश्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥
त्वया च विष्णुनाचाम्ब जगद्व्याप्तं चराचरम् ।

इति च । तत्रैवमेतत्सर्वमभिप्रेत्योक्तं प्रपन्नपारिजाते प्राक्तनाचार्यैः । अयं च शेषशेषिभावः,

दासभूतास्स्वतस्सर्वेह्यात्मानःपरमात्मनः । इति
स्वोज्जीवनेच्छा यदिते स्वसत्तायां स्पृहा यदि ।
आत्मदास्यं हरेस्स्वाम्यं स्वभावं च सदा स्मरेत् ॥

इति वचनात्स्वाभाविकः । उपाधिनिर्देशाभावाच्च । तथा चतुर्थ्याः शेषत्वस्यायोगव्यवच्छेदः प्रतिपाद्यते । उपाधिनिर्देशाभावाच्च । तेन शरीरात्मभावोऽपि सिद्धो भवति । 'यस्य चेतनस्य यद्द्रव्य शेषतैकस्वरूप तत्तस्य शरीरम्' इति-भाष्यकारा निरणैषुः । अनेन चेतनं शरीरमेव भवति ईश्वरश्शरीर्येव भवति चेतनस्तु शरीरं शरीरी च भवतीति विभागो द्रष्टव्यः । स्वस्य भगवच्छेषत्वे सिद्धे स्वसम्बन्धिनां सर्वेषां तच्छेषत्वं कैमुतिकन्यायसिद्धमिति विशेषेण नालिख्यते । पूर्वं तावच्चतुर्थ्यायोगव्यवच्छेदेन सिद्धं शेषत्वम् अन्ययोगव्यवच्छेदेन नियमयत्युकारः । उकारस्यावधारणार्थत्वात् अस्यचावधारणार्थत्वं श्रुतिप्रयोगादेवावगम्यते 'तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचन्द्रमाः' इत्यादिवाक्येषु एवकारस्थाने उकारस्य प्रयोगात् । अनेन देवतान्तरवर्जनमपि सिद्धं भवति । इदं च देवतान्तरवर्जनं तदीयवर्जनपर्यन्तमेव । तदीयानां भगवति साम्याधिक्यादि विप्रतिभूयस्त्वेनात्यन्तवर्जनीयत्वात् । यथा भगवच्छेषत्वं भागवतशेषत्वपर्यन्तमुपपादयिष्यते । तद्वदिदमपि देवतान्तरवर्जनं तदीयवर्जनपर्यन्तमेव । अत्रच

अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः ।
मामेव शरणं प्राप्तास्ते मद्भक्ताःप्रकीर्तिताः ॥
ब्रह्माणं शितिकण्ठं च याश्चान्या देवतास्स्मृताः ।
प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥
नचान्यदेवताभक्तिमापत्स्वपि समाचरेत् ।
अवैष्णवनमस्कारादवमानाच्च केशवे ॥
वैष्णवे परिवादाच्च पतत्येव न संशयः ।

इत्यादीन्यनुस्सर्तव्यानि । नच नित्यनैमित्तिकानुष्ठानेषु देवतान्तरसंसर्गप्रसङ्गः तत्रापि तदन्तर्यामिणः परमात्मन एव प्रतर्दनविद्यान्यायेन सर्वकर्मसमाराधनीयत्वात्तासां देवतानां कञ्चुकतुल्यत्वमित्यविरोधः । इदंचावश्यककर्तव्य नित्य नैमित्तिकमात्रविषयमिति नातिप्रसङ्गः । अन्यथा 'ब्रह्म दाशा' इत्यादि वचनेन सर्वेषामपि नन्तव्यत्वप्रसङ्गात् ॥

एवं साधारणं निरूपितस्य शेषत्वस्याश्रयभूतजीवस्वरूपं मकारेण प्रतिपाद्यते । सच मकारः 'मनज्ञाने—मनअवबोधने' इति धातौ अस्मच्छब्दे वा 'माङ्माने—मसपरिमाणे' इत्यत्र वा छान्दसप्रक्रियया लुप्तशेषो ज्ञान स्वरूपं ज्ञानगुणकमतएव प्रत्यग्रूपमणुपरिमाणमेतैरेव हेतुभिर्देहादिविलक्षणं जीवात्मानमाह । अत्रचैव व्युत्पत्तिः । 'मनज्ञाने' इत्यस्माद्धातोः उडादयो बहुलमिति वा, अन्येभ्योऽपि दृश्यत इति वा डप्प्रत्यये टिलोपे च कृते—म्—अ इति स्थिते 'प्रत्ययस्य बहुलं छन्दसी' इत्यलोपे कृते म्—इति भवति । कृदन्तत्वात्प्रातिपदिकसंज्ञायां प्रथमैकवचने कृते हलादिलोपे च कृते, म्—इत्येवावतिष्ठते । एवं 'मन अवबोधने' इत्यादिष्वपि द्रष्टव्यम् । उक्तंच यामुनाचार्यैः

देहेन्द्रियमनःप्राण धीभ्योऽन्योऽनन्यसाधनः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मभिन्नस्स्वतस्सुखी ॥

अनन्यसाधनः स्वयम्प्रकाशः अत्रचायं विभागःप्रतिपत्तव्यः । अहमहमित्यतीतानागतस्वप्नसुषुप्त्यादिसाधारणं यद्ज्ञानं तत्स्वरूपज्ञानमेव । अत्र सुप्तोऽहमीदृशोऽहंवेति सविशेषेणाहमर्थज्ञानं धर्मभूतज्ञानम् । तेन स्वतः परतश्चात्मा स्वस्मै भासते । स्वस्यैवात्र ज्ञातृत्वात् । परतएव परस्मै भासते परज्ञानेनैव परस्य प्रकाशमानत्वात् 'त्वामहं जानामि, त्वं मां जानासि' इत्युभ-

यत्रापि परज्ञानेनैव परःपरस्मै काशते। धर्मभूतज्ञानं नित्यविभूतिश्च स्वतःपरतश्च परस्माएव भासते द्वयोर्ज्ञानरूपत्वान्नित्यविभूतेर्ज्ञानस्य च स्वयम्प्रकाशत्वात्स्वतो भानं स्वरूपमात्रेण तयोस्सिध्यति। जीवगतधर्मभूतज्ञानेन नित्यविभूतेर्नानाविशेषणविशिष्टायाः प्रतिभानात्परतोऽपि ज्ञानेन भानं सिध्यति। स्वगतस्यातीतज्ञानस्य कालान्तरे ज्ञानान्तरेण भानात् तत्रापि परतोभानं परगतस्य ज्ञानस्य परगतज्ञानेन भानाच्च परतोभानम्। अन्यत्सर्वं परतएव परस्मा एव भासते प्रकृतिः काल उभयमपि जीवेश्वरगतधर्मभूतज्ञानेन परेण परयोरेव जीवेश्वरयोर्भासतइत्यर्थः। एतत्तु गुणक्रियादिष्वद्रव्येष्वपि समानम् इत्थमेव-प्रकाशमानत्वं पदार्थानामित्याचार्याः॥

एकदेशिनस्तु नित्यविभूतेर्न ज्ञानत्वम्। 'स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्' इत्येतदप्युज्वलतामात्रेणेत्याचक्षते। तत्तु 'किमात्मिका भगवतो व्यक्तिः। यदात्मको भगवान्। किमात्मको भगवान्। ज्ञानात्मको भगवान्' इति निरूपितवाक्यविरुद्धत्वान्नपरिगृह्यते परैः। यथा सम्प्रदायं यथा प्रमाणं चावगम्यतामधिकनिपुणैः॥

अस्यायमर्थः। आत्मा स्वतः परतश्च स्वस्मै भासमानः धर्मभूतज्ञानं नित्यविभूतिश्च स्वतःपरतश्च परस्मा एव भासते। इतरस्सर्वं परस्माएव भासते आत्मा स्वतःपरतश्च परस्मै भासमानः परतएव परस्मै भासते। धर्मभूतज्ञान नित्यविभूत्योर्विषयित्वतदभावाभ्यां मिथो वैषम्यम्। नित्यविभूतेस्स्वयम्प्रकाशे 'स्वसत्ताभासकं सत्त्वं गुणसत्वाद्विलक्षणम्।' इत्यादिकं प्रमाणजातमनुसन्धेयम्॥

अत्राजडश्रुतिरपि। 'किमात्मिका भगवतो व्यक्तिः। यदात्मको भगवान्। किमात्मको भगवान् ज्ञानात्मको भगवान्' इति। व्यापीति सर्वाचेतनान्तःप्रवेशसामर्थ्यमेवाभिधीयते। नतु विभुत्वम् 'एषोऽणुरात्मा चेतसा वेदितव्यः। आराग्रमात्रोह्यवरोऽपि दृष्टः' इत्यादिश्रुतेः। भगवच्छास्त्रे ककारादि मकारान्तानामक्षराणां पंचविंशतितत्त्ववाचकत्ववचनात्। 'मकारं जीवभूतं तु शरीरे व्यापकं न्यसेत्' इति साक्षात्कण्ठोक्त्या च मकारस्य जीववाचकत्वं सिद्धम्। अनेन च प्रकृतिपरिणामित्वाद्देहस्य तद्वैलक्षण्यमात्मनउक्तम्भवति; अत्र च 'मकारो जीववाचकः' इत्यादिवचनान्तरमपि स्वयमेवानुसन्धेयम्॥

"ओमित्यात्मानं युञ्जीत" इत्यत्रोक्तात्मशब्दः, मकारस्य जीववाचकत्वे प्रमाणं परिशिष्यते। अयमत्र वाक्यार्थः ज्ञानस्वरूपो ज्ञानगुणकः प्रत्यग्रूपोऽणुपरिमाणः ततएव देहादिविलक्षणश्चाहं सर्वकारणभूताय सर्वरक्षकाय सर्वशेषिणे श्रियःपतयएव स्वाभाविकशेषभूत इत्येकायोजना। अत्राहमिति सर्वेषामात्मनामुपलक्षणम्—

अकारेणोच्यते विष्णुस्सर्वलोकेश्वरो हरिः।
उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा॥
मकारस्तु तयोर्दास इति प्रणवलक्षणम्।

इति योजनान्तरेत्वत्ववधारणमार्थं मन्तव्यम्। एवंचोक्तार्थस्य प्रणवस्याक्षरार्थवाक्यार्थौ 'मम नाथ' इत्यादि यामुनाचार्यवाक्येऽपि यथास्थानमनुसन्धेयौ। अत्रतु यथास्थानमर्थपञ्चकं तत्त्वत्रयं च शाब्दमार्थंचावगन्तव्यं बुद्धिमद्भिः॥

एवंचान्यशेषत्वे निवृत्ते तत्प्रतिपादकमध्यमाक्षरविवरणरूपतया स्वस्य स्वशेषत्वादि निवृत्तिमुखेन नमस्सम्बन्धः। मइति मकारे षष्ठी। नेति निषेधः प्रणवतृतीयाक्षरन्त्वनुषज्यते। नमः अहं मम नेति। एवंचाहमपि नममेत्युक्तं भवति। 'आत्मापि चायं नमम' इतिहि वदन्ति॥

ननु कथं स्वस्य शेषत्वप्रसक्तिः। उच्यते—यथाखलु परेषामतिशयाधायकश्शेषः परश्शेषीति व्यवह्रियते। एवं स्वात्मानमलङ्कुर्वाणस्स्वकृतालङ्कारफलाधारतया शेषी स्वालङ्कारकर्तृतया शेषइति व्यवहर्तुमुपाधिभेदाच्च शक्यते। तादृशीमप्याशङ्कां निवारयितुं स्वशेषत्वानिवृत्तिः प्रतिपाद्यते॥

एतदुक्तं भवति। 'स्वस्य स्वेनाप्याधीयमानोऽतिशयो राजदाराद्यलङ्कारवत्परशेषतयैव क्रियते' इति। आहुश्च। 'भुङ्क्ते स्वभोगमखिलं पतिभोगशेषम्' इति। अथवा मध्यमाक्षरएवान्यशेषत्वस्य निवृत्तत्वात्स्वस्याप्यन्यत्वेन स्वशेषत्वमपि गर्भस्रावेण गतमिति किंचिदिति पदान्तराध्याहारेण न मम किंचिदिति स्वसम्बन्धि देहेन्द्रियपुत्राद्यपेक्षया स्वस्य निरुपाधिकशेषित्वमत्र निषिध्यते॥

यद्वा—सर्वेषामपि पदार्थानां भगवच्छेषत्वस्य प्रणवएव स्वतस्सिद्धत्वात्पुत्रादीनामपि स्वापेक्षया स्वाभाविकशेषत्वं प्रागेवार्थतो निषिद्धमिति स्वस्वा

तन्त्र्यादिकमत्र निषिध्यते । नमम कुत्रापि निरपेक्षकर्तृत्वादिकमिति । एवं च सति प्रणवे शेषत्वप्रतिपत्तिः इह पारतन्त्र्यप्रतिपत्तिरिति विभागः ॥

अयं चात्र विशेषो बोद्धव्यः । कारणत्वं तत्त्वत्रयसाधारणम् । कर्तृत्वं जीवेश्वरसाधारणम् । स्वाधीनकर्तृत्वमीश्वरस्यासाधारणम् । पराधीनकर्तृत्वं जीवस्यासाधारणम् । व्यापाराश्रयत्वमात्रंतु कर्तृत्वमचेतनेऽप्युपचर्यते 'रथो गच्छति' इति । एवं च कर्तृत्वं प्रेरकत्वम् । अनुमन्तृत्वमुदासीनत्वम् । साक्षित्वं सहकारित्वम् । फलित्वं फलप्रदत्वम् । इत्येतेऽर्था भगवतः प्रतिपन्नाभवन्ति तत्र जगदुत्पत्यादिषु सर्वेष्वपि कार्येषु ज्ञानचिकीर्षाप्रयत्नवत्वात्कर्तृत्वम् । कर्तृभूत जीवप्रवर्तकत्वात्प्रेरकत्वम् । स्वकर्मानुरूपंप्रवृत्तानामुत्तरोत्तरं प्रवर्तकत्वादनुमन्तृत्वम् एतेष्वेव स्वकर्मानुरूपेषु सुखदुःखादि कार्येषु बीजानुगुणमुत्पद्यमानेष्वङ्कुरेषु जलस्येव सामान्यकारणत्वे सम्भवत्यपि विशेषकारणत्वाभावादुदासीनत्वम् । सर्वसाक्षाद्द्रष्टृत्वात्साक्षित्वम् । सामग्र्यनुप्रविष्टैश्चेतनाचेतनात्मकैस्सहकारिवर्गैस्सह स्वयमेव सर्वकार्यकर्तृत्वात्सहकारित्वम् । सर्वशेषित्वेन सर्वस्यापि फलस्य भृत्यसंरक्षणादिन्यायेन स्वपर्यवसानात्फलित्वम् । 'फलमतउपपत्तेः' इत्युक्तप्रक्रियया सर्वकर्मसमाराधनीयस्य स्वस्यैव साक्षात्सर्वफलहेतुत्वात्फलप्रदत्वमिति । सर्वमप्येतद्गुणजातमाकारभेदादेकस्मिन्नेव भगवति योयुज्यत इति हृद्यं निरवद्यं च ॥

एवं च सर्वदा सर्वप्रेरकस्यापीश्वरस्य उपेक्षकत्वानुमन्तृत्वादिवचनानां तत्तदाचार्यग्रन्थेषु दृष्टानां विरुद्धवत्प्रतिभासमानानां स्वयमेवाविरोधो बुद्धिमद्भिर्बोद्धव्य इत्यस्माभिरुपरम्यते ॥

ननु कथं शेषत्वात्पारतन्त्र्यमतिरिच्यते ? इत्थं यथेष्टविनियोगार्हत्वं शेषत्वम् । यथेष्टविनियुज्यमानत्वं पारतन्त्र्यमिति । आहुश्च—

यथेष्टविनियोगार्हं शेषशब्देन कथ्यते ।
ईश्वरेण जगत्सर्वं यथेष्टं विनियुज्यते ॥

इति । एवं शेषत्वदासत्वयोरपि मात्रया भेदोऽनुसन्धेयः । परगतातिशयाधानेच्छयोपादेयस्वरूपत्वमेव शेषत्वम् । शेषत्वप्रतिपत्त्यर्हत्वेसति तदेव शेषत्वं दासत्वमित्यभिधीयते । ततश्च चेतनाचेतनसाधारणं शेषत्वम् । चेतनैकान

दासत्वमित्यलमतिविस्तरेण । एवं पारतन्त्र्ये प्रतिपन्ने भगवत्परतन्त्रतया शिक्षितस्वरूपस्य शेषभूतस्य चेतनस्य यथाधिकारं भगवत्प्रवर्तितेन केनाप्युपायेन तद्वशीकरणस्य कार्यत्वाद्भगवन्मूला शरणागतिरप्यर्थसिद्धा ॥

भागवतःशेषत्वमपि ततएवार्थसिद्धं भवति । यथाखलु राजानः प्रियतमेषु पुत्रादिषु स्वशेषभूतं सकलमपि स्वेच्छयैव शेषतया विनियुंजते । एवं भगवच्छेषत्वपारतन्त्र्याभ्यां भगवतैव यथेष्टं विनियुज्यमानस्य भागवतशेषत्वमपिसिद्धं भवति ॥

अभिमतं खलु भगवच्छेषत्वादपि भागवतशेषत्वं भगवतएव । अत्रच—

मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत् ।
तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषतः ॥
आराधनानां सर्वेषां विष्णोराराधनंपरम् ।
तस्मात्परतरं प्रोक्तं तदीयाराधनं परम् ॥

इत्येवमादीनि पठ्यानि । अत्र भागवतशब्देन भगवच्छेषत्वज्ञानरसिकाः परमैकान्तिनोऽभिधीयन्ते । न केवलमीशेशितव्यज्ञानवन्त इति नातिप्रसङ्गः । तेन भागवतशेषत्वपर्यन्तभगवच्छेषत्वज्ञानरसिकाः परमैकान्तिनो भागवताइत्युक्तम्भवतीति सर्वं रमणीयम् ॥

अतस्सूक्ष्मयोजनायां स्वस्य स्वशेषत्वनिवृत्तिः, स्वापेक्षयाऽन्येषां स्वाभाविकशेषत्वनिवृत्तिः, स्वस्वातन्त्र्यनिवृत्तिः, साध्योपायविशेषप्रपत्तिः, भागवतशेषत्वंचेत्येते पंचाप्यर्थाः प्राधान्येन प्रतिपाद्यन्ते । अन्येऽपि तदनुषङ्गिणोऽप्यर्थास्स्वयमेव प्रतिपत्तव्याः । स्थूलयोजनायांतु नम इति शरणागतेर्वचनम् । 'गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभाः ।' इति शरणागतिविधाने 'द्रौपद्या सहितास्सर्वे नमश्चक्रुर्जनार्दनम्' इति नमसः प्रयोगादात्मभरसमर्पणे नमसः प्रयोगो युज्यतएव । 'नमश्शब्दःप्रदानार्थस्वाहाशब्दइवेष्यते ।' इति वचनाच्च । एवं स्वरूपसमर्पणं प्रणवे, भरसमर्पणं नमसीति भिदा । इदं च भरसमर्पणं 'मामेकं शरणं व्रज' इति विधीयते । स्वरूपसमर्पणं तु तत्वज्ञानसम्पादनान्तर्गतत्वात् । 'अथवा किन्नु समर्पयामिते' इति कृतमपि प्रतिषिध्यते अतो न भरसमर्पणप्रतिषेधः । फलसमर्पणं पश्चाद्भविष्यति । तथाच

शरणागतिस्वरूपप्रतिपादकं नमःपदमिति स्थूलयोजनायां निर्वाहः । परयोजनायां तु प्रधानोपायभूतो भगवानेव नमःपदेन प्रतिपाद्यते । उक्तं च—

पन्था नकार उद्दिष्टो मःप्रधानउदीर्यते ।
विसर्गःपरमेशस्तु तस्यार्थोऽयं निरूप्यते ॥
अनादिःपरमेशस्तु शक्तिमानच्युतःप्रभुः ।
स्वप्राप्तये प्रधानोऽयं पन्था नमननामवान् ॥

इति । एवं त्रिभिर्योजनाभेदैर्भगवदपेक्षया जीवस्य पारतन्त्र्यादिकं साध्योपायभूता प्रपत्तिः, सिद्धोपायभूतो भगवांश्च प्रतिपाद्यते । अत्राप्यर्थपञ्चकं तत्त्वत्रयं च यथास्थानमनुसन्धेयम् ॥

तृतीयपदन्तु अकारवाच्यमेव नारायणं नेतृत्वादिमुखेन विशदयितुं मकारवाच्यं जीवं नित्यत्वादिमुखेन विशेषतःप्रतिपादयितुं नमःपदे प्रतिपन्नसिद्धोपायस्वरूपं यथावदवबोधयितुं प्रवृत्तं सत् पूर्वोक्तस्य साध्योपायस्य फलभूतं भगवन्तं भगवदनुभवजनितप्रीतिकारिताशेषावस्थोचिताशेषशेषवृत्तिरूपकैङ्कर्यात्मकं च साध्यफल प्रकाशयति । 'नृनय' इति धातावच्प्रत्यये कृते नरशब्दस्य व्युत्पत्तिः । तथा च भगवतः सर्वनेतृत्वमुक्तम्भवति । 'जह्नुर्नारायणो नरः' इति भगवद्वाचकोऽयं शब्दः ॥

अथवा 'रिङ्क्षय' इति धातौ डप्रत्ययमुत्पाद्य, रइति व्युत्पन्ने सति नग नैकादिशब्दवन्नसमासे कृते नर इति भवति । तथा च भगवद्वाचकत्वं सिद्धं भवति । चेतनाचेतनयोस्स्वभावस्वरूपाभ्यामन्यथाभावेन क्षयिष्णुत्वमस्ति । ईश्वरस्य तदुभयाभावान्नरत्वं युज्यते । एवं च नरसम्बन्धिनो नारा इति वा 'नराज्जातानि तत्त्वानि नाराणीति ततो विदुः' इति वा तद्धितप्रत्ययमुत्पाद्य चेतनाचेतनं विश्वं नारशब्देनाभिधीयते । एवं स्वभावान्यथाभावे सत्यपि स्वरूपान्यथाभावाभावान्नरशब्देन जीव उच्यते । तत्सङ्घाता नाराः सङ्घातस्य बहुत्वाद्बहुवचनमाचार्यैरभिधीयते ॥

एवं च नारशब्देव्युत्पन्ने ल्युडंतेनायनशब्देनसह समासो द्विविधः । बहुव्रीहिस्तत्पुरुषश्चेति । यदा तत्पुरुषस्तदा नाराणामयनमिति विग्रहः । यदा बहुव्रीहिस्तदा नाराण्ययनानि यस्येति विगृह्यते । ल्युडन्तोऽयमयनशब्दःकरणे

कर्म अधिकरणंचाप्याह । अनेनैवायमेवास्मिन्नेव नारैरिय्यतइति । अत्रचा-यनशब्दं व्युत्पादयति । 'इणगतौ' इतिधातोः 'करणाधिकरणयोश्च' इति विहितस्य ल्युप्रत्ययस्य 'युवोरनाकौ' इत्यनादेशे कृतेसति गुणायादेशयोः कृतयो रयनमिति सम्पद्यत इति ॥

अथवा 'अयपयगतौ' इत्यत्र व्युत्पन्नो द्रष्टव्यः । तथा च तत्पुरुषसमासे भगवन्तं नाराणामयनमिति नारायणं जीवानामुपायमुपेयं धारकं च प्रतिपद्यामहे । बाहुळकाल्लिङ्गव्यत्ययः अचेतनानां पुनराधारत्वमेव । उपायोपेयत्वयोश्चेतनविषयत्वात् । बहुव्रीहौ तु नारं चेतनाचेतनात्मकं विश्वं यस्यायनं व्याप्यं संस्थानं वेति विग्रहात्सर्वव्यापकत्वं सर्वान्तर्यामित्वं च भगवत इत्युक्तम्भवति ॥

द्विविधंखलु भगवतोऽन्तर्यामित्वम् । परव्यूहविभवान्तर्याम्यर्चावतारप्रक्रियया हृत्पुण्डरीकमध्यवर्तिना विग्रहेण कश्चित्प्रकारः । अयमेव 'नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा' इत्यादि श्रुत्या च प्रतीयते । प्रकारान्तरन्तु चेतनाचेतनविभागाभावेन सर्वेष्वपि वस्तुषु प्रेरकतया भगवत्स्वरूपस्य सन्निहितत्वम् । इत्थं द्विविधमप्यन्तर्यामित्वं भगवतश्श्रीनिवासस्य 'शान्तानन्त' इत्यादिना प्रतिपन्नस्वरूपस्य वासस्थानवाचिनाऽयनशब्देन बहुव्रीहौ विवक्ष्यते । अर्थान्तराण्यपि बहूनि विद्यमानानि विस्तरभयादत्र न लिख्यन्ते ॥

अयमत्र विभागः । प्रणवे रामानुजमिति भगवच्छरीरभूतस्वात्मप्रतिपादनम् । नारायणपदे बहुव्रीहौ स्वात्मशरीरकपरमात्मप्रतिपादनम् । तत्पुरुषे तु स्वाधारादिरूपपरमात्मप्रतिपादनम् । अत्र च 'लक्ष्मणपूर्वजम' चेति वचनदृष्टान्ततया अनुसन्धेयमिति ॥

इदचात्र बोध्यम् । शरीरात्मभावलक्षणेषु आधेयत्वविधेयत्वशेषत्वेषु शेषत्वं प्रणवे, विधेयत्वं नमसि, आधेयत्वं नारायणपदे इति । अयनशब्देऽप्यधिकरणव्युत्पत्त्या भगवतस्सर्वाधारत्वं प्रतिपाद्यत इति पूर्वमेव प्रत्यपादि ॥

अत्रचोक्तमिदमनुसन्धानद्वयं वेदान्तेष्वपि दृश्यते । परमात्मशरीरभूतस्वात्मानुसन्धानेन स्वशरीरकपरमात्मानुसन्धानेन च ब्रह्मविद्याविभागस्य भाष्यकारैरेव प्रतिपादितत्वात् । नारायणपदस्थचतुर्थीविभक्त्या तादर्थ्यस्य प्रणव एव सिद्धत्वात्तादर्थ्यफलभूतं सर्वदेश सर्वकाल सर्वावस्थोचितसर्वविधकैङ्कर्य

प्रार्थ्यते । न खल्वकिंचित्करस्य शेषत्वं युज्यते । 'नाकिंचित्कुर्वतश्शेषत्वम्' इति हि तान्त्रिकाः ॥

अत्र फलदशायामनुभवकैङ्कर्ययोः स्वाधीनभोक्तृत्वं स्वार्थभोक्तृत्वं स्वाधीनकर्तृत्वं स्वार्थकर्तृत्वमित्येवंरूपस्य विरोधिनःपुरुषार्थान्तरेषु दृष्टप्रसङ्गस्य निराकरणाय प्रणवनमसोश्शिक्षित भगवच्छेषत्वं तत्पारतन्त्र्यचानुसन्धेयम् ॥

अतएव शरणागतिमन्त्रोत्तरखण्डे नमश्शब्दः प्रयुज्यते । वाक्यार्थस्तु अकारवाच्यनारायणायैवाहं शेषभूतः नममेति श्रीमदष्टाक्षरस्य कार्त्स्न्येन स्वरूपपरत्वमित्येका योजना । अपरातु प्रणवस्यैव स्वरूपपरत्वं द्वितीयतृतीयपदयोरनिष्टनिवृत्तिप्रार्थनायामिष्टप्राप्तिप्रार्थनायां च तात्पर्यमिति ॥

तत्र वाक्यार्थः । अकारवाच्याय श्रियःपतयएवाहं शेषभूतः । नमम किंचित्स्यात् नारायणायैव कैङ्कर्यं भवेदिति । तथा योजनान्तरमपि प्रणवनमसोस्स्वरूपपरत्वं तृतीयपदस्य पुरुषार्थपरत्वमिति तत्र पूर्वेषामेकःश्लोको लिख्यते

अकारार्थायैव स्वमहमथमह्य ननिवहा
नराणां नित्यानामयनमिति नारायणपदम् ।
यमाहास्मैकाल सकलमपि सर्वत्र सकला-
स्ववस्थास्वाविस्युर्मम सहजकैङ्कर्यविधयः ॥

इति । वेदान्ताचार्यैस्तु वेदान्तक्रमेण तत्त्वहितपुरुषार्थात्मकास्त्रयोऽप्यर्थाः पदत्रयेण क्रमेणात्र प्रतिपाद्यन्त इत्यभिधीयन्ते । सर्वकारणभूताय सर्वरक्षकाय सर्वशेषिणे श्रियःपतयएवाहमनन्यार्हनिरुपाधिकशेषभूतः तच्चरणारविन्दयोरेवात्मात्मीयभरं न्यस्यामीति । नारायणायैव सर्वदेश सर्वकाल सर्वावस्थोचित सर्वविधकैङ्कर्याणि स्युरिति । एवंखलु तैरुक्तम्-

इत्थं रुङ्गटितःपदैस्त्रिभिरसावेकद्विपञ्चाक्षरैः
अर्थैस्तत्त्वहितप्रयोजनमयैरध्यात्मसारैस्त्रिभिः ।
आद्यस्त्र्यक्षरवेदसूतिरजहत् स्थूलादिवृत्तित्रयः
त्रैगुण्यप्रशमं प्रयच्छतिसतां त्रय्यन्तसारो मनुः ॥

इति । अत्र अर्थपंचकानुसन्धानमपि नारायणपदे मन्त्रे च सर्वत्राप्यनुसन्धेयम् उक्तं तदप्याचार्यतातपादैः-

आदौ प्राप्यं परममनघं प्राप्तृरूपंच मादौ
इष्टोपायन्त्वयननमसोरीप्सितार्थं चतुर्थ्याम् ।
तद्याघातं ममकृति गिरिव्यञ्जयंतं मनुन्तम्
तत्प्रायं च द्वयमपि विदन् सम्मतस्सर्ववेदी ॥

इति । इहच अयनशब्देन सिद्धोपायः प्रतिपाद्यते । नमसातु साध्योपायः पर योजनायां सिद्धोपायश्च । एवं तेनैवायनशब्देन सिद्धप्राप्यं चतुर्थ्यातु साध्यप्राप्यमिति विभागः ॥

अत्र च प्रणवार्थस्वरूपविवरणतया प्राचीनैरपि विरचितं पद्यं पठ्यम्—

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृत्
मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।
उकारोऽनन्यार्हं नियमयति सम्बन्धमनयोः
त्रयीसारस्त्र्यात्मा प्रणवइममर्थं समदिशत् ॥

इति तदुपकरणं वैष्णवमिति स्वस्य भगवच्छेषत्वे प्रतिपादिते स्वकीयस्यार्थस्य भगवच्छेषत्वमर्थादेव सिद्धमित्येषा दिक् ॥ विस्तरस्तु श्रीमद्रहस्यत्रयसारादि परिश्रमशालिनां सुलभ इत्यत्रोपरम्यते इति सर्वं रमणीयम् ॥

श्रीमदष्टाक्षरस्यार्थं श्रोतॄणां प्रतिपत्तये ।
प्राचीकशदविस्तारं त्रैयन्ताचार्यनन्दनः ॥

इति विश्वामित्रकुलोद्भूतेन निखिलकवितार्किकचूडामणिना

सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना

कुमारवेदान्ताचार्येण विरचिते

श्री म द्र ह स्य त्र य सा रा र्थ सं ग्र हे

मूलमन्त्राधिकारः प्रथमः

श्रीमते निगमान्तमहागुरवे नमः

अथ द्वयाधिकारः

शरणागतिमन्त्रस्य व्याख्या प्रारभ्यतेऽधुना ।
विश्वामित्रकुलोद्भूत वरदार्येण धीमता ॥

इत्थं श्रीमदष्टाक्षरेण शिक्षितस्वस्वरूपस्याधिकारिणः कर्तव्यमुपायम् अनुष्ठेयार्थप्रकाशनमुखेन विशदीकुर्वन् सिद्धोपायभूतस्य भगवत उपायोपेयावस्थयोः उपयुक्तविशेषणभूत सहधर्मचारिणीसम्बन्धमपि प्रख्यापयन् शरणागतिमन्त्रः मूलमन्त्रार्थविशदीकरणाय व्याख्यायते । एतस्य मन्त्रस्य मूलमन्त्रव्याख्यानरूपत्वमर्थस्वभावात् भगवच्छास्त्रे मूलमन्त्रानुबन्धी शरणागतिमन्त्र इत्युपपादनाच्च अवगम्यते । अयं च मन्त्रः पूर्वोत्तरखण्डाभ्यामुपायोपेयात्मकार्थद्वयप्रकाशकत्वात् द्वयमित्याचार्यैरभिधीयते । अस्य च माहात्म्यं भगवच्छास्त्रे विस्तरेणानुसन्धेयम् ॥ तत्र श्रीशब्देन—

शृणाति निखिलान् दोषान् श्रीणाति च गुणैर्जगत् ।
श्रीयतेचाखिलैर्नित्यं श्रयते च परम्पदम् ॥

इत्यादिप्रमाणबलादाश्रितदोषान्निवारयन्ती, तद्गुणांश्च परिपक्वयन्ती पुरुषकारत्वेन तैराश्रीयमाणा तत्संरक्षणार्थं तमेव भगवन्तमाश्रित्य स्वयमपि सहधर्मचारिणीभवन्ती लक्ष्मीरभिधीयते । शृणोति श्रावयतीति च श्रीशब्दार्थो निरुच्यते । आश्रितानामार्तनादं स्वयमपि श्रुत्वा तत्संरक्षणार्थं तमेव भगवन्तं श्रावयन्तीत्यर्थः । अत्रोपायभूतस्य भगवतो विशेषणत्वेन पूर्वमपि पुरुषकारभूताया लक्ष्म्याः स्वीकारे नोपायद्वित्वप्रसङ्गः । विशेषणविशेष्ययोस्स्वरूपभेदेऽपि विशिष्टस्यैकत्वात् । विशेष्यस्यैव प्रधानत्वाच्च ॥

यथाखलूत्तरखण्डे लक्ष्म्या विशेषणत्वस्वीकारेऽपि नोपेयद्वित्वमिति भवन्तोऽप्यनुमन्यन्ते । तद्वत्पूर्वखण्डेऽपि नोपायद्वित्वम् । अत्र मतुपा नित्ययोगादिकमभिधीयते । नखलु सर्षपमात्रेणापि भगवत्स्वरूपस्य कदाचिदपि कुत्रापि सहधर्मचारिणीवैधुर्यं प्रमाणपदवीमधिरोहति ॥

अतएव निश्रीकब्रह्मवादनिरासः । ब्रह्मणः श्रीनिवासत्वेनैवहि परस्य ब्रह्मणः स्वरूपविशेषप्रतिपत्तिः भाष्यकारैरेव निर्णीता । ' यथा सर्वगतो विष्णु

तथैवेयं द्विजोत्तम ’ ‘ विष्णोरेषाऽनपायिनी ’ ‘ अनन्या राघवेणाहं भास्करेण प्रभा यथा ’ ‘ त्वयाच विष्णुनाचाम्ब जगद्व्याप्तं चराचरम् ’ ‘ शान्तानन्तमहाविभूतिपरमं यद्ब्रह्मरूपम् ’ इत्यादिकं प्रमाणशतमनुसन्धेयम् ॥

नारशब्देन समाश्रितसंरक्षणोपयुक्तगुणाः प्रख्याप्यन्ते । तेच कारुण्य स्वामित्व सौशील्य वात्सल्य सौलभ्यज्ञानशक्त्यादयः । तेषांच गुणानां नार शब्दवाच्यत्वम् । नरशब्दवाच्येन भगवता सम्बन्धात् तेषामयनं तदाधारइत्यर्थः । कृत्स्नस्यापि प्रपञ्चस्य नारशब्दवाच्यत्वेसत्यपि तावन्मात्रोपादानं रक्षणोपयिकगुणतयेति मन्तव्यम् ॥

तेषां स्वरूपं प्रदर्श्यते । स्वार्थनिरपेक्षा परदुःखनिराचिकीर्षा दया । येतु परदुःखदुःखित्वं दयेति वर्णयन्ति तन्मते निखिलहेयप्रत्यनीकतया निरूपितस्वरूपस्य भगवतः दुःखप्रसङ्गाभावेन दयास्वरूपमेवोच्छिद्यते । ‘ व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ’ इत्यादिकं समाश्रितानां स्वस्मिन्ननुराग विशेषसिद्ध्ये दुःखित्वाभिनयमात्रमेवेति सर्वाचार्याणां निर्वाह इति प्राचीनमेव दयालक्षणं भाष्यकाराभिमतमिति मन्तव्यम् ॥

दयाऽन्येषां दुःखाप्रसहनं ‘ दया परव्यसनहरा ’ इत्यादिकमत्रैव संवादः स्वामित्वं, सर्वशेषित्वम् । तच्च प्रागेवोक्तम् । सौशील्यं महतो मन्दैस्सह नीरन्ध्रसंश्लेषः । वात्सल्यं समाश्रितविषये दोषादर्शित्वम् । उक्तंहि ‘ यतो दोषं भक्तेष्विहवरदनैवाकलयसि ’ इति । सर्वज्ञस्य भगवतो दोषादर्शनवचनं तद्दर्शनस्यापि तन्निवारणोपयुक्तत्वज्ञापनार्थमिति न कश्चिद्विरोधः ॥

येत्वाश्रितदोषभोग्यत्वं भगवतो वात्सल्यमिति लक्षणमभिदधते तेषां भगवदपचार भागवतापचारासह्यापचाराणामुत्तरोत्तरं प्रवर्तनाभिसन्धिरेव तादृश व्यवहारकारणमिति मूर्खपरिगृहीतोऽयं वादः । तस्माद्भगवद्भागवताचार्यापचार भीरुरेव भागवतलक्षणपरिपूर्तिमानिति मन्तव्यम् । तस्माद्बुद्धिपूर्वापचारः परिहर्तव्यएव प्रपन्नाधिकारिभिः । तेन केषांचिद्दोषभोग्यत्ववचनं भागवतविषये भगवत्स्नेहातिशयप्रदर्शनार्थम् । अबुद्धिपूर्वापचारविषयत्वेतु तदश्लेषस्य सौत्रत्वात् यथाकथं चिदभिधीयताम् । सौलभ्यमाबालगोपालं प्रसिद्धम् । ज्ञान शक्त्यादयोऽपि प्रसिद्धाएव । अत्र कश्चिदाह यदि भगवत्कृपायास्स्वाभावि-

कत्वं कथमस्य संसारानुवृत्तिः । परदुःखनिराचिकीर्षारूपत्वात्तस्याः यदिच
पाधिकत्वं कथं निर्हेतुकत्वं तस्याः भावत्कैरुद्घुष्यत इति । अत्र वदामः । न
वयं तस्यास्सर्वदा निर्हेतुकत्वं ब्रूमः । नापि सहेतुकत्वम् । अपित्वाकारभेदे
निर्हेतुक सहेतुकपक्षसमुच्चयेन सर्वमप्यर्थमुपपादयामः ॥

तथाहि—नित्यसिद्धायास्तस्याहेत्वपेक्षायां नित्यत्वस्यैव व्याघातात
सामान्यतःपरदुःखनिराचिकीर्षा(रूपिणी)भगवत्कृपा तावन्निर्हेतुका । तथाऽ
तस्याः कार्योत्पादनानुकूलस्संस्तवस्सहेतुकः । यथा खलु सर्वकार्यहेतोर्भगव
नित्यत्वेऽपि तत्सहकारिसमवधानक्रमेण कार्योत्पादनक्रमस्सङ्घटते । एवं नि
रूपा भगवत्कृपा स्वयमवसरं वीक्षमाणा स्वाधीनसहकारिसमवधानेन स
रक्षतीति मन्तव्यम् । उक्तंचाचार्यैरेव —

मुकुन्दकरुणां वन्दे मुग्धेष्वधिकवत्सलाम् ।
स्वरूपसंस्तवौ यस्या निर्हेतुकसहेतुकौ ॥

इति। अयमर्थः भगवत्कृपा तावन्नित्यसिद्धा। 'अमुमहमिदानीं संरक्षाणि' इ
सङ्कल्पविशेषरूपा कादाचित्कदया कारणविशेषमपेक्षते। तच्च कारणं भगवत्स
ल्पान्तरायत्तम् । सच सङ्कल्पस्तेनैव कादाचित्कत्वेन कारणविशेषमपेक्षत इ
अनादिरयं प्रवाहस्सर्वैरपि सैद्धान्तिकैरपर्यनुयोज्यः। अतएव वैषम्यनैर्घृण्यादि
परिहियते ॥

एवं भगवत्कृपास्वरूपस्य नित्यसिद्धत्वान्न हेत्वन्तरापेक्षेति निर्हेतुकत्वम
तस्याएव कृपायाः प्रवृत्तिविशेषकार्यत्वात्कारणविशेषमपेक्षत इति प्रवृत्ति
शेषापेक्षया सहेतुकत्वं कादाचित्कत्वांत्तस्य हेतुवैधुर्ये तदेव कादाचित्क
व्याहन्येत । स्वभाववादपरिग्रहेतु सर्वशास्त्रव्याकोपः सार्वत्रिको व्याघात
प्रसज्येत । अतः कृपायास्स्वरूपे निर्हेतुकत्वम् । संस्तवेतु सहेतुकत्वम् । अ
यैव दिशा परस्परविरुद्धवदवभासमानानां प्रमाणवचसां प्रामाणिकाचार्यव
सांच अविरोधःप्रतिपत्तव्य इति । अत्र चरणशब्देन दासस्य स्वामिविष
चरणग्रहणमेव समुचितमिति प्रकाश्यते । नखलु राजभृत्या राजानं करग्र
णेन स्वाभिलषितार्थं प्रार्थयन्ते । अनतिलङ्घनीयं हि विशेषेण चरणग्रहण
त्यर्थोऽत्र भावनीयः । तथा च " नजातुमातुश्चरणौ जिहासति " इति या
नाचार्यैरभिहितम् ॥

किंच मातुर्हृद्याद्यवयवान्तरेषु सत्स्वपि स्तनन्धयस्य पुत्रस्य स्तनयोरुपजीव्यत्वम्। एवं शरणागतस्य भगवच्चरणारविन्दयोरेव भोग्यत्वमिति इममर्थं प्रकाशयति चरणशब्दः। श्रूयतेहि 'विष्णोःपदे परमे मध्वउत्सः' इति। अत्र चरणशब्देन उपायत्वमभिधीयते—

उपाये गृहरक्षित्रोश्शब्दश्शरणमित्ययम्।
वर्तते साम्प्रतंत्वेष उपायार्थैकवाचकः॥

इति वचनात्। अत्र चरणयोरुपायत्वाभिधानं चरणविशिष्टस्य भगवत उपायत्वे पर्यवस्यतीति अयंच न्यायः उपायविशेषणतयोपादीयमानेषु गुणेष्वपि तुल्य इति मन्तव्यमन्तेवासिभिः। अतोऽत्रापि नोपायद्वित्वप्रसङ्गः। अत्र नित्यान्वयि विशेषणम्। कादाचित्कमुपलक्षणम्। यथा 'प्रकृष्टप्रकाशश्चन्द्रः' 'काकवद्देवदत्तस्य गृहम्' इति, तेनात्र श्रीमच्छब्दाद्युपात्तानामर्थानां विशेषणत्वमेव सर्वेषां तेषां कार्यान्वयित्वात्। प्रपद्यइति महाविश्वासोऽभिधीयते। प्रशब्देन प्रकर्षाभिधानात् 'पद्लृगतौ' इति धातोर्गत्यर्था बुध्यर्था इति न्यायेन बुद्धेरभिधानात् बुद्धेश्चाध्यवसायरूपतया विश्वासपर्यवसानाच्च॥

एतदुक्तम्भवति। भगवच्चरणारविन्दयुगले शरणमध्यवस्य प्रार्थनापूर्वकं भरं न्यस्यामीति न्यासस्यापि बुद्धिरूपत्वात्प्रपद्य इति न्यास एवात्राभिधीयते। केवलं विश्वासाभिधानमात्रे 'न्यासःपञ्चाङ्गसंयुतः' 'आत्मात्मीयभरन्यासो ह्यात्मनिक्षेपउच्यते' तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः' इत्यादिप्रमाणानन्वयः प्रसज्येत। 'विश्वासो द्वयार्थः' इत्याचार्यवचनस्यापि भरन्यासपर्यन्त विश्वासे तात्पर्यम्। अन्यथा 'तवभरोऽहमकारिषिधार्मिकैश्शरणमित्यपि वाचमुदैरिरम्' इत्यादिवचनं विरुध्येत॥

एवं च प्रपद्यइति शब्दः प्रकृष्टज्ञानरूपं भरन्यासमेव प्राधान्येन प्रकाशयतीति केचित्। तथा च स्वेनवा स्वाचार्येणवा स्वरक्षणविषयभरन्यासः कर्तव्यइत्युक्तं भवति। उत्तमपुरुषेण प्रपदनकर्तृपुरुषविशेषाभिधानात् अधिकाररूपमाकिञ्चन्यं तत्प्रकाशात्मकं कार्पण्याभिधानमङ्गं च प्रतिपाद्यते। अतः प्रातिकूल्यवचनम् आनुकूल्यसङ्कल्पश्च श्रीशब्देन प्रतीयते। महाविश्वासस्सोपसर्गधातौ तत्रैवार्थाच्छब्दाद्वा गोप्तृत्ववरणं भरन्यासश्च सिध्यति। गोप्तृत्ववरण

भरन्यासयोरपि प्रकृष्टबुद्धिविशेषरूपत्वात् । उत्तमपुरुषे कार्पण्यमाकिञ्चन्यंच 'नधर्मनिष्ठ' इत्यादियामुनाचार्यवचनेन तस्यैव विवरणात् । अतः पूर्वखण्डे साधिकारसाङ्गप्रपदनसिद्धिः । अत्र च श्रीमन्नारायणशब्दाभ्यां शङ्कापंचक हेतवः पंचापि प्रतिक्षिप्यन्ते । तदुक्तमाचार्यैः—

कर्तव्यं सकृदेव हन्त कलुषं सर्वं ततो नश्यति
ब्रह्मेशादिसुदुर्लभं पदमपि प्राप्यं मया द्रागिति ।
विश्वासप्रतिबन्धिचिन्तनमिदं पर्यस्यति न्यस्यताम्
रङ्गाधीशरमापतित्वसुभगं नारायणत्वं तव ॥

इति । श्रियःपतित्वसंवलितैर्भगवद्गुणैश्शङ्का हेतवो निरस्यन्त इत्यर्थः ॥

तथाहि भगवतः परमकारुणिकत्वात्प्रपदनोपायस्य सकृत्त्वं नदोषाय । स्वार्थनिरपेक्षपरदुःख निराचिकीर्षाहि कृपेत्यभ्यधायि । स्वामित्वात्स्वशेषभूतानस्मान् स्वयमेव संरक्षितुमर्हति । सुशीलत्वादस्मन्मान्द्यं नालोकयति । महतो मन्दैस्सह नीरन्ध्रसंश्लेषोहि सौशील्यमितिचोक्तम् । वत्सलत्वादस्मद्दोषमपि नपश्यति । स्वतस्सर्वज्ञस्य भगवतो दोषानवलोकनवचनं तदवलोकनं तन्निवारणायैव भवतीति ज्ञापनार्थमिति च पूर्वमेवोक्तम् । आश्रितविषये सुलभत्वाद्दुर्लभत्वमपि नास्ति । दृश्यतेहि—'अतिदूरमभक्तानां भक्तानां पुरतस्स्थितम्' इति । एवमौदार्यसर्वज्ञत्वादीनामपि गुणानामुपयोगो द्रष्टव्यः । एतेच सर्वगुणाः श्रियःपतित्वेनोत्तम्भ्यमानाः समाश्रितसंरक्षणाय प्रभवन्तीत्यर्थः । एवं पूर्वखण्डे त्रीणि पदान्यनुसन्धेयानि ।

श्रीमन्नारायणस्वामिन्ननन्यशरणस्तव ।
चरणौ शरणंयातस्तवैवास्म्यहमच्युत ॥

इति द्वयविवरणरूपभगवच्छास्त्रवाक्यानुरोधेन श्रीमन्नारायणशब्दयोस्सम्बुध्यन्तत्वमाश्रित्य तवेति पदमध्याहृत्य च केचिन्निर्वहन्ति । अर्थतत्त्वंतु सर्वत्राप्येकमेव । पूर्वखण्डे सपरिकरमुपाय प्रतिपाद्य उत्तरखण्डेन तत्फलमभिधीयते । तत्रापि श्रीमच्छब्दार्थः पूर्ववद्व्याख्येयः । नारायणशब्देन गुणविग्रहविभूत्यादिविशिष्टं परं ब्रह्म प्रतिपाद्यते । कृत्स्नस्यापि भगवद्विभूतिभूतस्य चेतनाचेतनात्मकप्रपञ्चस्य तद्विशेषणत्वेन भोग्यत्वान्नरसम्बन्धितया नारशब्दवाच्यत्वाच्च । यथा

खलु पित्तोपहतस्य तिक्ततया भातं क्षीरं तदपगमे मधुरमेव प्रतिभाति । तथा कर्मवशात्प्रागन्यथाप्रतिपन्नं विश्वं तन्निवृत्तौ भगवद्विभूतित्वे सुखायैव भवतीति किन्नाम न योयुज्यते ॥

अतएव खलु असंकुचितब्रह्मानुभवो मोक्ष इत्यभिधीयते । अत्रापि श्रीमन्नारायणपदस्थया चतुर्थ्याऽपि शेषत्वपुरस्कारेण कैङ्कर्यमेव प्रतिपाद्यते । नम इति ममकारनिषेधेन फलदशायां स्वाधीनकर्तृत्वं, स्वार्थकर्तृत्वं स्वाधीनभोक्तृत्वं स्वार्थभोक्तृत्वं चेतिविरोधिचतुष्टयं निषिध्यते । अयं च निषेधस्स्वर्गादिन्यायेनात्रापि तादृशदोषमाशङ्कमानंप्रति बोधनायेति न कश्चिद्विरोध इति प्रागेवोक्तम् । नखलु मोक्षदशायामेतादृशदोषाः प्रतिबुद्धैराशङ्कितुमपि शक्यन्ते कथं तर्हि भक्तानामस्थानभयशङ्कादिकं ज्ञानकार्यादिकमभिधीयते ॥

मैवं नहि तत्र साक्षाद्भयादस्थानभयशङ्कोच्यते । अपित्वस्थानभयशङ्किनामाप्ततमानां किङ्कराणां स्वामिविषये यादृशः प्रेमातिशयः तादृशप्रेमातिशयो मुक्तानां भगवद्विषयइत्यतो जयजयेत्यादिवचनं किङ्करवृत्तिमात्रविषयमेवेति न कश्चिद्विरोधः । तस्मादुत्तरखण्डस्याध्याहृत निरपराधकैङ्कर्यलाभो वाक्यार्थः । भगव(द्गुणानु)दनुभवश्च तदन्तर्गतएव । भगवद्गुणानुभवजनितत्वात्कैङ्कर्यसंतानस्य । अत्र पूर्वखण्डे एकं वाक्यम् ॥

उत्तरखण्डेतु आविस्युरित्याध्याहृत क्रियान्वित नारायणशब्दनिष्ठचतुर्थीपर्यन्तमन्यद्वाक्य कैङ्कर्यस्य प्रार्थनारूपत्वात् । नमइति तृतीयवाक्यं मम किंचिन्नस्यात् नापि निरपेक्षकर्तृत्वं कुत्रापि नममेत्यर्थः । एषां त्रयाणांवाक्यानामेकवाक्यत्वे श्रीमन्नारायणचरणयोः सर्वदेश सर्वकाल सर्वावस्थोचितसर्वविध निरपराध कैङ्कर्यप्राप्त्यर्थं श्रीमन्नारायणचरणावुपायत्वेनाध्यवस्य प्रार्थनापूर्वकमात्मरक्षाभरं समर्पयामीति योजना । अत्रेयमनुष्ठानप्रक्रिया स्वानुष्ठानमुखेनाचार्यैः सुनिपुणमुपपादि—

संसारावर्तवेगप्रशमनशुभकृत(दृग्)देशिकप्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्यशान्ताभिसन्धिः ।
निश्शङ्कस्तत्त्वदृष्ट्या निरुपाधिकदयं प्राप्य(र्थ्य) संरक्षकन्त्वां
न्यस्य त्वत्पादपद्मे वरदनिजभरं निर्भरो निर्भयोऽस्मि ॥

इति । अत्रापि मूलमन्त्रवत्तत्वत्रयानुसन्धानमर्थपञ्चकानुसन्धानं च स्वयमेव कर्तव्यमन्तेवासिभिः । सिद्धसाध्योपायाविभागश्च पूर्वमेवोक्तत्वादत्र न विधीयते । अत्र 'मूलमन्त्रे जानित्वा द्वयेन संवर्ध्य द्वयैकनिष्ठो भवेत्' इत्यादीनि पूर्वाचार्यग्रन्थेषु वचनान्यनुसन्धेयानि । 'द्वयमर्थानुसन्धानेनसह सदैव वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व' इतीदं फलपर्यवसानभूमिं निगमयतीति गद्योक्तं निगद्यते । अन्यत्सर्वमाचार्यग्रन्थेषु तत्रतत्र विस्तरेण द्रष्टव्यमिति सर्वं समञ्जसम् ॥

लक्ष्म्या नित्यसमन्वितं गुणगणैर्जुष्टं च देहान्वितम्
देवं सिद्धमुपायमाह पुरतस्साध्यं प्रपद्येपदात् ।
मन्त्रोऽयं मधुसूदनप्रणयिनीयुक्तं पुनःख्यापयन्
अन्ते भोगह्रदन्तरे मम सदा स्वत्वं न किंकुर्वतः ॥

शरणवरणवाणी तत्पराणां नराणां
करणविलयकाले कल्पनाकल्पशाखी ।
फलति फलमशेषं पद्मया विश्वधात्र्या
चलितभुजलताभ्यां चारु संश्लिष्यमाणः ॥

शरणागतिमन्त्रस्य संग्रहादर्थनिर्णयः ।
व्यधायि वरदार्येण वेदान्ताचार्यसूनुना ॥

इति विश्वामित्रकुलोद्भूतेन निखिलकवितार्किकचूडामणिना
सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना
कुमारवेदान्ताचार्येण विरचिते
श्री म द्र ह स्य त्र य सा रा र्थ सं ग्र हे
द्वयाधिकारो द्वितीयः

श्रीमते निगमान्तमहागुरवे नमः

अथ चरमश्लोकाधिकारः

एवमनुष्ठेयस्योपायस्य अधिकारनैरपेक्ष्याद्यपेक्षितार्थ विशदीकारमुखेन विधायकं वाक्यं चरमश्लोकः। तत्र पूर्वोत्तरार्धाभ्यां शरणागतिमन्त्रपूर्वोत्तर खण्डयोर्विवरणमिति मन्तव्यम्। तत्र कर्मयोग ज्ञानयोग भक्तियोगान्मोक्ष साधनत्वेनोपदिश्य तदनधिकारितया शोचतः फल्गुनस्योपायान्तरमत्र विधीयते। ततस्सर्वधर्मपरित्यागशब्द उपायान्तरानधिकारं प्रतिपादयति। तदनधिकारश्च पञ्चदशविधः। उक्तंह्याचार्यैः—

भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतःपर्युदासः
कालक्षेपाक्षमत्वंत्विति नियतिवशादापतद्भिश्चतुर्भिः।
एकद्वित्र्यादियोगव्यतिभिदुरनिजाधिक्रियास्संश्रयन्ते
सन्तश्श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्काः॥

इति। अयमस्यार्थः। शक्तिः—ज्ञानं—शास्त्रापर्युदासत्वं कालक्षेपाक्षमत्वमिति चत्वारि परस्परसंवलितानि भक्तेरधिकारः। तेषां विपर्ययस्तु प्रपत्तेरधिकारः। सविपर्ययश्च एकैकनिवृत्त्या चतुर्धा। द्विकद्विकनिवृत्त्या षोढा त्रिकत्रिकनिवृत्त्याचतुर्धा कृत्स्ननिवृत्त्याचैकश्चेति पञ्चदशविधः। शक्त्यादिमेळननिषेधस्य सर्वत्राप्यविशिष्टत्वात्। 'भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतःपर्युदासः कालक्षेपाक्षमत्वम्' इत्यमीषामेकैकसद्भावे द्विकद्विकसद्भावे त्रिकत्रिकसद्भावे चतुर्णामपि सद्भावे प्रपत्त्यधिकारो भवतीत्युक्तम्भवति। एवं च दुष्करोपायान्तरानधिकारिणो मुमुक्षोस्सुकरोपायो विधीयतइत्यर्थः॥

ननु कथं परित्यज्येति ल्यबन्तेसति अधिकारानुवादः। इत्थं समानकर्तृकयोः पूर्वकालइति समानकर्तृकत्वं पूर्वकालवर्तित्वं च ल्यबर्थः। ननु विधित्वमनुवादत्वंवा। तथाचसति 'विधिस्तु धारणे अपूर्वत्वात्' इति न्यायेन प्रतिपाद्यमानस्यार्थस्य प्रमाणान्तराप्राप्तत्वे विधित्व भवति, प्राप्तेत्वनुवादत्वमेव प्रदर्शयति। 'अप्राप्तेहि शास्त्रमर्थवत्' इतिहि न्यायविदः। एवंचोपायान्तरानधिकारिणस्तदनन्वयस्य प्रागेव प्राप्तत्वेनाधिकारिणोऽनुवादः क्रियतइति नविरोधः। अन्यथा—

'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ।'
'त्रीन्लोकान् संपरिक्रम्य तमेव शरण गतः ।'
'लशुनं गृंजनचैव भुक्त्वा चान्द्रायणचरेत् ।'

इत्यादिषु ल्यबन्तप्रतिपाद्यस्य संसारप्राप्त्यादेरपि विधेयत्वं स्यात् । तेनानाधिकारमेव प्रदर्शयति । शक्तस्यचाशक्तस्य च त्यागविधानायोगादिति नीतिविदां निर्णयः तेन स्वरूपत्यागविधिपक्षो नाङ्गीकार्यः । प्रमाणाविरुद्धविशिष्टविधि पक्षप्रकारभेदाश्चानन्तरमेव उपपादयिष्यन्ते । अत्र सर्वधर्मशब्देन मोक्षोपाय तया विहितभक्तियोगाभिधानमिति प्रकरणादवगम्यते । अर्थप्रकरणादीनामर्थ निर्णायकत्वात् । तत्र धर्मानिति बहुवचनं सद्विद्या दहरविद्यादिभेदेन ब्रह्मविद्यानां बहुत्वप्रकाशनार्थम् । इह 'वसन्ताय कपिञ्जलानालभेत' इतिवद्बहुवचनस्य त्रित्वे पर्यवसाने प्राप्ते अशेषाणां ब्रह्मविद्यानां धर्मशब्देन परिग्रहार्थं सर्वशब्दोऽपि विशेषणत्वेन प्रयुज्यते ॥

एवंचसति सर्वास्वपि ब्रह्मविद्यासु अनधिकारएव प्रपत्तेरधिकार इत्युक्तं भवति । यत्तु कैश्चिदुक्तं प्रपत्तौ विश्वासहीनानां भक्तावधिकार इति तन्न । प्रपत्तिशास्त्रोपदेष्टॄणां व्यासादीनां भक्त्यधिकारिणां प्रपत्यविश्वासाभावात् । अन्यथा कथं तद्वाक्यप्रामाण्यादस्माभिः प्रपत्तिरनुष्ठीयते । 'नरस्य बुद्धिदौर्बल्यादुपायान्तरमिष्यते' इति वचनमशक्तानां प्रपन्नाधिकारिणामेव केषांचिद्दुर्बलबुद्धीनां भक्त्याशानिवृत्यर्थं निन्दावचनमिति नकश्चिद्दोषः । तेन स्वयं शक्ता व्यासादयो भक्तिमनुतिष्ठन्ति । अशक्तानस्मान् प्रपत्तिमनुष्ठापयन्तीत्यर्थः । परित्यज्येति त्यागशब्देन विद्यान्तरानधिकारो लक्ष्यतएव । शक्तस्यचाशक्तस्य च त्यागविधानायोगादित्युक्तम् । अत्र परीत्युपसर्गः कर्मज्ञानयोरपि भक्तियोगाङ्गभूतयोरनधिकारं द्योतयति । अतो वर्णाश्रमधर्मादीनां नपरित्याग प्रसङ्गः ॥

त्रिविधं हि कर्मानुष्ठानम् । स्वर्गाद्यर्थं ब्रह्मविद्यानिष्पत्यर्थं नित्यनैमित्तिकात्मकंचेति । उक्तं च सूत्रकारैः 'विहितत्वाच्चाश्रमकर्मापि' 'सहकारित्वेन च' इति । तत्र यथा मुमुक्ष्वधिकारिणां भक्तियोगनिष्ठानामनुष्ठीयमानेष्वपि कर्मसु स्वर्गाद्यर्थता निवर्तते । एवमकिंचनाधिकारिणां कैङ्कर्यरूपतया यावत्

शक्त्यनुष्ठीयमानेषु नित्यनैमित्तिककाम्येषु कर्मसु 'सहकारित्वेनच' इति सूत्र प्राप्तमेव विद्याङ्गत्वं निवर्तते। 'विहितत्वात्' इति सूत्रप्राप्तमाश्रमादिधर्मत्वंतु न निवर्ततएव। इयान्विशेषः-प्रपन्नाधिकारिभिरनुष्ठीयमाने कर्मणि भगवदाज्ञारूपतया केवलमकिञ्चनस्यैवाधिकारिणः स्वयम्प्रयोजनत्वेनानुष्ठीयत इति तेषामवश्यानुष्ठेयत्वम्। 'मनीषीवैदिकाचारं मनसापि नलङ्घयेत्' इतिसिद्धम्॥

अथवा सर्वधर्मशब्देनैव कर्मयोगादेरपि निवृत्तत्वात् परित्यज्येत्यत्र परि रुपायान्तरेषु नैराश्यं द्योतयति। अनेनानागतानन्तकालसमीक्षयाऽप्यदृष्टसन्तारोपायत्वरूपं आकिञ्चन्यमुक्तम्भवति। अतोऽयमनधिकारानुवाद इत्याद्योऽयमर्थः। अथवा नैरपेक्ष्यविशिष्टोऽयमुपायो विधीयते। तथाहि सद्विद्यादीनां कर्मयोगाद्यङ्गकत्वदर्शनात् ब्रह्मविद्यात्वसाधारण्यात् न्यासविद्यायामपि कर्मयोगाद्यङ्गकत्वमाशङ्कमानस्य तन्नैरपेक्ष्यविशिष्टशरणवरणं विधीयते॥

यद्वा उपायान्तराशक्तस्यैवाधिकारिणः स्वाधिकारपुरस्कारात्मककार्पण्य विशिष्टं शरणवरणं विधीयत इति विशिष्टविधिर्नविरुध्यते। किंचोपायान्तरसक्रत्वादिभिः पञ्चभिर्हेतुभिस्सुकरोपाया विश्वासादुपायान्तरे प्रवर्तमानस्य दुर्बल बुद्धेः कस्यचिदधिकारिणः तत्प्रवृत्तिव्यतिरेकविशिष्टा शरणागतिर्विधीयत इति। एवंवात्र प्रवर्तमानोऽपि दुर्बलबुद्धिस्ततएवाविश्वासादुपायान्तरमभिवांछति। तस्याप्युपायान्तरप्रत्याशानिवृत्तिविशिष्टं शरणवरणं विधीयत इति॥

अपिच यथाखलु भक्तेःप्रपत्तिसापेक्षत्वं एवं प्रपत्तेरपि भक्तियोगसापेक्षत्वं तदङ्गसापेक्षत्वं वाऽस्त्विति मत्वा प्रपत्यङ्गत्वेन भक्त्यादीन् स्वीकुर्वतःपुरुषस्य प्रपत्यङ्गत्वेन भक्त्यादिस्वीकारे पवनतनयबन्धनब्रह्मास्त्रन्यायेन प्रपत्तिरेव विगलेदिति विपक्षे बाधकप्रसङ्गेन तन्नैरपेक्ष्यविशिष्टं प्रपदनं संस्थाप्यतइति तत्राप्युपायान्तरसंसर्गासहत्वलक्षणं पूर्वविशेषणं शरणागतेरुपपद्यत इति विशिष्टविधित्वसिद्धिः॥ तथाऽपि नस्वाङ्गनैरपेक्ष्यं प्रपत्तेः। अनुपकृतस्य करणत्वायोगात्। नखलु ब्रह्मास्त्रस्यापि रज्जुबन्धनादिनैरपेक्ष्ये सत्यपि ब्रह्मास्त्रप्रयोग विध्युपस्थापित तदङ्गनैरपेक्ष्यमुपपद्यते। अन्यथा बन्धनकरणत्वायोगात्। उक्तं हि 'नहि तत्करणं लोके वेदेवा किंचिदीदृशम्। इतिकर्तव्यतासाध्ये यस्यनानुग्रहेऽर्थिता' इति। अभिहितंचैतत्सर्वमाचार्यैः—

अतोऽशक्ताधिकारत्वमाकिञ्चन्यपुरस्क्रिया ।
अनङ्गभावो धर्माणामशक्यारम्भवारणम् ॥
तत्प्रत्याशाप्रशमनं ब्रह्मास्त्रन्यायसूचनम् ।
सर्वधर्मपरित्यागशब्दार्थास्साधुसम्मताः ॥

इति । अतः—' अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् । '
' त्रीन्लोकान् संपरिक्रम्य तमेव शरणंगतः । '

इत्यादिवदकिंचनाधिकारिणः उपायान्तराभावमनूद्य शरणवरणं विधीयत इत्यनुवादपक्षः । तस्यैवाधिकारिणो नैरपेक्ष्यादिविशिष्टं प्रपदनं विधीयतइति विशिष्टविधिपक्षः अतोद्वयोरपि पक्षयोर्निपुणं निरूपयतां नार्थविरोधः । उभयोरपि पक्षयोर्नित्यनैमित्तिकात्मनाऽनुष्ठीयमानस्य कर्मणो ब्रह्मविद्याशेषत्वेनास्वीकारात् वर्णाश्रमोचिततया भगवत्कैङ्कर्यरूपत्वेन स्वीकाराच्च । उक्तंचाचार्यैः—

विशिष्टेचानुवादेच पक्षयोरुभयोरपि ।
नस्वरूपपरित्यागः कर्तव्यानां च कर्मणाम् ॥

इति । इयान्विशेषः—विशिष्टविधिपक्षे विशेषणविशेष्ययोर्द्वयोरपि विधेयत्वम् । अनुवादपक्षे विशेष्यस्यैकस्येति अत्र उचितमर्थं स्वयमेव विदांकुर्वन्तु सन्तः । विधिविषये गौरवाल्लाघवमेव समुचितमिति मीमांसकाः । मामितिशरण्यगुणयुक्तो भगवान् श्रियःपतिरभिधीयते । तेच गुणा नारायणशब्दव्याख्यानावसरे सौलभ्य सौशील्यादयः प्रागेव व्याख्याताः । एकशब्दस्यापि षोढार्थो वर्ण्यते । तदुक्तमाचार्यैः—

प्राप्यस्यैव प्रापकत्वं स्वप्राधान्यनिवारणम् ।
प्रपत्तेर्व्याजमात्रत्वमन्योपायैरनन्वयः ॥
तदङ्गैरप्यसम्बन्धस्सर्वसाध्येष्वभिन्नता ।
इत्थमर्थाष्षडाचार्यैरेकशब्दस्य दर्शिताः ॥

इति । एकशब्दस्त्वभिन्नं मुख्यं केवलं साधारणंचार्थं प्रतिपादयति । अत्र एकशब्दस्याभेदवाचित्वे प्राप्यप्रापकयोरैक्यं प्रसिध्यति । प्राप्यतया प्रापकतयाचैकमेवस्थितं मामित्यर्थः । स्वर्गादिषु पुरुषार्थेषु फलसाधनयोर्भिन्नत्वादत्रापि भिन्नत्वमाशङ्क्य निवार्यते । उक्तं च लौकिकैरपि—' सस्वेनैव फलप्रदःफलमपि

स्वेनैव नारायणः ' इति साध्योपाय साध्यप्राप्ययोरत्रापि भेदोऽस्त्येव। भक्ति प्रपत्त्योस्साध्योपायत्वादनुभवकैङ्कर्ययोः साध्यप्राप्यत्वाच्च। अतस्सिद्धोपायरूपो भगवान् स्वयमेव सिद्धप्राप्य इत्येकशब्देनाभिधीयते। एकशब्दस्य मुख्यवाचित्वे प्रपत्तिकर्तुश्चेतनस्याप्राधान्यं द्योत्यते। तत्कर्तृत्वस्यापि परमात्माधीनत्वात्। उक्तं च सूत्रकारैः ' कर्ता शास्त्रार्थवत्त्वात् ' ' परात्तु तच्छ्रुतेः ' इति ॥

अथवा मुख्यत्ववाचिना तेनैवैकशब्देन प्रपत्तेर्व्याजमात्रत्वं द्योत्यते। नखलु लिकुचफलप्रदानमीप्सितराज्यप्राप्तये पर्याप्तम्। इदंकिलास्मदीयंपद्यम्—

चिदचिदधिपतीनां चिन्तनाचक्रवर्ती
परमपुरुषसेवा नित्यसांराज्यलक्ष्मीम्।
परिकलयति भक्त्यायोगिनां सार्वभौम-
प्रभृतिभिरविशेषं नम्रमात्रेण मूर्ध्ना ॥

इति। यद्वा कैवल्यमनेनैकशब्देन बोध्यते केवलं भक्तियोगनिरपेक्षमित्यर्थः। तेनैव न्यायेन भक्तियोगांग कर्मज्ञानापेक्षा विधुरत्वमपि विधीयते ॥

एतदुक्तं भवति प्रपन्नादन्यस्य न कदाचिदपि भगवान् मोक्षं प्रयच्छति प्रपन्नश्च द्विविधः। अङ्गप्रपत्तिनिष्ठस्स्वतन्त्रप्रपत्तिनिष्ठश्चेति। अङ्गप्रपत्तिनिष्ठस्य भक्तियोगादिनिष्ठायुक्तो भगवान् मोक्षं प्रयच्छति। स्वतन्त्रप्रपत्तिनिष्ठस्य तु उपायान्तरस्थाने स्वस्थाने च स्वयमेवोपतिष्ठमानः फलं प्रयच्छति। इदमेवोपायान्तरस्थानापत्तिरिति निरपेक्षोपायत्वमिति च कथ्यते। अयमेव न्यासविद्यायां वेद्याकारः। ननु सर्वधर्मपरित्यागवचनेऽपि नैरपेक्ष्यमुक्तम्। अत्रापि कथं नैरपेक्ष्यमभिधीयते। अत्र कैश्चिदाचार्यैर्नैरपेक्ष्यपरिग्रहः। अत्राप्यपरैराचार्यैरिति योजनाभेदान्नपौनरुक्त्यादिदोषः ॥

अथवा तत्र शरणं व्रजेति विहितस्य साध्योपायस्य नैरपेक्ष्यं विहितम् अत्रतु सिद्धोपायस्य परस्य ब्रह्मण इति विशेषः। तथाऽपि प्रपत्त्याऽपि नैरपेक्ष्यं सिद्धोपायस्य भगवतइति न मन्तव्यम्। शरणं व्रजेति विधानस्यैवायोगात्। इदमेवाह नैरपेक्ष्यं प्रामाणिकैरभिधीयते यत्स्वतन्त्रसहकारिनैरपेक्ष्यं तथा नप्रतिपत्तिनैरपेक्ष्यं प्रामाणिकैरभिधीयते। किंतु स्वतन्त्रसकारिनिरपेक्षत्वम्। स्वाधीनसहकारिसापेक्षत्वंतु भगवतो भाष्यकारादिभिरभिधीयतएव। अन्यथा ईश्व-

रत्वस्यैव परित्यागप्रसङ्गः । नखल्वीशितव्यमन्तरेणेश्वरत्वं सम्भवति । अतः प्रपत्तिप्रसादितस्यैवेश्वरस्य मोक्षप्रदत्वं तन्नैरपेक्ष्यभञ्जकमित्यविचारकाणां वचनम् । अतः प्रपत्तिव्यतिरिक्तभक्तियोगादि नैरपेक्ष्यमत्रैकशब्देन विवक्ष्यतइति निर्णयः । प्रपत्तिस्वरूपमपि भगवदायत्तमिति नतत्सापेक्षतादिदोषः । तेन भगवानेव साक्षान्मोक्षसाधनम् । इतरत्तत्प्रसादनं तदपिच तदङ्गादिकं च तदधीनमिति ॥ एकशब्दस्य साधारणवाचित्वेऽपि भगवतस्सकलफलप्रदत्वं प्रतीयते । एकं सर्वेष्वपि फलेषु प्रदातृत्वेन साधारणं मामित्यर्थः । 'एकेमुख्यान्यकेवलाः' इत्येकशब्दस्यान्यपर्यायत्वेन वैलक्षण्यवाचकत्वे ब्रह्मणि श्रीनिवास इतिवच्छ्रियःपतित्वलक्षणं वैलक्षण्यं प्रकाश्यतइत्याहुराचार्याः । तेन श्रीमन्नारायणशब्दार्थोऽपि सिध्यति । शरणशब्दः पूर्ववद्व्याख्येयः । व्रजेति गत्यर्था बुध्यर्था इति न्यायेन विश्वासप्रार्थनापूर्वकमात्मरक्षाभरन्यासं प्रतिपादयति । एवं वाक्यार्थः उपायान्तराशक्त्यादियुक्तः त्वं मामेकं शरणं व्रजेति ॥

अथवा कर्मयोगादीनंगत्वेनास्वीकृत्य मामेकं शरणं व्रजेति । यत्तु वर्णाश्रमधर्मादि स्वरूपत्यागं सर्वधर्मपरित्यागशब्दार्थं वर्णयन्ति तेषां श्रुतिविरोधान्न्यायविरोधात्प्रपत्तिप्रतिपादक तत्तदध्यायविरोधात्संप्रदायविरोधाच्च यथेच्छाचारश्रद्धैव मूलमिति सन्तो न बहुमन्यन्ते । उक्तंहि प्रपत्त्यध्याये—

प्रियाय मम विष्णोश्च देवदेवस्य शार्ङ्गिणः ।
मनीषी वैदिकाचारं मनसाऽपि नलङ्घयेत् ॥
यथाहि वल्लभो राज्ञो नदीं राज्ञा प्रवर्तिताम् ।
लोकोपयोगिनीं रम्यां बहुसस्यविवर्धिनीम् ॥
लङ्घयन् शूलमारोहेदनपेक्षोऽपितां प्रति ।
एवं विलङ्घयन् मर्त्यो मर्यादां वेदनिर्मिताम् ॥
प्रियोऽपि नप्रियोमेऽसौ मदाज्ञाव्यतिवर्तनात् ।

इति । अत्रच सकृत्कृतश्शास्त्रार्थ इतिन्यायेन प्रपदनानुष्ठानस्य स्वतःप्राप्तं सकृत् कर्तव्यत्वं 'आवृत्तिरसकृदुपदेशात्' इत्युक्तब्रह्मविद्यात्वसाधारण्यादपोदितमपि 'सकृदेवहि शास्त्रार्थः कृतोऽयं तारयेन्नरम् ।' इत्यादिभिर्वाक्यैरुत्तभ्यते । इदमेवहि सकृत्वमभिप्रेत्य शरणागतिमन्त्रेऽपि प्रपद्यइति वर्तमाननिर्देशः

प्रपदनस्य तत्कालमात्रसम्बन्धएवहि तत्र कर्ता वर्तमानत्वेन व्यपदिश्यते। एवंविधस्यापि शरणवरणस्योपादानवेलायां तत्रतत्र शरणागतिस्सम्बन्धज्ञानमात्रं, अधिकारिविशेषणमात्रम्, सिद्धोपायप्रतिपत्तिमात्रम् अनिवारणमात्रम्, अनुमतिमात्रम् अचिद्व्यावृत्तिमात्रं चेतस्समाधानमात्रं चैतन्यकृत्यमित्यादिकं यदभिधीयते प्रपत्तिशास्त्रनिष्ठैः कैश्चिद्विद्वद्भिस्तत्सर्वं विधेयभूतभरन्यासात्मक प्रपत्त्यनुष्ठानान्तर्गत तत्तदर्थप्रकाशनाभिप्रायेणेति तात्पर्यान्तरकल्पनया परिहर्तव्यम् ॥

तथाहि अस्ति खलु भगवति भरं न्यस्यतः शेषत्वज्ञानं तदेवखलु सम्बन्धज्ञानमिति तैरभिधीयते। तच्च श्रवणादेव सिद्धमधिकारोपायफलदशास्वनुवर्तते च। तस्मिन्प्रपत्तित्वव्यवहारो राजान्तरङ्गपुरुषे राजत्वव्यवहारवदिति न विरोधः। एवमर्थान्तरेष्वपि स्वयमेवोहनीयम्। तेषां स्वरूपमेव प्रदर्शयामः। अधिकारिविशेषणं स्वर्गकामइतिवत्फलाकाङ्क्षा सिद्धोपायप्रतिपत्तिरीश्वरः सिद्धोपायइतिनिश्चयः। अनिवारणं संरक्षतो भगवतः प्रातिकूल्यवर्जमपराधाननुष्ठानमित्यर्थः। तच्च प्रपत्त्यङ्गमेव प्रातिकूल्यवर्जनात्मकत्वात्। अनुमतिः स्वयमेव रक्षणे प्रवर्तमानस्य तत्प्रीतिसंधुक्षणं तद्भरन्यासात्मकं च एतत्प्रपत्तिरेव। नचेत्तदविनाभूतं यत्किंचिदङ्गं भवतु तथाऽपि च न दोषः। चित्तसमाधानं भगवति स्वीकृतभरे निर्भरत्वानुसन्धानेन समाहितचित्तत्वं तच्च प्रपत्तिफलमेव चैतन्यकृत्यं स्वयं ज्ञातृत्वात्स्वज्ञानानुगुणस्वोचितकृत्यानुष्ठानम्। अन्यथा सम्बन्धज्ञानाद्यङ्गीकारेण भरन्यासरूप प्रपत्तिस्वरूपनिराकरणे बहुप्रमाणविरोधः सत्सम्प्रदायविरोधः, विधिवैयर्थ्यं मूलमन्त्राद्यर्थविभागविरोधो न्यायविरोधश्च प्रसज्येत ॥

एवमचिद्व्यावृत्तिमात्रमित्यादि शब्दानामर्थो निर्वाह्यः। नैतेह्यर्थास्साक्षात्प्रपत्तिस्वरूपम्। तथाऽपिप्रपत्त्यनुष्ठातॄणां सम्भवति। एतावतैतेषु प्रपत्ति व्यवहार इति न सङ्कटं किंचित्। औपचारिकव्यवहारस्य सर्वत्र सुलभत्वात्। तथाच 'न्यासइति ब्रह्म' इत्यादिकमपि सिद्धोपायप्राधान्येन ब्रह्मणि प्रतिपत्त्यर्थमौपचारिकमेव। नखलु सिद्धसाध्योपाययोः स्वरूपैक्यं सम्भवति ॥

एवं पूर्वार्धेन प्रपत्यनुष्ठानं विधाय न्यस्तभरमधिकारिणमुत्तरार्धेन सर्व पापमोक्षणरूप तत्फलोपदेशपूर्वकं निश्शोकयति। अहमित्यादिना। अहं सर्व

पापमोक्षणोपयुक्तज्ञानशक्त्यादिसामर्थ्ययुक्तः। त्वां न्यस्तभरतया निर्भरं त्वां सर्वपापेभ्यो मोक्षयिष्यामि। अयं खलु सर्वपापमोक्षणप्रकारस्स्वयमेवाचार्यैः स्पष्टमभिहितः—

प्रारब्धेतरपूर्वपापमखिलं प्रामादिकंचोत्तरम्
न्यासेन क्षपयन्ननभ्युपगतप्रारब्धखण्डं च नः।
धीपूर्वोत्तरपाप्मनासजननाज्जातेऽपि तन्निष्कृतेः
कौटिल्येसति शिक्षयाप्यनघयन् क्रोडीकरोति प्रभुः॥

अयमर्थः द्विविधं खलु पापम्। पूर्वाघमुत्तराघंचेति। पूर्वाघं च द्विविधम्। प्रारब्धमप्रारब्धंचेति। अनुमतमननुमतंचेति। उत्तराघं च द्विविधम्। बुद्धिपूर्वकमबुद्धिपूर्वकंचेति। बुद्धिपूर्वकं च द्विविधम्। कृतप्रायश्चित्तमकृतप्रायश्चित्तंचेति। तत्र प्रारब्धव्यतिरिक्तं पूर्वाघमबुद्धिपूर्वमुत्तराघं च विद्यारम्भसमये भक्तिनिष्ठस्य निवर्तते। तत्र पूर्वाघस्य विनाशः उत्तराघस्याश्लेषः। प्रपत्तिनिष्ठस्यतु अप्रारब्धपूर्वाघनिवृत्तिवत् प्रारब्धपूर्वाघेऽप्यननुमतांशो निवर्तते।

उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी।
साध्यभक्तिस्तु साहन्त्री प्रारब्धस्यापि भूयसी॥

इति वचनात्। उपायभूता भक्तिर्यस्यास्सा उपायभक्तिः। साध्या भक्तिर्ययेति साध्यभक्तिः। अयमर्थः प्रपत्तिर्ह्युपायान्तरभूतां भक्तिं स्वयमङ्गभूतासती प्रसाधयति। फलभूतांतु भक्तिं स्वातन्त्र्येण स्वयमेव साधयति। प्रारब्धं तु दुरितं नाशयति। अतो भक्तेः प्रपत्तिर्भूयसीति। अतएवैतद्देहावसानएव मोक्षः। आर्तदृप्तविभागोऽप्यनेन न्यायेन सिद्धः॥

येखलु शरणागतिमन्त्रोच्चारणमेव प्रस्थानशङ्खनादीकृत्य परमपदं प्राप्नुवन्ति तएवखल्वार्ताः। येतु देहावसानविलम्बं सहन्ते ते दृप्ता इति विभागः। उत्तराघेष्वबुद्धिपूर्वांशो भक्तिनिष्ठस्येव प्रपत्तिनिष्ठस्यापि न श्लिष्यते। विवेकिनस्तु प्रपन्नाः बुद्धिपूर्वकमुत्तराघमेव नारभन्ते। मध्यमाः पुनःप्रारब्धं पापं यथाधिकारं प्रायश्चित्तेन परिहरन्ति। तत्रापि तत्तत्पापानुरूपप्रायश्चित्तेषु शक्तौ सत्यां तान्येवानुतिष्ठन्ति। तदभावे तु पुनःप्रपत्तिरेव प्रायश्चित्तं भवति। अन्यथाऽतिप्रसङ्गात्। 'अनन्यसाध्ये स्वाभीष्टे' इति वचनविरोधाच्चेति। इदमेव

अभिप्रेत्योक्तं प्रपत्तिविधानशास्त्रे—

अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् ।
प्रायश्चित्तिरियं साऽत्र यत्पुनश्शरणं व्रजेत् ॥

इति । अत्रेतिपदं प्रतिपदोक्तप्रायश्चित्तासामर्थ्यं परामृशति । असामर्थ्यस्य तत्रतत्र नियतत्वात् । नचैतावता पुनः प्रपत्तिविरोधः । संसारमोक्षणार्थत्वात्पूर्वप्रपत्तेस्तादात्विकभगवदपचारोपशमनार्थत्वात् उत्तरप्रपत्तेः । एकफलत्वे हि पुनःप्रपत्तिदोषः । ये तावदस्मदादिवत्कठिनप्रकृतयो भगवदपचारानपि बुद्धिपूर्वान् लेशतोऽनुतिष्ठंति, नच प्रायश्चित्तं चरन्ति । तेषामविधेयपुत्रादीनां पित्रा द्यपराधइव हितैषिणा भगवतैव लघुदण्डप्रदानेनापचारनिवारणं क्रियते । उक्तं चाचार्यैः—

विवेकिनां प्रपन्नानां धीपूर्वागस्यनुद्यमः ।
मध्यानामनुतापादिश्शिक्षा कठिनचेतसाम् ॥

इति । नखलु राजपुत्राणां राजापराधेऽपि भृत्यवद्दण्डकरणम् । ‘लघुर्दण्डः प्रपन्नस्य राजपुत्रापराधवत् ।’ इतिचाभिधीयते । ‘नखलु भागवतायमविषयं गच्छन्ति । इहैवैषां केचिदुपप्लवा भवन्ति कञ्जा भवन्ति काणा भवन्ति अविधेयपुत्रा भवन्ति’ इत्यादि च श्रूयते । ‘परिहरमधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां नवैष्णवानाम् ।’ इत्यादिच प्रसिद्धं यमवचनम् । ‘भवतां भ्रमतामत्र विष्णुसंश्रयमुद्रया ।’ इत्यत्रापि यमवचनं श्रूयते । अतः कृतकृत्यस्याधिकारिणः केनाप्युपायेन सर्वपापमोक्षणं कृत्वा मनोरथसुलभेन वैकुण्ठवैमानिकोन्नीतेन महारथेन स्वात्मानं प्रापय्य सर्वदेश सर्वकालाद्यनुगुण कैङ्कर्य साम्राज्यं प्रयच्छति भगवान् श्रियःपतिरिति सर्वं सुलभम् । अनिष्टनिवृत्तेरिष्टप्राप्तिपर्यवसायित्वात् । ‘मामेवैष्यसि’ इति पूर्वोक्तत्वाच्च । ‘माशुचः’ पूर्वं भवतश्शोकः पुनरधिकारान्तरनिवेशाद्गुणकोटिमाटीकते । इदानीं सर्वज्ञे परमकारुणिके सत्यसङ्कल्पे मयि स्वीकृतभरे पुनश्शोचासिचेदनभिज्ञकृत्यमेवापाद्येतेति भावः ॥

अत्रापि शरणागतिमन्त्रवदमूनि त्रीण्यवान्तरवाक्यान्येकवाक्यतां भजंते । अयमर्थः उपायान्तरानधिकृतस्त्वं सर्वसुलभत्व सत्यसङ्कल्पत्व सर्वफलप्रदत्व करुणादिपारिकर्मितं मामेकमेव शरणमध्यवस्यानुकूल्यसङ्कल्पादिपारिकरपञ्चको-

पेतमात्मरक्षाभरन्यासं कुरु। सर्वशक्तिपरमकारुणिकत्वादिगुणोपेतोऽहं न्यस्त भरं 'त्वां सर्वपापेभ्यो मोक्षयिष्यामि' स्वीकृतभरे मयि जाग्रति त्वंतु निस्संशयस्सुखमास्वेति। तथाचायमत्र विध्यर्थः। सर्वपापनिवृत्तिपूर्वकपरमात्मप्राप्तिकामोऽकिंचनस्तमेव भगवन्तं शरणमुपगच्छेदिति॥

नच भाष्यकारैरेतस्य वाक्यस्यांगप्रपत्तिपरत्वेन योजनायाःकृतत्वा न्न स्वतन्त्रप्रपत्तिपरत्वमिति भ्रमितव्यम्। अयंखलु भाष्यकाराणामभिप्रायः। यथाखलु भगवान् सकलफलप्रदस्तत्रतत्र जोघुष्यते तद्वत्प्रपत्तिरपि सकलफल प्रदायिनी—

अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्।
तदेकोपायता याच्ञा प्रपत्तिश्शरणागतिः॥

इति वचनात्। तथाचायमर्थस्सम्पन्नो भवति। प्रपत्तेस्सकलफलप्रदत्वादङ्गत्वेन निवेशे भक्तियोगादीनपि साधयितुं शक्नोतीति भाष्यकारैरभिधीयते॥

एवं च सति भक्तियोगाद्यनुष्ठानविरोधिप्राचीनपापतरणकामस्य कृच्छ्रचान्द्रयणादि तदुचितोपायान्तराभावेन तत्स्थाननिविष्टा प्रपत्तिर्यथा भक्तियोगादीन् सम्पादयति। एवं सर्वपापतरणकामस्य तदुचितोपायान्तराभावेन तत्स्थाननिविष्टा प्रपत्तिस्स्वतन्त्रासती सर्वपापमोक्षणं करिष्यतीति भाष्यकाराणां हृदयम्। 'यो ब्रह्माणं विदधाति पूर्वं योवैवेदांश्च प्रहिणोतितस्मै तगूँहदेवमात्म बुद्धिप्रकाशं मुमुक्षुर्वैशरणमहं प्रपद्ये' इति श्रुतावेव साक्षान्मोक्षसाधनतया प्रपत्तिविधानात्तदुपबृंहणत्वाच्चरमश्लोकस्य। एतत्सर्वमभिप्रेत्योक्तमाचार्यैः—

सुदुष्करेण शोचेद्यो येनयेनेष्टहेतुना।
ससतस्याहमेवेति चरमश्लोकसङ्ग्रहः॥

इति। विशिष्टानुवादौ च तैरेव प्रकटितौ।

अधिकारं पुरस्कृत्योपायस्य निरपेक्षताम्।
एकशब्देन वक्तीति केचिद्वाक्यविदो विदुः॥ इति।
नैरपेक्ष्यं पुरस्कृत्य विहितस्य लघीयसः।
उपायस्याधिकारन्तु शोकद्योत्यं विदुःपरः॥

इति। द्वयमत्र प्रकाश्यम्। आकिंचन्यं नैरपेक्ष्यंचेति। अत्र तावदेके खल्वा-

चार्यास्सर्वधर्मपरित्यागशब्देन आकिंचन्यरूपमाधिकारमनूद्य मामेकमित्येक-शब्देन नैरपेक्ष्यं प्रकाश्यतइत्याचक्षते। अन्येतु सर्वधर्मपरित्यागवचनेनैव शरणवरणस्य विशेषणत्वेन नैरपेक्ष्यमभिधेयम्। 'माशुच' इति वचनेन उपायान्तरानधिकारनिमित्त शोकप्रतिक्षेपवचनात्तदेवाकिंचन्यमधिकारतया द्योत्यते इति कथयन्ति। उभयेषामाचार्याणामाकिंचन्यं नैरपेक्ष्यमप्यनुमतमिति नकश्चिदर्थविरोधः। केवलं वाक्ययोजनायामेव भेदः॥

नित्यनैमित्तिकं कर्म स्वतन्त्राज्ञानुपालनात्।
प्रपन्नानान्तु कर्तव्यमिति वेदान्तनिर्णयः॥
शरणागतिनिष्ठाहि परमैकान्तिनो मताः।
तेषां कैङ्कर्यरूपेण कर्तव्यं कर्म निर्मलम्॥
इत्येवं भाष्यकारैश्च तच्छिष्यैरपि देशिकैः।
सत्सम्प्रदायनियमस्तत्तन्नित्येषु वर्ण्यते॥

इत्थं प्रमाणाविरोधेन द्वयोरपि पक्षयोरर्थान्तरसम्भवे कैश्चिदाधुनिकैस्सर्वधर्मस्वरूपत्यागरूपार्थान्तरकल्पना प्रमाणविरोधात्प्राक्तनाचार्यग्रन्थविरोधात् आसेतुहिमाचलं श्रीमद्रामानुजाचार्य सिद्धान्तानुष्ठानविरोधात् 'श्रुतिस्मृत्युदितम्' इति स्वाचार्यवचनविरोधात्प्रपत्त्यध्यायएव 'अविप्लवाय धर्माणाम्' इत्यारभ्य 'मनीषी वैदिकाचारं मनसाऽपि न लङ्घयेत्' इति विश्वजगन्मातुर्विष्णुपत्न्या वचनविरोधाच्च प्रामाणिकानां चेतसि न चमत्कारमाविष्करोतीत्येषा दिक्॥

इत्थं यावच्छरीरपातं निरपराधकैङ्कर्यपराणां परमैकान्तिनामनितरसुलभेन देवयानेन परमपदं प्राप्य 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुत्युक्तक्रमेण यथावस्थितस्वरूपाविर्भावपूर्वकासंकुचितब्रह्मानुभवेन तत्पूर्वकेण सर्वदेश सर्वकाल सर्वावस्थोचित सर्वविधकैङ्कर्यलाभेनच नित्यमेवावस्थानमिति 'इमान्लोकान्' इत्यादिश्रुतिः प्रातिष्ठिपत्॥

यत्तु कैश्चिदुच्यते। ज्ञानयोगनिष्ठः केवलोऽप्यर्चिरादिमार्गेण परमपदं प्राप्य भगवन्तं दृष्ट्वा भगवदनुभववैमुख्येन स्वात्मानमेवानुभवन् परित्यक्तपत्नीवत् कोणे कुत्रचिदास्त इति तत्सूत्रभाष्यादिविरुद्धत्वात् बहुप्रमाणाविरोधाद्युक्तिविरोधाच्च नास्माभिरनुमन्यते। 'श्रुतोपनिषत्कगत्यभिधानाच्च' इत्यस्मिन्सूत्रे

ब्रह्मविदामेवार्चिरादिगमनपूर्वकं ब्रह्मप्राप्तिरित्युपपादितम् । दहरविद्यायामपि प्रजापतिवाक्ये जीवपरब्रह्मप्राप्तिरूप फलनिर्देशो जीवानुसन्धानस्य ब्रह्मविद्याशेषत्वेनैवेति भाष्यकारैरभ्यधायि । तद्यथा ब्रह्मविद्याफलत्वेन उपसंहृतमिति तेन ज्ञानयोगस्य ब्रह्मविद्याङ्गत्वे अर्चिरादिमार्गेण परमपदप्राप्त्यादिकमास्ति । कर्मज्ञानयोरङ्गिफलेनैवाङ्गानां फलवत्त्वम् । स्वातन्त्र्ये पुनः प्रकृतिमण्डलएव यत्रकुत्राप्यवस्थाने जीवात्मानुभवः फलम् । तदेवोच्यते भगवता पराशरेणापि— ' योगिनाममृतं स्थानं स्वात्मसन्तोषकारिणाम् । ' इति । अत्र स्थानस्यामृतत्ववचनं चिरकालावस्थानपरम् ॥

अथवा जीवस्वरूपनित्यत्वपरम् । तदातु स्थानमिति च स्वरूपमेवोच्यते । ब्रह्मविद्यायामेवार्चिरादिमार्गेण परमपदप्राप्तिरित्येतदपि तेनैव पराशरेण विशदमुक्तम् ।

एकान्तिनस्सदा ब्रह्म ध्यायिनो योगिनो हि ये ।
तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः ॥

इति । उपायदशायां रामानुजमितिवद्ब्रह्मशरीरभूतस्वात्मानुसन्धायिनो लक्ष्मणपूर्वजमिति स्वात्मशरीरकपरमात्मानुसन्धायिनो वा ब्रह्मध्यायिनएव फलदशायांत्वसंकुचितब्रह्मज्ञानरूपत्वात् सदा ब्रह्मानुभवसिद्धिः । पूर्वोक्तस्य केवलस्य तु नेति विभागः । तस्यापि तत्फलांते ' सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ' इति च्यवनधर्मत्वमुच्यते ॥

तथा च पूर्वकर्मविशेषात्पुनर्विषयानुभवोऽपि न सम्भवतीति च्यवनधर्मत्वं युज्यते । भागधेयपरिपाकविशेषवशात् पुनर्भगवदुपासनमस्तिचेत्फलतयाऽर्चिरादिना भगवत्प्राप्तिरिति तत्त्वविदां निर्णयः । तावता तस्याप्यपुनरावर्तिवचनं युज्यतां नाम कोदोषः, तेन पुराणेषु तद्व्याख्यानेष्वाचार्यग्रन्थेषु ज्ञानयोगनिष्ठस्यार्चिरादिगमनानिषेधो यद्यस्ति तत्तु भक्तियोगद्वारेणैवेति निर्णतव्यम् । न पुनर्भक्तियोगानङ्गभूतज्ञानयोगनिष्ठस्य साक्षाद्भगवत्प्राप्तिरर्चिरादिगमनं च भवति युक्तिविरोधस्तु परमपदं गत्वा भगवन्तं विहाय स्वात्मानमेवानुभवतीति कैश्चिदभिधीयमानः किं सर्वकर्मविनिर्मुक्तः, उत कर्मवशएव वा—अन्त्ये संसार्येव भवति नतु मुक्तः । सर्वधर्मविनिर्मुक्तत्वे पुनः स्वाभाविकस्य असंकुचित

ब्रह्मानुभवस्य सङ्कोचाभावाद्ब्रह्मानुभवविच्छेदएव न स्यात्। स्वाच्छन्द्यादेव परब्रह्मानुभवं मुक्त्वाऽवतिष्ठते केवलइति हास्यमेतत् ॥

सर्वकर्मविनिर्मुक्तस्य परब्रह्मानुभवविच्छेदरूपमहानर्थप्रवृत्त्यसम्भवात् ईश्वरएकएव तस्मिन्विषये निगृह्णाति तेन तदनुभवविच्छेदइति दुर्वचम्। ईश्वरो निष्कारणमेव कुत्रचिन्निगृह्णातिचेत् तस्य निर्हेतुकनिग्रहस्स्यात्। सतु महान्दोषः सकारणंचेत्कर्मैवहि कारणं तन्निवृत्तमेवेति प्रागेवोक्तम् ॥

तदेकदेशानुवर्तने मुक्तिरेव नभवेदित्यादिदोषसहस्रेण दुष्टमेव। तस्माद्यः परमैकान्ती भक्तिप्रपत्त्योरन्यतरोपायेन भगवन्तं प्रसाद्यावतिष्ठते सएव हि सिद्धोपायनिष्ठः सचार्चिरादिमार्गेण परमपदं प्राप्नोति, भगवन्तं प्राप्य भगवदनुसारिभिः कैङ्कर्यकलापैस्सर्वतो विलसतीति समञ्जसमेतत् ॥

विमलमतिविशेषाद्वीक्ष्यहेयान् पुमर्थान्
स्थिरविनिहितबुद्धिर्यस्तु कैवल्यमुक्तः।
पुनरपि च भवेत्सा संसृतिस्तस्य काले
हरिभजनविपाकान्मुक्तिरेवाथवास्यात् ॥

वरुणनिलयकन्या वल्लभस्यैव पादे
शरणवरणवाणी तत्पराणां नराणाम्।
चरणमनितराणां निर्मलं निर्मलानाम्
शरणमिहपरत्राप्यन्वहं सम्प्रतीमः ॥

तस्माद्भवन्तमनवद्यमनन्तपारं सर्वज्ञमीश्वरमखण्डमकुण्ठधिष्ण्यम्।
निर्वाणधीरहमिव वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये ॥

श्रीमत्त्रय्यन्तसिद्धान्त देशिकेन्द्रस्य सूनुना।
रहस्यत्रयसारार्थो वरदार्येण वर्णितः ॥

इति विश्वामित्रकुलोद्भूतेन निखिलकवितार्किकचूडामणिना
सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना
कुमारवेदान्ताचार्येण विरचिते
श्री म द्र ह स्य त्र य सा रा र्थ सं ग्र हे
चरमश्लोकाधिकारस्तृतीयः

श्रीः

श्रीहयवनदलक्ष्मीनारायणाभ्यां नमः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमते रङ्गनाथब्रह्मतन्त्रपरकालमहादेशिकाय नमः

श्रीमद्रङ्गनाथपरकालमहादेशिकैः पूर्वाश्रमे विरचितः कारिकारूपो

श्री र ह स्य त्र या र्थ सं ग्र हः

श्रियःपतिं तत्पदपङ्कजस्पृहा तृणीकृतान्यं यतिशेखरं तथा ।
तदीयमाहानसिकस्य पौत्रजं गुरुं श्रितं श्रीश्रुतिमौलिदेशिकम् ॥

गुरून्मम श्रीपरकालदेशिकान् प्रणम्य तद्दर्शितवर्त्मना सता ।
विरच्यते मन्दबुभुत्सुबोधनक्षमो रहस्यत्रितयार्थसंग्रहः ॥

सत्सङ्गतःसंसृतिरागहीनैः कर्मादियोगाशकनेनदीनैः ।
मुमुक्षुभिः सद्गुरुवीक्षणेन श्रीशे भरंन्यस्य कृतस्वकृत्यैः ॥

सर्वागमान्तोत्तमसारभूतश्रीमद्रहस्यत्रितयार्थएव ।
सदाऽनुभाव्यो भवितुं कृतार्थैस्सत्त्वोत्तराणामिति सम्प्रदायः ॥

आद्यं रहस्यं द्विचतुष्कवर्णं द्वयं द्वितीयं चरमोपदेशः ।
किरीटिसारथ्यकतत्पथीयमिदं रहस्यत्रयमित्यवेयात् ॥ ५ ॥

स्वाभाविकं स्वस्यपरस्य शेष शेषित्वमाद्योऽत्रभनुःप्रकाश्य ।
रुचिं त्वरामप्यभिवर्ध्य मुक्तिफलेऽधिकारस्य करोति पूर्तिम् ॥

अकिंचनस्याप्तवतोऽधिकारं सम्यक्पुमर्थार्थनयासमेताम् ।
प्रपत्त्यनुष्ठानविधां द्वितीयं रहस्यमाविष्कुरुतेऽद्वितीयम् ॥

अपेक्षितार्थान्निरपेक्षतादीन्प्रकाश्य सर्वाघविमुक्त्युपायम् ।
रहस्यमन्त्यं सुकरं तुरीयं विधाय निश्शोकयति प्रपन्नम् ॥

किंचाद्य मन्त्रोऽखिलशेषशेषि तत्वावगत्या जनुषाऽऽत्मसत्ताम् ।
आपादयन् धारकतामुपैतीत्याचक्षते ब्रह्मविदां वरिष्ठाः ॥
न्यासप्रवृत्त्यावहधीविशेषोपचायकं पोषकमात्मसत्ताम् ।
उपेयुषस्सन्त उशन्त्यशेष श्रोतव्यगर्भं चरमोपदेशम् ॥ १० ॥
उक्त्या सकृत् दिव्यपुमर्थहेतुस्सदाऽनुसन्धानकृतेर्मुमुक्षोः ।
कृतार्थभावं प्रदिशद्धि मन्त्ररत्नं परं भोग्यमुदीरयन्ति ॥
एतद्रहस्यत्रयआदिमस्य व्याख्यानरूपं भवति द्वितीयम् ।
तृतीयमस्येत्यनयोःपदानां द्वैगुण्यतोऽर्थस्य वशेनचाहुः ॥
अष्टाक्षरोत्रापरिमेयभूमा बहुप्रमाणप्रमितोऽविगीतः ।
सर्वेप्सितार्थप्रदएव कश्चिन्नचास्य एतत्सदृशोऽस्ति मन्त्रः ॥
फलं समाप्नोत्यसकृत्पठन्नृचो यजूंषि सामानि च यत्परिश्रमात् ।
समश्नुते तत्फलमञ्जसा सकृज्जपन्निमं वैभवमस्यहीदृशम् ॥
उपोत्तमाद्यद्वितये उदात्ते स्यातां तृतीयं स्वरिते तथाऽन्त्यम् ।
प्राचीयते तुर्यतमः परं च निहन्यते षष्ठमिति स्वरोऽत्र ॥ १५ ॥
वेदाद्यमाद्यं हृदयं द्वितीयं नारायणायेति पदं तृतीयम् ।
इत्थं रहस्ये प्रथमे पदानां त्रयं समाम्नातमथर्वशीर्षे ॥
चतुर्थवर्णस्य तथाऽङ्गनानां तारस्वरोऽन्ये विधयश्च नस्युः ।
बीजेन वस्वक्षरइष्टएषां बीजं भवत्यत्र सबिन्दुकारः ॥
तारान्वितो वैदिकएषमन्त्रस्तारेण हीनो यदि तान्त्रिकस्स्यात् ।
त्रैवर्णिकानां त्वधिकारआद्ये समस्तवर्णाधिकृतिर्द्वितीये ॥
यदा चतुर्थ्या प्रणवेन हीनः तदैतदीये रसवर्णभागे ।
मध्येऽधिकारं श्वपचादयोऽपि गच्छन्ति वाराहवचोऽत्र मानम् ॥
वर्णत्रयात्माऽदिमभत्र मन्त्रे विद्यात्पदं यच्छ्रुतिरेवमाह ।
ओङ्काररूपं समभूदकारोकारौ मकारश्च समेत्य सन्धिम् ॥ २० ॥
तत्राखिलस्य त्रिविधोऽस्य हेतुस्सर्वप्रकारैरपि रक्षकश्च ।
निसर्गशेषी चिदचिच्छरीरो भवत्यकारस्य पतिश्श्रियोऽर्थः ॥
लुप्ता चतुर्थी ततउत्तरात्म तत्वार्थकत्वे प्रणवस्य वक्ति ।
तादर्थ्यमात्मार्पणतत्परत्वपक्षेऽस्य सा शंसति सम्प्रदानम् ॥

स्फुटीभविष्यत्यनयोः परस्तात् द्वितीयमाद्यं तु निरूप्यतेऽत्र ।
शेषत्वरूपं तदुदीरितन्त्रे निर्वच्मि तद्भाष्यकृदुक्तरीत्या ॥
परं गतायातिशयाययोऽर्थः केनाप्युपादीयतएषशेषः ।
शेषीपरस्स्वातिशयायसर्वश्श्रीपत्युपात्तश्चिदचित्स्वमस्य ॥
एवं रमाया अपि शेषएव पत्न्या अपि स्वंखलु वस्तु पत्युः ।
रमा च नारायणशेषभूता पत्नीहि पत्युः परिदृश्यते स्वम् ॥ २५ ॥
तथा च सैकोनसमस्तशेषिण्यशेषशेषो हरिरेकएव ।
एतच्च सर्वं भगवत्प्रणीतशास्त्रादिषु स्पष्टतरं प्रतीयात् ॥
इत्थं शरीरं च हरेस्समस्तं तच्छेषभूतं नियमेनहीदम् ।
अभापि लक्ष्मास्य हि शेषतैक स्वरूपतैवाखिलक्ष्यगामि ॥
यद्यस्य शक्ये विषये नियन्तुं सर्वात्मना धारयितुं च शक्यम् ।
अभापि तत्तस्य शरीरमित्यप्यन्यानि लक्ष्माणि च दूषितानि ॥
ज्ञानात्मको ज्ञानगुणोऽणुरूपः ततश्शरीरादिविलक्षणश्च ।
स्वस्मै प्रकाशादहमर्थआत्मा जीवो मकारार्थइति प्रतीयात् ॥
उकारएवेन समाभिधेयः श्रौतप्रयोगेण मकारवाच्यः ।
नाकारवाच्यादितरस्य शेषो व्यवच्छिनत्तीतरयोगमेवम् ॥ ३० ॥
सिध्यत्यनेनाल्पफलप्रदानां पद्मासहायेतरदेवतानाम् ।
मुमुक्षुभिःप्राप्तविवेकधीभिस्सन्त्याज्यताब्रह्मशिवादिकानाम् ॥
सर्वान्तरात्मा हरिरेव देवैरिन्द्रादिभिः कञ्चुकितस्समर्च्यः ।
अवश्यकर्तव्यनिजक्रियाभिस्सुधीभिरैकान्त्यविघातभीतैः ॥
इन्द्रादिशब्दाःपरमेश्वरत्वमुखैर्गुणैश्श्रीदयितं वदन्ति ।
योगेन साक्षादपि जैमिनीयं मतं च विद्वद्भिरिहावसेयम् ॥
ब्रह्मादिदेवान्तरवर्जनं च तदीयपर्यन्तमवश्यकार्यम् ।
सक्तं पुमांसंहि तदीयसङ्गस्तद्देवतासु प्रवणं करोति ॥
उकारवाच्या कमलेतिपक्षे श्रौतेऽत्र लुप्तं वचनं द्विपूर्वम् ।
षष्ठ्याश्चतुर्थ्या अथवेहशाब्दी श्रीशेषताऽर्थस्त्ववधारणार्थः ॥ ३५ ॥
नमः पदं स्याद्द्विविधं सखण्डाखण्डात्मना वृत्तिरपि त्रिधाऽस्य ।
सूक्ष्मापरेति द्विविधासखण्डे स्थूलामता वृत्तिरखण्डएका ॥

सूक्ष्मोच्यते वृत्तिरिमासु नेति पृथक्पदं तत्प्रतिषेधवाचि ।
पदं ङसन्तं मइतीहजीवं प्राग्वद्ब्रवीति प्रकृतिर्मकारः ॥
शेषत्वसम्बन्धइदं ङसोऽर्थस्तारान्मकारोऽप्यनुषंजनीयः ।
स्वशेषता स्वस्य निषिध्यतेऽत्र तदन्वितेन स्वमहं ममेति ॥
नन्वित्थमत्र प्रतिषिध्यमाना स्वशेषता स्वस्य कथं प्रसक्ता ।
कथं निषिध्येत विना प्रसक्तिं प्रसक्तिपूर्वोहि निषेधइष्टः ॥
मैवं यदा स्वेन विभूषणाद्यैराधीयते स्वातिशयस्तदानीम् ।
प्रसज्यते स्वातिशयावहस्य स्वशेषता स्वस्य निषिध्यतेसा ॥ ४० ॥

इत्थं प्रसक्ता यदितर्हि वस्तुसत्येव सा नप्रतिषेधयोग्या ।
अतो निषेधानुपपत्तिरेषा शङ्कातु भावानवबोधमूला ॥
स्वशेषता स्वात्मनि या प्रसक्ता तस्यानिषेधोऽनुपपद्यमानः ।
स्वस्योपपत्त्यर्थमिदं परत्वं प्रसञ्जकस्य प्रतिषेधएति ॥
प्रसाधनेनातिशयस्य पत्न्याः पतिर्यथा स्वातिशयस्य चापि ।
स्वेनाहि तस्याखिललोकभर्ता प्रधानभोक्ता हरिरित्यवेत्य ॥
सर्वं च तस्यातिशयेच्छयैव कुर्यान्नचात्मातिशयाभिकाङ्क्षी ।
तथा च नात्मातिशयावहस्याप्यात्मस्वताऽऽपद्यत आत्मनोऽस्य ॥
नोद्देश्यता स्वातिशयस्य यत्सा कुक्षौ प्रविष्टाखलु शेषतायाः ।
विचक्षणैराशयएषभाव्यस्स्वस्य स्वशेषत्वनिषेधवाचः ॥ ४५ ॥

यदन्यशेषित्वमपासि तारे स्वस्यापि तत्रान्यतया प्रवेशात् ।
व्युदासि तेनैव निजस्वतापि तद्गोबलीवर्दनयोऽत्र बोध्यः ॥
यद्वान्वितं किंचिदितीहशब्देनाध्याहृतेनैव नमःपदं स्यात् ।
मच्छेषभूतं नच वस्तुकिंचित् पक्षेऽत्र सम्पद्यत इत्थमर्थः ॥
एवंसति स्वीयतया प्रतीतं देहेन्द्रियापत्यगृहादिवस्तु ।
लक्ष्मीपतेरेव निसर्गतस्स्वं नस्वस्य किंतूपधिनेतिसिद्धम् ॥
श्रीशैकनैसर्गिकशेषभावे स्वस्योमिसिद्धेसति यत्स्वकीयम् ।
तस्याप्ययं सिध्यति किंतु सोंऽशे शाब्दोऽखिलोऽप्यार्थइयान्विशेषः ॥
अयं विशेषो नविशेषएवमर्थान्तरं च प्रणवेन सिद्धम् ।
स्वन्तस्वतन्त्रत्वपदेन तस्मादध्याहृतेनात्र नमोन्वितंसत् ॥ ५० ॥

नमे स्वतन्त्रत्वमिति व्युदस्य स्वतन्त्रतां स्वात्मनि पारतन्त्र्यम् ।
प्रकाशयत्योमितु शेषतोक्त्येवंद्वयोरर्थभिदामवेयात् ॥
तत्पारतन्त्र्यं परनैरपेक्ष्ययुक्तृतार्हत्वविहीनतायाः ।
शेषत्वमादौ निरवोचमेव भेदोऽनयोरेष गुरूपदिष्टः ॥
शेषो यथेष्टं विनियोगयोग्यो यथेप्सितं योविनियुज्यमानः ।
सत्वन्यतन्त्रो भवतीत्थमार्या आचक्षते केचन तत्प्रभेदम् ॥
निजाश्रयेण प्रतिपत्तुमर्हं शेषत्वमेवर्छति दासताख्याम् ।
भवत्यतश्चेतनएवदास एषोऽपि भेदोऽत्र विभावनीयः ॥
स्वतन्त्रशेषी कमलासहायस्तस्यात्मवर्गःपरतन्त्रशेषः ।
अर्थोऽयमोमा नमसा च सिद्धस्सर्वागमान्तोत्तमसारभूतः ॥ ५५ ॥

पत्या श्रियस्तेन वशीकृतेन विनात्मनस्स्वस्य पुमर्थसिद्धिः ।
नस्यादतस्तस्य वशीक्रियार्था तन्मूलिकार्थीहच तत्प्रपत्तिः ॥
स्वतन्त्रशेषी विनियुङ्क्तआत्मप्रेमास्पदेषु ह्युचितं चितं च ।
पद्मासहायो नियमेन लोके सुतादिषु स्वं नृपतिद्वदस्तु ॥
अतो भवत्यर्थवशेन सिद्धो मकारवाच्यात्मनि शेषभावः ।
रमासखस्य प्रियतातिरेकमुपेयुषो भागवतान्प्रतीह ॥
एषात्वनन्यार्हरमेशशेषता धीमात्रमूलाहि तदीयशेषता ।
तच्छेषता पर्यवसायिनी ततो नानन्यशेषत्वनिरोधकारिणी ॥
हरेरपि स्वीयजनस्य शेषता स्वशेषताया अपिभूयभीप्सिता ।
यतस्स्वकीयां स्वयमेव सोऽवदत्स्वभक्तभक्तेष्वधिकानुरक्तताम् ॥ ६०

स्वाभाविकीयं हरिभक्तशेषता नोकर्मसम्बन्धसमागतायतः ।
औपाधिकीचेत्यपि सम्मतासतां प्राप्तायतश्श्रीपतिशेषताधियः ॥
शेषोऽप्ययं भागवतो यदिस्यात्तदाद्वयोर्भागवतत्वतौल्यात् ।
यो यस्य शेषस्सतु तस्य शेषीत्यापद्यते भाति विरुद्धमेतत् ॥
मैवं क्रियायामधिकार्यवस्थश्शेषीभवन्नेवहि कर्त्रवस्थः ।
शेषोऽपि तन्त्राभिमतस्तथात्राप्याकारभेदादुभयोपपत्तिः ॥
तथाहि योन्यातिशयावहस्सन् शेषोभवेद्यस्य सआश्रयस्सन् ।
अन्याहितस्यातिशयस्य तस्य शेषी यदिस्याद्वदकोविरोधः ॥

तदीयपर्यन्त रमेशशेष स्वात्मानुसन्धानरसे निमग्नाः ।
ऐकान्तिकत्वं परमं गता ये ते शेषिणो भागवता मतास्स्युः ॥ ६५ ॥
जानन्तिये केवलमीशितव्यमीशं च नैकान्तिकता नभाक्तिः ।
नतत्वधीर्भागवता नतेऽतः प्रसज्यते तेषु न शेषवृत्तिः ॥
स्वस्य स्वशेषत्वानिवृत्ति रात्मनिरूप्यनैसर्गिकशेषतायाः ।
निवृत्तिरात्मीयतयाऽवभातः स्वस्य स्वतन्त्रत्व निवर्तनं च ॥
भरार्पणं भागवतस्वताच प्राधान्यतोऽमी नमसोचिरेऽर्थाः ।
अन्येऽपिचैषामनुबन्धिनोऽर्थास्सुधीभिरूह्याइति सूक्ष्मवृत्तिः ॥
पराख्यवृत्तौ नमसो नमद्वयं पथिप्रधानो भयवाचकं क्रमात् ।
विसर्गईशं परमं रमापतिं वदन्त्यमीषां ामिथइत्थमन्वयः ॥
प्रधानभूतस्स्वयमेव पन्थाः स्वप्राप्तये श्रीदयितःपरेशः ।
श्रीपञ्चरात्रप्रमितोऽयमर्थो नातः कथंतापदमादधाति ॥ ७० ॥
स्वस्यामृतस्यात्मनएषसेतुः इति श्रुतस्सिद्धउपायउक्तः ।
वृत्तावमुष्यावथवच्मि वृत्तिं स्थूलाभिधानां नमसस्तृतीयाम् ॥
गच्छध्वमेनं शरणं शरण्यं सर्वेनमश्चक्रुरितीदृशीभिः ।
प्रमाणवाग्भिर्नमसःप्रवृत्तिरर्थोमतस्साध्यउपायएषः ॥
इत्थं नमो व्याख्यमथो यथामति व्याख्यामि नारायणशब्दमुत्तमम् ।
एषस्वरो व्यंजनभेदतो मतो वस्वक्षरोऽष्टाक्षरमन्त्रसन्निभः ॥
आम्नातएषप्रथमंहि वासुदेवादिनाम्नोऽतिशयाय मन्त्रे ।
नारायणीयेऽत्ययमाद्युपात्तो नामान्तरेभ्यस्ततएव हेतोः ॥
सङ्कीर्त्य नारायणशब्दमात्रं नारायणेतीति विधैरनेकैः ।
प्रमापितस्स्पष्टतरं प्रमाणैरस्यप्रभावातिशयोऽवसेयः ॥ ७५
शब्दोऽयमिष्टःखलु योगरूढः रूढिःप्रसिद्धैव रमानिवासे ।
स्मरन्ति योगार्थमनेकधास्ताः प्रदर्श्यतेऽसाविह संग्रहेण ॥
नृधातुतोऽच्प्रत्ययतश्च सिद्धो नरेति नेत्रर्थकशब्दआह ।
हरिं सनेताह्यखिलस्य पाठादप्येषतन्नामसु तस्य नाम ॥
यद्वा रशब्दो वदति क्षयिष्णुं रीङ्धातुडप्रत्यययोगसिद्धः ।
नेनाऽनरा तस्यकृते समासे नरेति नित्यार्थकशब्दसिद्धिः ॥

नित्यस्तु नारायणएव तस्मादन्योह्यनित्यश्चिदचित्पदार्थः ।
एकस्स्वभावेन विनाशयोगी परस्स्वरूपेण कथं सनित्यः ॥
तत्त्वानि जातानि नरान्निरुक्तात्सर्वाणि नाराणि बुधा वदन्ति ।
अप्तत्त्वमात्रग्रहणं कचिद्यत्तत्त्वान्तराणामुपलक्षणं तत् ॥ ८० ॥
नरस्य सम्बन्ध्यपि नारमाहुरस्मिंस्तु पक्षे गुणविग्रहादि ।
त्रेधा विभक्तं चिदचिच्च सर्वं नरस्य सम्बन्धिहि नारमिष्टम् ॥
अपि स्वभावेन विकारभाजः स्वरूपतस्तद्रहितत्वमात्रात् ।
नित्याहि जीवा नरशब्दवाच्याः तेषांसमूहं च वदन्ति नारम् ॥
इणोऽथवायाद्गतिवाचिधातोः ल्युटाहि सिद्धोऽयनशब्दएषः ।
ब्रवीत्युपायं करणल्युडन्तः कर्म ल्युडन्तःकथयत्युपेयम् ॥
कर्मार्थको बाहुलको ल्युडत्राधारल्युडन्तस्य सएववाच्यः ।
पदद्वयार्थाःपृथगित्थमुक्ताः समासतस्सम्प्रतियोजयामि ॥
नारस्य यः स्यादयनं सनारायणोऽसकौ तत्पुरुषस्समासः ।
लोकात्तु नारायणशब्दपुंस्त्वं लिङ्गंहि लोकाश्रयमित्यभाषि ॥ ८५ ॥
नारस्य सर्वस्य निवासभूतस्तथायथा योग्यमुपायभूतः ।
उपेयभूतो विधृतेश्च हेतुरिश्रयःपतिस्तत्पुरुषेऽयमर्थः ॥
नाराणि यस्यायनमेष नारयणो बहुव्रीहिसमासएषः ।
अत्रायनं व्याप्यमनेन सर्वव्यापित्वमस्यानुगुणं च सौक्ष्म्यम् ॥
सविग्रहाविग्रहभेदभिन्नमन्तर्नियन्तृत्वमपीह सिद्धम् ।
इत्थं समासद्वितयेऽप्यदर्शि सङ्क्षिप्य नारायणशब्दगोऽर्थः ॥
ङेप्रत्ययार्थस्त्विह सम्प्रदानं शेषत्वमस्यानुगुणा च वृत्तिः ।
एषां प्रकृत्यर्थसमन्वयेन लभ्यार्थमग्रे विशदीकरिष्ये ॥
बह्वर्थसंदर्शिनि मन्त्रराजे वस्वक्षरेसन्मणिदर्पणेऽस्मिन् ।
प्रदर्शये संप्रति वाक्यभेदान् तदर्थभेदांश्च गुरूपदिष्टान् ॥ ९० ॥
अष्टाक्षरोऽयं मनुरेकवाक्यं वाक्यद्वयात्मा च मतस्त्रिवाक्यः ।
मतास्तदर्थाश्च दशप्रकारा भेदेन तत्तद्गुरुयोजनानाम् ॥
वाक्यैकतायां प्रणवस्त्वखण्डः संरक्षकत्वादिविशिष्टवाची ।
नारायणस्तस्य विशेष्यउक्तेष्वर्थेषु वक्तिप्रथमं चतुर्थी ॥

नमस्तु निक्षेपपरं तथा च संरक्षकत्वादि गुणैकधाम्ने ।
श्रीशाय मां रक्ष्यतयाऽर्पयामि नारायणायेत्ययमर्थएकः ॥
परस्वतापादनताऽत्र युज्यते न सम्प्रदानत्व मथापि शेषिणि ।
स्वतस्स्वसंरक्ष्यतयास्ववस्तुनः समर्पणामात्रतएतदुच्यते ॥
बद्धांजलीत्यादिवचोभिरन्तर्गतामुपेयेऽत्र दशाविशेषे ।
अनुष्ठितोपायजनोपजीव्यां शेषीं नमस्यां नमआह वृत्तिम् ॥ ९५ ॥
पक्षेऽत्रयोगान्नमसश्चतुर्थी शेषंतु पूर्वोक्तदिशाऽवसेयम् ।
स्फुटोऽत्र वाक्यस्य समन्वितोऽर्थो वाक्यैकतायामपरोऽयमर्थः ॥
अन्योऽन्यसापेक्षतया स्वरूपोपायेप्सितार्थात्रितयस्य तस्मिन् ।
एकस्यचोक्त्याऽपरमर्थसिद्धमतोऽनुसन्धेयमिहत्रयं च ॥
परंतु शाब्दार्थविभेदमात्रमेवं परत्रापि विभावनीयम् ।
वाक्यैकतापक्षइमौ गुरूक्तावर्थावुभावित्थमदर्शिषाताम् ॥
वाक्यद्वयत्वेऽस्य सतारमन्तिमं स्यादेकवाक्यं पदमान्तरं पदम् ।
एतच्चवाक्यद्वितयं स्वरूपतन्नयासेप्सितार्थार्थपरत्रियोजनम् ॥
तारो नमश्चात्रसखण्डमेव प्रागेव संदर्शितएतदर्थः ।
विभिद्यते किंतु मिथःपदार्थसम्बन्धमात्रं सच बोध्यइत्थम् ॥ १०० ॥
नारायणायेति पदे चतुर्थ्या अर्थाविशिंषन्ति मकारवाच्यम् ।
अकारवाच्यो विशिनष्टि नारायणं प्रकृत्यर्थमुरप्यदोयुक् ॥
ब्रवीति शेषत्वमियं चतुर्थी स्वरूपतात्पर्यकयोजनायाम् ।
स्वात्मार्पणेदंपरयोजनायां रीत्योक्तया शंसति सम्प्रदानम् ॥
फलार्थनातत्परयोजनायां सा शेषवृत्तिं पुरुषार्थमाह ।
मकारवाच्यादि समर्पणाद्योर्योगं यथार्हं भजते नमोऽर्थः ॥
संरक्षकत्वादिगुणाकरस्य नारायणस्यैव रमासखस्य ।
ज्ञानादिरूपोऽहमचिद्विधर्मा निसर्गसिद्धा नितरार्हशेषः ॥
अहंनमे स्वं नच वस्तुकिंचिन्मम स्वतःस्वं वपुरिन्द्रियाद्यम् ।
स्वतन्त्रता कापि नमेऽयमर्थो वाक्यद्वयस्यादिम योजनायाम् ॥
अष्टाक्षरे श्रीमति जन्म लब्ध्वा वृद्धिंद्वये प्राप्य तदेकनिष्ठः ।
भवेरिति प्रांच उपादिशन् खल्वस्यैतमेवार्थमभिप्रयन्तः ॥

अष्टाक्षरे जन्मतदुद्भवात्मस्वरूपयाथात्म्यमतिप्रयुक्ता ।
प्राच्यादशाया विसदृश्यनन्यप्रयोजनोपायदशावसेयम् ॥
वृद्धिर्द्वयेऽकिंचनताधिकारानुरूपकर्तव्यविशेषमत्या ।
तदुत्थया दिव्यपुमर्थलब्ध्यै तदीरितोपायपरिग्रहात्मा ॥
सार्थद्वयानुक्षणचिन्तनेनोपायेप्सितार्थान्तरगन्धहीनम् ।
संकीर्तिते तत्रहिते पुमर्थे प्रतिष्ठितत्वंहि तदेकनिष्ठा ॥
अकारवाच्योक्तगुणान्विताय श्रीशाय नैसर्गिकदैवताय ।
नारायणायैव मदात्मरूपं हविर्भरत्वेन समर्पयामि ॥ ११० ॥

नमे भरोऽहं नसमर्पणेपि परानपेक्षा मम कर्तृताऽस्ति ।
वाक्यद्वयस्य ब्रुवतेऽर्थमित्थं स्वात्मार्पणेदंपरयोजनायाम् ॥
फलार्थनातत्परयोजनायां भवेयमित्यर्थनवाचकेन ।
क्रियापदेन प्रतिवाक्यमध्याहृतेन साकं कलयेत योगम् ॥
अकारवाच्याय रमान्विताय नारायणायैवमहम्भवेयम् ।
इतीष्टसम्प्राप्तिपुमर्थयाच्ञाप्रकाशकं तत्रच वाक्यमेकम् ।
अन्येनचानिष्टनिवृत्तिरूपः प्रकाश्यते प्रार्थ्यतया पुमर्थः ।
अहम्भवेयं नममेति वक्ष्ये वाक्यद्वयस्य स्फुटमर्थमस्य ॥
संरक्षकत्वादिगुणार्णवस्य नारायणस्यैव रमासखस्य ।
प्राप्तां स्वतस्सूरिवदेव नित्यं सर्वप्रकारां करवाणि सेवाम् ॥

न स्वार्थमुद्दिश्य नच स्वनिघ्नः कर्ता च भोक्ता च भवेयमस्याम् ।
वाक्यद्वयार्थोऽयमिहान्यथाऽपि नमोऽर्थमाहुस्तमपि ब्रवीमि ॥
अध्याहृतेनान्वयमेत्य किंचित्स्यादित्यनेन द्वितयेन साकम् ।
किंचिन्नमेस्यादिति रूपमेतत्प्राप्नोति वाक्यं हृदयं द्वितीयम् ॥
सर्वत्रचार्थे ममतानिवृत्तिद्वाराखिलानिष्टनिवर्तनस्य ।
तत्प्रार्थनायामुपयाति भावं द्विवाक्यतायामिति दर्शितोऽर्थः ॥
अथास्यवाक्यत्रितयत्वपक्षे प्रदर्श्यते देशिकदर्शितोऽर्थः ।
तारोऽत्र वाक्यं प्रथमं द्वितीयं नमश्चतुर्थ्यन्तपदं तृतीयम् ॥
एतेषु वाक्ये प्रथमद्वितीये स्वरूपयाथात्म्यपरे तृतीयम् ।
वाक्यं पुमर्थोपगमार्थनायामिदंपरं रीतिरसाविहैका ॥ १२० ॥

आदावदर्शि प्रथमस्य योऽर्थः सूक्ष्माख्यवृत्तौ नमसश्च येऽर्थाः ।
स्वरूपयाथात्म्यपरेऽत्र तेऽर्थास्सर्वेऽपि वाक्यद्वितयेऽवसेयाः ॥
क्रियापदापेक्षि तृतीयवाक्ये प्राग्वद्भवेयंपदयोजनेन ।
फलार्थना बोधकतामवेयादनिष्टभङ्गार्थनमर्थमार्थम् ॥
न प्रार्थनामर्हति नित्यसिद्धं तादर्थ्यमित्थं विदितं च तारे ।
अतोऽर्थ्यते तत्फलवृत्तिरत्र चतुर्थ्यपीयं तदिदंपरैव ॥
स्वरूपसंशोधकमाद्यमेकमेवात्र वाक्ये अपरे अपिद्वे ।
अभावभावात्मपुमर्थयुग्मयाच्ञापरे इत्यपि वर्णयन्ति ॥
अहं नमेस्यामिति वाऽत्र पक्षे किंचिन्नमे स्यादिति वा द्वितीयम् ।
भवेत् भवेद्वाक्यमनाद्यविद्या कर्माद्यनिष्टक्षययाचनार्थम् ॥
रीत्योक्तयाऽनिष्टनिवृत्त्यवाप्य स्वेष्टार्थनाबोधकमन्त्यवाक्यम् ।
स्वशेषतादेर्विनिवृत्तिराद्येप्यर्थस्वतन्त्रत्वनिवृत्तिरार्थी ॥
अनिष्टभङ्गेसतिभाव्यवश्यामिष्टागमस्स्वस्य किमर्थमर्थ्यः ।
मणिस्स्वमालिन्यनिवृत्तितोऽन्यं नच प्रभोपायमपेक्षतेहि ॥
भावान्तराभावमतेत्वनिष्टनिवृत्तिरिष्टाप्तिरुभे नभिन्ने ।
अतःकथं ते पृथगर्थनीये इत्याक्षिपत्यस्य समाधिरेषः ॥
श्रीशेच्छयैवाखिलवस्तुसत्ता सर्वप्रमाणप्रमितायतोऽतः ।
भव्यापि मालिन्यनिवर्तनेन प्रभामणेस्तन्नियतेच्छयैव ॥
तदीययैवं सहजानुकम्पा रूपेच्छयैवात्मनइष्टमाप्यम् ।
अनिष्टभङ्गाप्यमपीति तस्या उद्बोधनार्था पृथगर्थनाऽत्र ॥ १३० ॥
क्षमस्व मंतुं मम मामकीनमहं धनं दायमवाप्नवानि ।
याच्ञेदृशी सागसआत्मजस्य निदर्शनंचात्र विभावनीयम् ॥
वस्त्वेकमेवार्थविशेषसिध्द्यै भिन्नाकृतिभ्यां पृथगर्थ्यतेचेत् ।
नकोऽपि दोषः प्रसजेत्तदाऽत्र प्रयोजनं वच्मि तथाऽर्थनायाः ॥
संसर्तुरेकप्रतिकूलवस्तुनिवृत्तिरन्यप्रतिकूलरूपा ।
तथाऽनुकूलप्रतिकूलयुग्म निवृत्तिरूपाऽपिहि दृश्यतेऽत्र ॥
मुक्तस्य सर्वप्रतिकूलभङ्गात्सदानुवर्त्यत्यनुकूलमेव ।
पश्चादतःसंसृतिमुक्त्यवस्थे क्रमादनिष्टेष्टतमत्वभाजौ ॥

प्रकाशनायोदितयोरवस्थयोः प्रदर्शितस्यान्विति यस्य धर्मयोः ।
इहार्थ्यतेऽनिष्टनिवृत्तिरीप्सितं तदाप्यमुष्यादरगौरवात्पृथक् ॥
दशोत्तरा पूर्वदशाविनाशश्चैकाश्रयावेव मतौ विभिन्नौ ।
भावान्तरा भावमतेऽपि नास्य दशाभवेदन्यदशाविनाशः ॥
तथा च नारायणनिग्रहादेस्स्वज्ञानसङ्कोचवशादिहेतोः ।
निवृत्तिरेतत्फलतद्विकास कैङ्कर्यवृत्त्याद्यापि भिन्नमेव ॥
तस्मादनिष्टेष्टनिवृत्त्यवाप्ती भिन्ने अभिन्ने अपि तत्र भिन्ने ।
ये द्वे तयोरर्थनमत्रविद्यान्नाभिन्नयोरित्यपरस्समाधिः ॥
किंचाखिलानिष्टनिवृत्तिमात्रमर्थ्येतचेत्प्रस्तरतुल्यतादेः ।
मुक्तौतदास्याद्विशयस्समाभूत् इत्यर्थ्यतेऽवाप्तिरपीप्सितस्य ॥
याच्येतचेदीप्सितमात्रमिन्द्राद्यवाप्तिवद्दुःखविमिश्रतादि ।
शंक्येत मुक्तावपि तन्निवृत्त्यै इहार्थ्यतेऽनिष्टनिवर्तनं च ॥ १४० ॥
स्वरूपसंशोधकमाद्यवाक्यमुपायबोधिद्वितयं ततोऽन्यत् ।
वाक्यत्रयस्येत्यपि योजनेष्टा नकश्चिदत्र प्रथमे विशेषः ॥
परेतु वाक्यद्वितयेऽनुषक्तमध्याहृतं वा पदमात्मवाचि ।
संयोज्यविद्यादुपदर्शितायामर्थां चतुर्थ्यामिव योजनायाम् ॥
उपायमाहादिममेववाक्यं रीत्याऽनयाऽन्यत्तु फलार्थनार्थम् ।
इत्यप्युपादिश्यतयोजनान्यक्रमोद्वयादौ परिदृष्टएषः ॥
प्राग्योजनायां नमसोद्यतेऽर्थो योसावुकारेण समीर्यतेऽत्र ।
योऽर्थश्चतुर्थ्याश्रुतयोदितस्तं लुप्ताचतुर्थी वदतीति बोध्यम् ॥
कण्ठोक्तमेवात्र समर्प्यवाचि पदंद्वयोरप्यविशिष्टमन्यत् ।
फलार्थनावाक्ययुगार्थमाख्यं द्वयस्य पश्चाच्छकलेऽपि वक्ष्ये ॥
शारीरकं शास्त्रमिवात्र मन्त्रे वाक्यत्रयं तत्वहितेप्सितार्थान् ।
श्रुत्यन्तसारान्वदतिक्रमेणेत्यार्यैरुपादिश्यपरस्सुपन्थाः ॥
तन्त्रादिना स्थूलपराभिधानवृत्तिप्रभेदेन वदन्त्युपायम् ।
साध्यं च सिद्धं च नमोऽत्रसिद्धोपायंतु यद्वाऽयनशब्दआह ॥
विद्यादिहानिष्टनिवृत्तिमार्थीं याच्ञापदाध्याहरणादिशेषम् ।
प्राग्वत् परन्त्वत्र विशेषएष या शाब्दता तत्वहितेप्सितानाम् ॥

इत्थं प्रभेदा दशयोजनानां गुरूपदिष्टाइह संग्रहेण ।
प्रदर्शिता विस्तृतिरेतदीया विभावनीया कृतिभिर्गुरूणाम् ॥
प्रकाशयत्येवमपेक्षितार्थान्सर्वांश्च तत्वाद्यनुबन्धिनोऽयम् ।
त्रय्यादिकं वाङ्मयमप्यशेषमस्मार्षुरेतस्यहि कुक्षिसंस्थम् ॥ १५० ॥
एतादृगष्टाक्षरसारवेदी तत्वादिनिष्ठाप्रातिपक्षपक्षैः ।
क्षोभं ह्रदोगाङ्गइव प्रवातयादोविमर्दप्रमुखैर्नयाति ॥
प्रासादमारुह्य महोच्चमीदृशीं प्रज्ञां स्वयं वीतशुगाकुलांछुचा ।
प्राज्ञःप्रपश्यत्यविपश्चितो जनान् शैलंगतो भूमिगतान्नरानिव ॥
महीयते नागपदानुभावो ज्ञानीदृगेकोऽपि च यत्र देशे ।
न व्याधयोजात्वपि तत्र रागद्वेषादिरूपाःप्रचरन्तिनृणाम् ॥
न सम्भवेत् ज्ञानविकासरूप सम्पत्तिदौर्भिक्ष्यमपीहजातु ।
आत्मापहारादिकृतश्च नाहंकारादिरूपाः प्रभवन्ति चोराः ॥
अकारनारायणशब्दतोऽयं प्राप्यं परं ब्रह्मसमस्तशेषी ।
मकारतो नादपराच्चतस्य प्राप्तृंश्च जीवात्मनआहमन्त्रः ॥
सिद्धं च साध्यं च तथाप्युपायं नमःपदेनायनशब्दतश्च ।
प्राप्तेःफलं शेष्यनुभूतिसेवा रूपंचतुर्थ्याश्रुतया ब्रवीति ॥
अज्ञानकर्मेश्वरनिग्रहादिविरोधिवर्गं नमसा व्यनक्ति ।
अर्था अमी पंच मुमुक्षुवेद्याःश्रुतीरिता इत्थमिहावसेयाः ॥
विद्यादिहैवं चिदचित्तदीश तत्वत्रयंचात्र चिदीशतत्वे ।
प्रागीरितेष्वेव पदेष्वचित्तु बोध्यं रशब्दे च नमःपदे च ॥
इत्थं यथासद्गुरुसम्प्रदायं सङ्क्षेपतोऽष्टाक्षरमन्त्रगोऽर्थः ।
प्रदर्शितो मन्दधियाविशेषग्रहाक्षमाणामवबोधहेतोः ॥
एनमर्थमधिगम्यसादरं तत्वदर्शि गुरुवर्यसेवया ।
सन्निवर्त्यविषयान्तरात्मनो भावयेयुरनिशं मुमुक्षवः ॥ १६० ॥

श्रीमद्रङ्गनाथपरकालमहादेशिकैः पूर्वाश्रमे कारिकारूपेण
विरचिते श्रीरहस्यत्रयार्थसंग्रहे
मू ल म न्त्रा धि का रः प्र थ मः

श्रीमतेनिगमान्तमहागुरवेनमः

अथ द्वयाधिकारः

व्याक्रियतेऽथ श्रीपतिशरणव्रज्याप्रकाशि संग्रहतः ।
द्वैतीयीकरहस्यं देशिकसन्दर्शितेन पथा ॥
अष्टाक्षरेऽर्थस्यवशेन सिद्धं शब्देनवोपायविशेषमस्य ।
फलं पुमर्थं च पदे तृतीये तस्योक्तमाह स्फुटमेषमन्त्रः ॥
आम्नायते खण्डशएषमन्त्रो विधीयतेचैकतयानुचिन्त्य ।
श्रुतौ कथानामतएषआर्यैराम्नायमूलो मनुरेव मेने ॥
श्रीपञ्चरात्रे क्रमशोऽस्य वर्णोद्धारादिकृत्वा प्रतिपादितत्वात् ।
अयं मनुस्तांत्रिकइत्यपीष्टस्सर्वेऽपिचात्राधिकृतिं भजन्ते ॥
आप्तोपदिष्ट इति हेतुतआदरार्थं सर्वेश्वरेण गुरुणा प्रथमेन यद्वा ।
श्रीपञ्चरात्रउदितत्वतएषपूर्वाचार्योक्तवाक्यमिति कैश्चन मन्त्रऊचे ॥
असौ मनुस्साधनसाध्यरूपस्यार्थद्वयस्य प्रतिपादकत्वात् ।
एतद्द्वयाख्यां वरणार्पणार्थद्वयार्थकत्वादिति केचिदूचुः ॥
यस्साधनान्तरफलान्तरसङ्गहीनो निष्किंचनो भवविमोचनमाप्तुकामः
एतन्मनावधिकृतिं भजते सएव पूर्णां परेत्वधिकृतोऽपि नतादृशास्स्युः ॥
अस्याभिधेयसमुदायधियैकवारमुच्चारणेन भवसागरतारपारः ।
शास्त्रप्रमापितउदैर्यतचास्ययेन केनेति गद्यवचसा महिमा यतीन्द्रैः ॥
शास्त्रप्रमापितरहस्यतमेषुदेवगुह्येषु मूकबधिरान्धवदेव भाव्यम् ।
हेतुर्नचिन्त्यइहशास्त्रतएवकार्यो विश्वास ईरयति पञ्चमवेदएवम् ॥
खण्डद्वयात्मा मनुरेष तत्र ब्रवीति पूर्वश्शकलःप्रपत्तिम् ।
परःपुमर्थं परमं तदाप्यं प्रत्येकमत्र त्रितयं पदानाम् ॥ १० ॥
प्राहात्र खण्डे प्रथमे समस्तं पदं यदाद्यं पदमत्रपूर्वम् ।
तत्वं परं सर्वशरण्यभूतं नारायणं श्रीपतिमागमोक्तम् ॥
श्रियःपतित्वादितरेष्ववृत्तात्लिङ्गाच्च नारायणशब्दतश्च ।
आम्नायमौळिप्रतिपाद्यतत्वं नयप्रवीणा निरणैषुरेवम् ॥
नन्वत्र नारायणशब्दमात्राच्छरण्यतत्वस्य सुनिश्चयत्वात् ।
श्रीमत्पदेन प्रविभातिनैव प्रयोजनं किंचिदपीति चेन्न ॥

नारायणस्संयुतएव लक्ष्म्या भवत्युपायस्सहधर्मचर्या ।
प्रमाणजातावगतार्थमेतं श्रीमत्पदं बोधयदर्थवद्धि ॥
आकारधीपूर्वकमेव दृष्टमाकारिविज्ञानमतोऽवसेयः ।
आकारभूतां कमलां विदित्वाऽऽकारी हरिः प्राहुरितीह पूर्वे ॥
केचित्तु लक्ष्म्या उपलणत्वमिहोत्तरास्मिन्स्तु विशेषणत्वम् ।
ऊचुर्विनाबाधकमेकरूपशब्दे विभागोऽनुचितोऽयमेषाम् ॥
यो बाधकस्तैरुदभाव्युपायद्वित्वप्रसङ्गोऽत्र विशेषणत्वे ।
परत्र तत्त्वेऽपि भवेदुपेयद्वितेत्यपासि प्रतिबंदितोऽयम् ॥
यद्युत्तरत्राप्युपलक्षणत्वमेव श्रियस्स्वीक्रियते तदा स्युः ।
गुणादिकान्यत्युपलक्षणानि तेषामभीष्टं हि विशेषणत्वम् ॥
इष्येत तेषामुपयोगतश्चेद्विशेषणत्वं शकलद्वयेऽपि ।
स किं रमायां नहि किंतु तत्तदर्थानुरूपोह्युपयोग ऊह्यः ॥

वल्मीकजन्मपरमर्षि हिरण्यगर्भ
श्रीशौनकादि परमात्म महर्षिवाक्यैः ।
श्रीमच्छठारि परदैवतपारमार्थ्य
धीमत्पराशरमुनिप्रवरोक्तिभिश्च ॥ २० ॥
श्रीयामुनार्ययतिशेखरकूरनाथ
भट्टार्यमुख्यवचनैरपि पञ्चरात्रे ।
वाक्यैश्च सात्वतमुखैरिव विग्रहादेः
बोध्या श्रियोऽत्र विबुधैरुपयोगभेदाः ॥

अतो विशिष्टो गुणविग्रहाद्यैरपि श्रियोपेयवदप्युपायः ।
विशिष्टवस्त्वेकतया स एकः पत्न्येव युक्तो यजमान इष्टः ॥
सर्वाण्युपायस्य विशेषणानि तदेकतायै यदिहातुमिच्छेत् ।
उपायता तस्य तदा कथं स्यादङ्गीकृतं किं न विशेषणं तत् ॥
विशेषणेनातिशयात्प्रयुक्ताद्भवेद्विशेष्यस्य नचापकर्षः ।
इति प्रभारत्ननिदर्शनेन विनिश्चितं श्रीगुणरत्नकोशे ॥
बह्वत्र वक्तव्यमथापि किंचिदेवोक्तमाचार्यनिबन्धनानाम् ।
सम्यक्सुधीभिः परिशीलनेन सर्वोऽपि चार्थस्सुशकोऽवगन्तुम् ॥

निरुक्तयषषट्समुदीरिताश्श्रीशब्दस्यहि श्रीमतिपञ्चरात्रे ।
या श्रीयते च श्रयते च साश्रीरित्यस्य तासु द्वितयी निरुक्तिः ॥
स्वोज्जीवनापेक्षिभिरात्मवर्गैराश्रीयमाणां हरिमाश्रयन्तीम् ।
श्रितान् समुज्जीवयितुं स्वयं च द्वय्यानया श्रीपदमाह लक्ष्मीम् ॥
आगस्कृदात्मसु हितैषितयाऽखिलेशे दण्डोद्यतेसति हरावुचितैरुपायैः ।
नीत्वा रुषं शमनमस्य निसर्गसिद्धं कारुण्यमेतदवनोन्मुखमारचय्य ॥
मातृस्वभाव सुतवत्सलताति‌ऽरेकात्तेषां श्रियःपुरुषकारतया स्थितायाः ।
श्रीशब्दतः फलति निर्वचनद्वयेऽस्मिन्नुत्कर्षइत्युदितएक इहार्थआर्यैः ॥
दुष्प्रापचेतनमपेक्षितदानदक्षमिच्छन्नवाप्तुमपरं तदवापनार्थम् ।
सापेक्षचेतनउपायतया वृणीते यं चेतनं पुरुषकारइतीर्यते सः ॥ ३० ॥
अर्थस्वभावाद्गुरुभारतीभिरनुष्ठितेलौकिकदर्शनेन ।
श्रुतिस्मृतिभ्यामपि देशिकेन्द्रैः प्रादर्शि लक्ष्म्या घटकत्वसिद्धिः ॥
सेव्या सर्वैरीश्वरं सेवमानेत्येवंभावस्तन्निरुक्त्योर्यदा स्यात् ।
उक्तं सर्वस्वामिनीत्वं तदा स्यात् सर्वाधीशस्वत्वमप्यत्र लक्ष्म्याः ॥

सर्वैर्वस्तुभिराश्रिताऽश्रितवती तानिस्वयंदेतिचेत्
भावो निर्वचनद्वयस्य कथितं नारायणाद्यैः पदैः ।
विष्णोर्वैभवमत्र तस्य गदितं पत्न्या अपिस्यात्तदा
गद्यादौ जगदुश्श्रियं भगवतीं श्रीभाष्यकाराअपि ॥

एवं शृणोतीति निरुक्तेरका षण्णां तथा श्रावयतीतिचान्या ।
एतन्निरुक्तिद्वितयस्यचापि त्रेधाऽऽशयो वर्णित इत्थमार्यैः ॥
सर्वेश्वरस्य भववारिधितारकस्य नारायणस्य चरणाम्बुरुहद्वये नः ।
दीनान् जगज्जननि संसृतिसागरान्तर्मग्नाननन्यशरणान्घटयाऽनुकम्प्य ॥

श्रुत्वाऽऽर्तघोषमिति नम्रजनस्य देवं
विज्ञाप्य कान्तमखिलेशमदःपदाब्जम् ।
नीत्वा जनं त मपयापयतीयमार्तिम्
तस्यामुनैक इति वर्णित आशयोऽस्य ॥

अत्र निर्वचनयोरपि द्वये पूर्ववत्पुरुषकारता श्रियः ।
तत्परत्वविषयत्वमेति यत्ख्यापितं पुरुषकारचेष्टितम् ॥

एकं पदद्वन्द्वमुपाश्रयन्ते परायणं येखलु मामकीनम् ।
देव्युद्धारिष्यामि भवाम्बुधेस्तान् स्वयंहि धर्मःपरआनृशंस्यम् ।।
इत्यादिकं पत्युरियं निजस्य मुखान्निशम्यावसरेऽमुनाऽपि ।
स्वयं कपोतेन यथा कपोती संश्रावयत्येषपरोऽस्य भावः ।।
श्रुत्वा हरेर्लोकहितत्वमेषा दशाननायेव हितोपदेशम् ।
अदस्थितेभ्यःप्रतिकूलवृत्तौ करोति भावोऽस्य तृतीयएषः ।। ४० ।।

श्रृणाति दोषानिति दर्शितान्या निरुक्तिरस्य श्रियउक्तमत्र ।
भवत्युपायेऽधिकृतां जनानां विरोधिकर्मादिनिवर्तकत्वम् ।।
मूर्तिं दधत्या दययेव देव्या लक्ष्म्या सहैवाखिललोकरक्षः ।
वेदान्त सर्वास्तिकदर्शनेषु गीतो हृषीकेश इतीदृशोक्त्या ।।
अजस्र सौरभ्ययुतप्रसूनोपरिस्थिता पापनिवर्तनीति ।
योगीश्वरश्रीशठवैरिदिव्यसूक्त्या च संदर्शितमेतदस्याः ।।
नमद्गुणानां स्वगुणैर्दयाद्यैः कैङ्कर्यपर्यन्तविपाकमेषा ।
आधत्त इत्याह गुणैर्जगद्या श्रीणाति सा श्रीरिति निर्वचोऽन्यत् ।।
चित्तेविधाय विभवं श्रियईदृशं श्रीरित्येवनाम तव देविकथं वदामः ।
त्वामित्यवादिषुरुदारहृदग्रगण्याश्श्रीमन्मुनिप्रवरयामुनदेशिकेन्द्राः ।।
अर्थेष्वमीष्वीशितुरत्र खण्ड उपायताया उपयोगभाजः ।
अर्थाविभाव्याश्शकलेपरस्मिन्नुपेयतायामुपयोगिनोऽर्थाः ।।
प्रत्ययो मतुबनेकवाचकस्सम्मतोऽपि विदितं प्रमाणतः ।
अत्र शंसति सहश्रिया हरेर्नित्ययोगमुपयोगवत्त्वतः ।।
श्रीवामनो वर्णिदशाङ्गतोऽपि कृष्णाजिनेनावृतवान्वधूं स्वाम् ।
वक्षस्थलस्थामिति नित्ययोगस्थितिश्श्रिया तद्दयितस्य बोध्या ।।
एतेन नित्ययोगेनापेक्षितएवकाल आश्रयणम् ।
नारायणस्य सिध्यति विरचितमन्तोरपि जनस्य ।।
श्रीपतिमत्र श्रीमच्छब्दस्साधारणोऽप्यभिदधाति ।
भातोऽप्यविशेषतया यदिह श्रुतितोऽप्यशेषि मतुबर्थः ।। ५० ।।

श्रियस्समस्ताश्रयणीयभूत जगज्जनन्याःपतिरित्यनेन ।
प्रकाश्यमानौभवतः परत्वं सौलभ्यमप्यत्र गुणौ तदीयौ ।।

श्रियःपतिं बोधयतान्यनाम्ना श्रीमत्पदेनैव शरण्यतत्त्वम् ।
शक्यं विनिश्चेतुमतोऽत्र नार्थो नारायणेत्यस्य पदस्य मैवम् ॥
शरण्यतत्त्वस्य न निर्णयाय पदं तदत्रापितु तद्गुणानाम् ।
उपायतायामुपयोगभाजामावेदनायेति तदर्थवत्त्वम् ॥
नरस्य संबन्धितयाऽत्रनारशब्दस्तदीयं गुणजातमाह ।
नारायणोऽस्यायनमित्यवेयाद्व्युत्पत्तिमाधारइहायनार्थः ॥
कारुण्यवात्सल्य समस्तवित्त्व समस्तशक्तित्व कृतज्ञभावाः ।
स्वामित्व सौलभ्य सुशीलसत्यसङ्कल्पता स्थैर्यवदान्यभावाः ॥
पूर्णत्वमेतत्प्रमुखाः पदेऽस्मिन् गुणैरनन्तैरपि संयुतस्य ।
संरक्षणैकान्ततयाप्रधानभूताश्शरण्यस्य गुणा विभाव्याः ॥
स्वरूपमेषामुपयोगभेदं प्रदर्शयामीह यथागुरूक्तम् ।
स्वार्थानपेक्षा परकीयदुःखनिराचिकीर्षेति दया निरुक्ता ॥
दोषोयदिस्यादपि नैव मित्रभावेन संप्राप्तमहं त्यजेयम् ।
कथंचनेति स्वयमुक्तरीत्या व्याजेन केनापि भजन्प्रपन्नः ॥
सहेत सर्वानपि मामकीनाननादिकालोपचितापराधान् ।
श्रीकान्तइत्यध्यवसायमेतद्गुणानुसन्धानफलं प्रतीयात् ॥
वदन्ति केचित्परदुःखदुःखिता कृपेति तेषां मत ईदृशी कृपा ।
कथं घटेतेशितुरस्तपाप्मनो जानीहि दुःखस्य वदन्ति पाप्मनः ॥ ६० ॥
रामायणे यद्रघुनन्दनस्य दुःखित्वमूचे व्यसनेषु नृणाम् ।
तद्दुःखितायाअभिनीतिमात्रं स्वस्मिन्जनानामनुरागसिद्ध्यै ॥
परस्य दुःखं समुदीक्ष्य दुःखवान्भवत्यशक्तोयदितन्निवारणे ।
पुमान्समर्थो यदितत्र तत्तदा निवारयत्येव न दुःख्यति स्वयम् ॥
निर्हेतुकत्वे भगवत्कृपायाः सर्वेऽपि मुक्ता युगपद्भवेयुः ।
सहेतुकत्वे सहजत्वहानिः न दृश्यते कापि तृतीयकोटिः ॥
इत्याक्षिपन्नित्यवबोधनीयः स्वरूपतस्संस्तवतः क्रमेण ।
निर्हेतुकत्वं भगवत्कृपायाः सहेतुकत्वं च मतं तदित्थम् ॥
स्वार्थानपेक्षपरदुःख निराचिकीर्षारूपा यदा भगवतस्स्वतएवसिद्धा ।
नापेक्षते कमपि हेतुमियं स्वरूपे निर्हेतुकत्वमिति हेतुतआहुरस्याः ॥

चेतनावनफलोपधायिता संस्तवे कमपि हेतुमैश्वरी ।
चेतनैः कृतमपेक्षते कृपा देशिकैस्तदुदिता सहेतुका ॥
प्राचामाचार्याणां वाचामित्थं सुधीभिरन्योऽन्यम् ।
अविरुद्धताऽवसेया विरुद्धवद्भासमानानाम् ॥
दोषान्समाश्रितानामनवेक्ष्यैतत्परिग्रहे हेतुम् ।
मनसःप्रसदनमीशस्याहुः वात्सल्यमाचार्याः ॥
सर्वज्ञोऽपि श्रीशस्संश्रितदोषान्नपश्यतीत्युक्तिः ।
अपि तानवेक्षमाणः कयाऽपि विधया निवर्त्यैनान् ॥
परिगृह्णात्येव नतान् नच जात्वेनाञ्जहाति लक्ष्मीशः ।
इत्यवबोधनहेतोरिति कथयन्त्यत्र भावमपि ॥ ७० ॥

मां कथमङ्गीकुर्याज्जगदीश इति स्वदोषदर्शनजा ।
चिन्ताऽपयातिनृणां वात्सल्यस्यानुचिन्तया तस्य ॥
यदकथि कैश्चिद्गुरुभिर्वात्सल्यं भक्तदोषभोग्यत्वम् ।
भगवत आत्मीयेषु प्रेमातिशयप्रदर्शि तद्विद्यात् ॥
यथाश्रुतार्थयदितत्परंतत् तदा प्रपन्नानधिकृत्य नैकैः ।
निषिद्धकर्माचरणस्य शास्त्रैः त्यागो विहन्येत विधीयमानः ॥
सर्वेऽपि पूर्वे गुरवःपरे च शिष्टा विहायैव निषिद्धचर्याम् ।
सम्यक्त्विकर्माणि समाचरन्ति पुराऽधुनाऽपीति विरुध्यतेऽत्र ॥
यो वेत्ति युगपदखिलं प्रत्यक्षेण स्वतस्सततम् ।
अज्ञातंते किंचिन्नास्तीत्युक्तप्रकारेण ॥
अर्थानामखिलानांस्वरूपतो धर्मतश्चापि ।
साक्षात्करणं कथितं समस्तवित्त्वं श्रियःपत्युः ॥
पुमर्थवर्गे नमतां प्रदेये विरोधिवर्गे च निवर्तनीये ।
अज्ञातमीशस्य न किंचिदस्तीत्यर्थानुसन्धानफलो गुणोऽयम् ॥
अर्थस्याघटितस्यापि घटनायां समर्थता ।
गुणस्समस्तशक्तित्वमशेषजगदीशतुः ॥
श्रीशो यदा वाञ्छति नित्यसूरिमध्ये तदा स्थापयितुं समर्थः ।
संसारिणोऽस्मानिति निश्चयाय नमज्जनानामुपयुज्यतेऽयम् ॥

कथंचिदेकेन कृतेनतुष्यत्यात्मोपकारेण पती रघूणाम् ।
कृष्णासमाक्रन्दनवागिवर्णं न मे प्रवृद्धं हृदयादपैति ॥ ८० ॥

इत्युक्तरीत्यात्ममनोनुकूलव्यापारमत्यल्पमपि श्रितानाम् ।
मत्वोपकारं परमं स्वकीयमविस्मृतिस्तस्य कृतज्ञभावः ॥
व्यापारमस्मासुकमप्यभीष्टं श्रीशो यदीक्षेत यदा कदाऽपि ।
नवो विजह्यादिति संश्रितानां निस्संयस्थित्युपयुक्तएषः ॥
स्वामित्वमेतत्प्रणवादिनायो व्यशोधि सम्बन्धविशेषएषः ।
स्वामी स्वयं स्वार्थमवत्यवश्यं स्वीयं कयाचिद्विधयेति मत्यै ॥
अपि सनकसनन्दनादियोगिप्रवरमनोभिरसुग्रहं स्वरूपम् ।
सकलमनुजनेत्रगोचरत्वं गमयति यत्सुलभत्वमेतदस्य ॥
निराकरोत्येष गुणोऽधिनाथ दौर्लभ्यमत्युद्धवनिस्पृहत्वम् ।
अदृश्यताऽस्य श्रुतिषूदिता या जनानभक्तानवलम्बते सा ॥
सर्वाधिकस्यापि सतोऽतिमन्दैः निषादशाखामृगवल्लवाद्यैः ।
नीरन्ध्रसंश्लेषकृतिस्वभावमुदीरयन्तिस्म सुशीलभावम् ॥
श्रीशो विभूतिद्वयनायकः क्व मन्दः क्वचाहं गुणलेशहीनः ।
योगो न मे स्यादमुनेति चिन्तां निवार्यवैमुख्यमुपादधानाम् ॥
कर्माणि सर्वाण्यपि सूतदूत विधेयकृत्या बधिकानि तेन ।
अपेक्षणे कारयितुं गुणोसौ विश्वासदार्ढ्यं तनुते नतानाम् ॥

स्वतइतरजनैश्च स्वीय सङ्कल्पितस्य
प्रतिहतिरहितत्वं सत्यसङ्कल्पभावः ।
नच वचनमहंत्वेत्यादि जात्वन्यथा स्यात्
इति गमयतिनम्रानेष विस्रम्भदार्ढ्यम् ॥

श्रितावने सुस्थिरचित्तताऽस्य स्थैर्यं मनस्थैर्यकृदाश्रितानाम् ।
निवार्यमाणोऽप्ययमन्तरङ्गजनैस्त्यजेन्नो न कथं च नेति ॥ ९० ॥

पात्रापकर्षं लघुतामुपायस्योपेयगं गौरवमप्यदृष्ट्वा ।
सर्वस्वदानेऽपि कृते न पूर्णं तन्मन्यतेऽस्यैष वदान्यभावः ॥
अनुबन्ध्यवदीप्सितार्थलब्धेः भगवत्तो विनतैरपेक्षणाय ।
उपयुक्तममुं गुणं प्रतीयाद्दधिभाण्डादिकथाऽत्र भावनीया ॥

समवाप्तसमस्तकामता स्यात् परिपूर्णत्वमिदं हि सिध्यतीतः ।
हरितोपकृते चिकीर्षितं यत्किमपि प्रेमपुरस्सरं विदध्यात् ॥
सर्वेश्वरोऽवाप्तसमस्तकामो नापेक्षते किंचिदपि श्रियश्श्रीः ।
प्रेमाणमेवापितु संश्रितानां निरीक्षमाणो भवति प्रसन्नः ॥
अतःप्रसत्त्यै परमेश्वरस्य यथाऽधिकारं विहितं प्रमाणैः ।
हार्देन किंचित्करणं विधातुमुद्योजयत्येषगुणो मुमुक्षून् ॥
इत्थं शरण्यस्य गुणा निरुक्ताः केचित्तथाऽदर्श्युपयोग एषाम् ।
शरण्यभावानुगुणाःपरेऽपि गुणा इहास्य स्वयमेव भाव्याः ॥
ईदृग्गुणे श्रीमतिसर्वशेषिण्यशेष संरक्षण बद्धदीक्षे ।
स्थितिर्हि युक्ता प्रतिकूलवृत्तिं त्यक्त्वाऽनुकूलाचरणंतु कृत्वा ॥
तद्वाचकेऽतः सविशेषणेऽस्मिन्पदेऽत्र सिद्धौ भवति प्रपत्तेः ।
प्रतीकभूतौ प्रतिकूलवृत्ति त्यागानुकूलाचरणाभिसन्धी ॥
त्वमेवोपायभूतोमे भवेति प्रार्थना मतिः ।
श्रीमन्नारायणस्वामिन्ननन्यशरणस्तव ॥
इत्यादिकं वीक्ष्य गद्यं चैतस्य विवृतं मनोः ।
कृत्वा सम्बुध्यन्तपदे श्रीमन्नारयणेत्युभे ॥ १०० ॥

तवेत्यध्याहृत्यपदं योजयन्तीह केचन ।
पक्षेऽत्राध्याहरेत्तुभ्यं पदं शकलउत्तरे ॥
अन्यैश्चरणशब्दान्तमैकपद्येन योजितम् ।
पक्षयोरनयोरर्थे न विशेषोऽस्ति कश्चन ॥
चरणावितिशब्दोऽयमुपलक्षयति श्रियः ।
पत्युश्शुभाश्रयं नित्यं दिव्यमङ्गळविग्रहम् ॥
नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर ।
यस्यास्ति सत्ता हृदये तस्यासौ सन्निधिं व्रजेत् ॥
इत्यादिषु प्रसिद्धाहि ज्ञातव्येषु प्रधानता ।
नित्यविग्रहयोगस्य परत्वस्यापि शार्ङ्गिणः ॥

तस्मात्सौलभ्यान्वितपरतामनुसन्दधीत तस्यात्र ।
श्रीमन्नारायणपदइहयोगं विग्रहस्य नित्यस्य ॥

दिव्यात्मरूपं प्रागुक्तगुणांश्चाविदुषामपि ।
स्वगोचरधिया नॄणां धीसंकोच निवर्तकः ॥
शुद्धसत्त्वद्रव्यमयः परत्वसुलभत्वयोः ।
व्यंजको लक्ष्यतामेति श्रीपतेर्दिव्यविग्रहः ॥
ईदृक्प्रधानताव्यक्त्यै श्रियःकान्तस्य विग्रहः ।
गुणेभ्यः प्रथमं गद्ये जगदे यतिशेखरैः ॥
श्रीमत्कालिप्रमथनाअपि दिव्यात्मवेदिनः ।
ईशस्यापि प्रियतमे स्वरूपात्तस्य विग्रहे ॥ ११० ॥

भोग्यत्वातिशयज्ञास्तदनुभूत्यभिसन्धिना ।
स्वात्मानमीशविषये प्रोचुर्देहात्मवादिनम् ॥
पापं हरति यत्पुंसां स्मृतं सङ्कल्पनामयम् ।
तत्पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखम् ॥
रूपौदार्यगुणैःपुंसां दृष्टिचित्तापहारिणम् ।
इत्याद्युक्तप्रकारेण विदुरेनं शुभाश्रयम् ॥
हेयप्रतिभटतावा संसारनिवर्तनक्षमत्वं वा ।
शुभताऽऽश्रयतातु सुखग्रहणार्हत्वं विभाव्याऽस्य ॥
आश्रयत्वेऽपि बद्धानां शुभत्वं नैव विद्यते ।
नाश्रयत्वं शुभत्वेऽपि स्वरूपस्य रमापतेः ॥
अपगतभवबन्धानां शुद्धानामात्मनां स्वरूपेषु ।
दुर्ग्रहतयाऽश्रयत्वं न विद्यते नोशुभत्वं च ॥
सहकारियोग्यताया विरहेऽप्यत्यन्तकर्म विध्वंसात् ।
परतन्त्रचेतनतया स्वरूपयोग्यत्वसद्भावात् ॥
सविग्रहाणां मुक्तानां नित्यानामपि चात्मनाम् ।
सद्भावेऽप्याश्रयत्वस्य शुभत्वस्य न सम्भवः ॥
तस्माच्छुभताऽऽश्रयते उभे अपि श्रीशविग्रहस्यैव ।
नहि विद्येते जात्वपि तस्मादितरस्य कस्यापि ॥
तस्मादुपादेयतमस्स्वरूपात्स्वामिविग्रहः ।
परावरसुखग्राह्यः प्रेमबोधप्रसाधकः ॥ १२० ॥

विग्रहविशिष्टएवहि शरणव्रज्याविधायिवाक्येऽपि ।
प्रत्यैयत लक्ष्यतया मामिति पदतः श्रियःकान्तः ॥
पञ्चस्वपि परव्यूहविभवादिषु विग्रहः ।
श्रियःपत्युरवस्थासु शास्त्रसिद्धश्शुभाश्रयः ।
दासस्य स्वामिचरणग्रहणस्योचितत्वतः ।
अनतिक्रमणीयं हि चरणग्रहणं विभोः ॥
इत्युक्तविधयाऽधीशकरुणोत्तम्भकत्वतः ।
तवामृतेत्यादिरीत्या भोग्यत्वातिशयेन च ॥
श्रियःपत्युरुपायत्वं तदीयचरणद्वये ।
अभिसंहितमत्रेति विभाव्यं शास्त्रवेदिभिः ॥
लोकविक्रान्तचरणौ शरणंते व्रजंविभो ।
सभ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः ॥
तस्य ताम्रतलौ तात चरणौ सुप्रतिष्ठितौ ।
सुजातमृदुरक्ताभिरङ्गुलीभिरलङ्कृतौ ॥
प्रणतेन मया मूर्ध्ना गृहीत्वाह्यभिवन्दितौ ।
चरणौ शरणं यातस्त्वत्कैङ्कर्यचिकीर्षया ॥
प्रपन्नौघाघविध्वंसि चरणौ शरणं गतः ।
इत्यादिष्वप्यसावर्थःप्रसिद्धइति भाव्यताम् ॥
तमेव शरणं गच्छेत्यादिष्विव विवक्षितम् ।
अत्रापि चरणावेवेत्यवश्यमवधारणम् ॥ १३० ॥
चरणाविति निर्देशः पत्नीवैशिष्ट्यबाधकः ।
इति मन्दैरिदं प्रोक्तं श्रीमच्छब्दविरोधतः ॥
शब्दःस्वरसतः प्राप्तं वैशिष्ट्यं प्रथमश्रुतम् ।
विशेष्यचरणद्वित्वं नहि बाधितुमर्हति ॥
चरणानिति वक्तव्यमिति यच्च प्रसाञ्जितम् ।
ग्रन्धज्ञैरपहास्यंतत्पतिप्राधान्यतोऽन्वयात् ॥
ससम्राजिसपत्नीके सद्वितीयोऽक्ति साहसम् ।
तथात्रेत्यपरामृश्य दर्शितं गुरुसाहसम् ॥

इतीरितमिहाचार्यैरवधेयं प्रपित्सुभिः ।
श्रीमच्छब्दव्याक्रियायां प्रागपीदमुदैरिरम् ॥
उपाये गृहरक्षित्रोश्शब्दश्शरणमित्ययम् ।
वर्तते साम्प्रतंचैव उपायार्थैकवाचकः ॥

उपायपरताऽनेन वचनेन प्रदर्श्यते । एतच्छरणशब्दस्य निषिध्यार्थान्तरार्थताम् ॥

शास्त्रार्थाचरणैर्यथाधिकरणं संप्रीणनस्येशितुः
सर्वानप्यधिकारिणःप्रति फलोपायत्वसाम्ये स्थिते ।
अत्रोपायतया विशिष्य कथनं यद्योतनायेतरो-
पायस्थाननिवेशनात्मशरणव्रज्याप्रकारस्य तत् ॥

सत्यामुपायान्तरभूतभक्तेस्स्थाने प्रपत्ताविह तत्समायाम् ।
स्थाने स्थितिः का पुनरीश्वरस्योपायान्तरस्याभिमतेतिचेन्न ॥
विधाय भक्त्यङ्गतया प्रपत्तिमुपायभावेनच भक्तियोगम् ।
फलस्य लभ्यस्य विनाऽपि तेन लब्ध्यै प्रपत्त्यैव दयापयोधिः ॥ १४०
श्रीशोहि हेतुस्थितएषतेनोपायान्तरस्थानइतीरयन्ति ।
स्थाने स्थितिस्तस्य ऋतेऽपि तस्मात्तत्कार्यकारित्वमितीक्ष्यतेहि ॥
इष्टाय शास्त्रोदितभारवाहे निष्किंचनेनाशकनेन गोप्तुः ।
त्वंमे भवोपायइतीश्वरस्योपायान्तरस्थाननिवेशनं तु ॥
स्वामिन्नुपायान्तरभारमीश दयानिधे मूर्ध्निममानिधाय ।
तदागमिष्यत्फलदानभारं वहत्वमेवेति मतिप्रभेदः ॥
असौहि निक्षेपपदाभिधेयस्सोपायतायां च भरार्पणात्मा ।
अकिंचनेऽङ्गी समुदीर्यतेऽयं स्वनिर्भरत्वावधिरेषभाव्यः ॥
क्वचित्तु निक्षेपउपाययाज्ञा प्रोचे पृथक्स्पष्टतरप्रतीत्यै ।
न्यासेऽथवांऽशत्रितये नियुक्त आत्मार्पणांशादिपरा तदुक्तिः ॥
मत्यर्थकत्वाद्गतिवाचिधातोः प्रपद्यइत्यत्र मतिं ब्रवीति ।
विश्वासनामाध्यवसायरूपां धातुःपदिःप्रेति च तत्प्रकर्षम् ॥

प्रदर्शितं तथाचात्र योपसृष्टेनधातुना । प्रपत्तेस्साध्यभूताङ्ग महाविश्वासनामकम्

राक्षसानामविस्रम्भादाञ्जनेयस्य बन्धने ।
यथा विगलिता सद्यस्त्वमोघाऽप्यस्त्रबन्धना ॥

तथा पुंसामविस्रम्भात्प्रपत्तिः प्रच्युता भवेत् ।
तस्माद्विस्रम्भयुक्तानां मुक्तिं दास्यति साऽचिरात् ॥

इत्येवमेतद्विश्वासदार्ढ्यस्य प्रतिपादिता । अन्वयव्यतिरेकाभ्यामवश्यापेक्षणीयता व्यवसायादृते ब्रह्मन्नासादयति तत्परम् । निस्संशयेषु भूतेषु नित्यं वसति वै हरिः

स संशयान् हेतुबलान्नाध्यावसति माधवः ।
इत्यादिष्वपि विख्यातं व्यवसायस्य वैभवम् ॥
अयं प्रपत्तेः प्रथमक्षणेऽङ्गं भवेत्कदाचिद्यदि मन्द एषः ।
विशेषतोऽनुग्रहणप्रवृत्तस्तच्छेषपूर्तिं विदधीत शेषी ॥

मित्रभावेन संप्राप्तं न त्यजेयं कथं चन ।
इत्यनुक्तानृतवचाश्शरण्यः प्रोचिवान्खलु ॥
अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
तदेवोपायतायाञ्चा प्रपत्तिश्शरणागतिः ॥
त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः ।
शरणागतिरित्युक्तेत्यादिमानानुसारतः ॥
उपायमध्यवस्यामि गोप्तारं कमलापतिम् ।
इति प्रकारेण महाविश्वासस्याभिधानतः ॥
उपायत्वप्रार्थनाऽपि भवत्यत्र समीरिता ।
अस्यामन्तर्गतं विद्याद्गोप्तृत्ववरणं सुधीः ॥
जानीयात्प्रार्थनामेनां विधया पूर्वमुक्तया ।
अकिंचनावनभरस्वीकारप्रार्थनात्मिकाम् ॥
एवं भरन्यसनमप्यवसेयमत्र नैकप्रमाणवचनैस्समुदीर्यमाणम् ।
अर्थात्प्रकृष्टमतिरूपतया पदैर्वा धातोरितिस्म गुरवस्समुदीरयन्ति ॥

नारायणं सलक्ष्मीकं प्राप्तुं तच्चरणद्वयम् ।
उपाय इति विश्वासो द्वयार्थश्शरणागतिः ॥
इत्युक्तिरभियुक्तानां विश्वासस्य प्रधानताम् ।
व्यनक्त्यधिक्रियाकोटौ अङ्गकोटौ च तिष्ठतः ॥
अन्यथा तु विरोधस्स्याद्भरन्यसनबोधिभिः ।
मानैरनेकैः पूर्वेषामाचार्याणां च सूक्तिभिः ॥

यच्च प्रपत्तिर्विश्वास इति विश्वासपूर्वके ।
प्रार्थनेऽर्थे भरतमुन्युक्ते पर्यवसाय्यते ॥
तदभिप्रेत्यचाङ्गेषु प्रार्थनायाः प्रधानताम् ।
साऽपि न्यासाङ्गभूताहि प्रमाणैरवधार्यते ॥
यद्युत्तराख्यातमिहोत्तमाख्यं प्रपत्तिकर्तृप्रतिपादकत्वात् ।
अकिंनत्वाधिकृतिं प्रपत्तेःकार्पण्यरूपाङ्गमपि व्यनक्ति ॥
तस्यायत्तोऽकिंचनएवकर्ता स्वाकिंचनत्वस्यतु योऽनुसंधिः ।
तदेव कार्पण्यमतोऽत्र कर्तृवाच्युत्तमस्सूचयति द्वयं तत् ॥
एवमुपायस्य भरन्यासस्याकिंचनाधिकारस्य ।
उक्त्या सिद्धमिहार्थाद्दुष्करकर्मान्तरानपेक्षत्वम् ॥
अत्रेत्थं शरणपदान्वित प्रपद्ये पदेन समुदैरि ।
गोप्तृत्ववरणगर्भोपायत्वप्रार्थनाऽतिविश्वासः ॥
कार्पण्यमेतदङ्गत्रितयं निष्किंचनत्वसाधिकारः ।
अवयव्यपि रक्षाभरसमर्पणं शब्दतोऽर्थतश्चापि ॥ १७० ॥
आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।
श्रीमन्नारायणपदे सूच्येते इत्यवादिषम् ॥
नैकप्रमाणसिद्धान्यङ्गान्येतानि शास्त्रनिष्णाताः ।
आचक्षते प्रपत्तेरविनाभूतानि पञ्चापि ॥
सम्भावितत्वमेषां कैश्चित्कथितं प्रपत्त्युदीच्यं स्यात् ।
प्राशस्त्यमभिप्रैति क्वचित्क्वचिद्द्वित्रिमात्रोक्तिः ॥
अङ्गेष्वङ्गित्वोक्तेरप्येवम्भाव्यतामभिप्रायः ।
इत्थंहि सर्ववचसां जानीयादेककण्ठत्वम् ॥
इह वर्तमानतायाव्यपदेशोऽनुष्ठितेरभिप्रैति ।
कालं मन्त्रैर्बर्हिर्लवनप्रभृतेरिवेति जानीयात् ॥
कर्तव्यताप्रपत्तेर्विवक्षिता वर्तमानवपुरन्ता ।
विश्वासस्य तदङ्गस्याफलमनुवर्तनं वात्र ॥
स्वेन प्रपत्त्यनुष्ठितिकाले सङ्कल्पितप्रकारेण ।
उपरि तदङ्गतयैवानुवर्तनं वाऽनुकूल्यादेः ॥

पक्षेष्वेतेषु सकृत्कर्तव्यत्वं समीरितं शास्त्रैः ।
प्रतिहन्यते प्रपत्तेः परिकरनिकरेण सहितायाः ॥
इत्थं शरण्यतत्त्वं तद्गुणनिवहोऽप्युपायतानुगुणः ।
शरणागतेस्स्वरूपं परिकरनिकुरुम्बमदसीयम् ॥
अधिकृत्तिरपि प्रपत्तेर्दुष्करकर्मान्तरानपेक्षत्वम् ।
अर्थाःप्रधानभूताः प्रादर्शिषतैतदिह खण्डे ॥ १८० ॥

अखिलेप्सितसाधनप्रपत्तिः निखिलप्रार्थितदानबद्धदीक्षात् ।
कमलानिलयात्फलस्य कस्य क्रियतेऽवाप्तय इत्यपेक्ष्यमाणे ॥
शकलं चरमं विरोधिहीनं पुरुषार्थं परमं फलं ब्रवीति ।
अनुरूपतमं प्रपत्तिकर्तुः परमोदारशरण्यतत्प्रपत्त्योः ॥
उभयविभूतिविशिष्टं प्राप्यं सदपीह शेषदम्पत्योः ।
श्रीमत्पदं प्रधानप्राप्यत्वस्य प्रकाशनायोक्तम् ॥
बह्वर्थमपि प्रकृतेसेव्यत्वादिप्रकाश्य कमलायाः ।
श्रीपदमिह कैङ्कर्यप्रतिसम्बन्धित्वतत्परं भवति ॥
पूर्वोदितप्रकारेण श्रिया सार्धं तदीशितुः ।
नित्ययोगः प्रत्ययेन मतुपाऽत्रापि कीर्त्यते ॥
प्राप्ये प्रतीयमानेऽपि विशिष्टे श्रीमतेपदात् ।
प्रीतिं समुत्पादयन्त्याश्शेषवृत्तिप्रयोजिकाम् ॥
पूर्णस्य गुणसम्बन्धविभूतिप्रमुखैरिह ।
सिध्यै नारायणपदमनुभूतेः प्रयुज्यते ॥
प्रतिपाद्यतेऽत्र शकले शरणं व्रजतोऽर्थनीयमिष्टफलम् ।
नहि तादर्थ्यं भवति प्रार्थ्यं यत्तत्स्वतस्सिद्धम् ॥

तस्मादत्र चतुर्थ्या परिपूर्णानुभवपूर्वकैङ्कर्यम् ।
तादर्थ्यमुखेनाविष्कृतींभवत्यर्थनायोग्यम् ॥
अत्र प्रार्थनावाचकमध्याहार्यं पदं भवेयमिति ।
स्वाभिमतस्य फलस्य प्रपदनकर्त्राऽर्थ्यमानतया ॥ १९० ॥

इत्थमभीष्टप्राप्तिं प्रथमं प्रार्थ्य प्रधानभूतत्वात् ।
नमसाऽनिष्टनिवृत्तिं प्रार्थयतेऽनन्तरं तस्यै ॥

नेति निषेधार्थं पदमिह विद्यान्मःपदं ममेत्यर्थम् ।
स्यामिति वा स्यादिति वा पदमध्याहार्यमत्रापि ॥
नस्यामहं ममेति प्रथमे पक्षे द्वितीयपक्षेतु ।
मम किंचनापि न स्याद्वास्त्विति वाक्यं भवत्यत्र ॥
अनयोरादिमवाक्येनात्मनि ममता निवर्तनमुखेन ।
प्रार्थयते विनिवृत्तिं स्वाधीनस्वार्थकर्तृभोक्तृतयोः ॥
सर्वस्मिन्नपि वस्तुनि विषये ममता निवर्तनद्वारा ।
सर्वानिष्टनिवर्तनमभ्यर्थयते द्वितीयवाक्येन ॥

सर्वानिष्टनिवृत्तौ तात्पर्येऽपि प्रधानतात्पर्यम् ।
प्राहुरिहापि निवृत्तावेव प्रागुक्तकर्तृभोक्तृतयोः ॥
अविवेकिनां भ्रमा ये स्वाधीनस्वार्थकर्तृभोक्तृतयोः ।
इतरफलानामनुभववेलायामत्र जायन्ते ॥
तेषामपवर्गफले तत्त्वज्ञानादसम्भवं ज्ञात्वा ।
तादृशमेव पुमर्थं प्रार्थयतेऽत्रेतिजानीयात् ॥
चोद्यसमाधीनत्रापीष्टप्राप्तावनिष्टविनिवृत्तौ ।
विद्यान्मूलस्य मनोर्विवृतौ संदर्शितप्रकारेण ॥
इत्थं युग्मं वाक्ययोरत्र विद्यादिष्टानिष्टप्राप्तिभङ्गार्थनार्थम् ।
खण्डं प्राक्कूपायबोध्यैकवाक्यं मन्त्रस्तस्मादेषवाक्यत्रयात्मा ॥ २०० ॥

पाश्चात्यं भवदपि वाक्यमत्र पाठस्योत्पत्तेरनुसरता क्रमं क्रमेण ।
अर्थस्य क्रमवशतोऽनुसन्धिकाले प्राथम्यं भजति फलार्थनावबोधि ॥
नहि कोऽप्यविमृश्य पुमर्थं तदुपायस्य विमर्शमातनोति ।
अनपेक्ष्य फलं विनाऽधिकारं तदुपाये नचकस्यचित्प्रवृत्तिः ॥
तदिह प्राधान्येनोपायपरस्यैकवाक्यभूतस्य ।
वाक्यत्रितयस्यार्थं वच्मि समाऽ(ष्टा)क्षरेऽपि रीतिरियम् ॥

सर्वप्रकारसर्वातिशायिभोग्यस्य शेषिणोऽनुपधेः ।
नारायणस्य रमया जात्वपि विश्लेषरहितस्य ॥
चरणाम्भोरुहयुगले सकलं कालं दशासु सर्वासु ।
सकले देशेऽप्युचितां सेवां सर्वां स्वतःप्राप्ताम् ॥

तत्प्रतिबन्धकसर्वानिष्टप्रध्वंसपूर्विकामिच्छन् ।
रचयितुमाकिंचनोऽहं तादृक्परिपूर्णसेवाऽऽप्त्यै ॥
स्वात्मावनभरविषये सान्वयरहितं पदाम्बुजद्वन्द्वे ।
नारायणस्य रमयासाकमयोगेन रहितस्य ॥
न्यसनं स्वरक्षणभरस्याङ्गानां पञ्चकेन सम्पन्नम् ।
कलयामीत्यस्य मनोर्निष्कृष्टार्थोऽनुसन्धेयः ॥
समुत्थितं नैरपेक्ष्यं श्रीशे भरसमर्पणात् ।
एतस्य नमसःप्राहुरर्थं केचन देशिकाः ॥
इदं च निरपेक्षत्वं निर्भरत्वं स्वरक्षणे ।
विवक्षितं तेनचात्र तत्पर्यन्तभरार्पणम् ॥ २१० ॥

तथाचात्रेदमिन्द्राय न ममेत्यादिवाक्यवत् ।
श्रीमन्नारायणायाहमिति स्वभरगर्भितम् ॥
न्यस्यात्मानं तत्र नमइत्यनेन प्रतिषिध्यते ।
स्वस्य सम्बन्ध इत्यत्र पक्षे स्वरसयोजना ॥
श्रीमन्नारायणायाहमिति स्वात्मसमर्पणम् ।
अभिप्रैत्यपि तस्यैव रक्षाभरफले इति ॥
आत्मात्मीयावनभरफलेषु प्रतिपिध्यते ।
नमसा स्वस्य सम्बन्ध इत्यप्यत्र प्रचक्षते ॥
परसम्बन्धाविहितौ स्वसम्बन्धनिषेधने ।
चतुर्थी नमसी अत्र तत्परे सम्प्रयोजने ॥
परानपेक्षकर्तृत्वं प्रपत्तुः प्रतिषेधति ।
समर्पणे नमश्शब्दइत्यप्यत्राशयं जगुः ॥
स्थूलप्रक्रियया ऽर्पणपरमप्येतन्नमःपदं भवति ।
इत्यपि वदन्ति विद्यादार्थं पक्षेऽत्र सूक्ष्मवृत्त्यर्थम् ॥
पूर्वोऽङ्गपञ्चकपरःखण्डः पक्षद्वयेऽत्र विज्ञेयः ।
चरमोङ्गिप्रतिपादी खण्डः पुरुषार्थमर्थतोऽवेयात् ॥
अष्टाक्षरइव मन्त्रे तत्त्वत्रयमर्थपञ्चकं च मनौ ।
एतस्मिन्नापि विबुधैरनुसन्धेयं यथा स्थानम् ॥

प्रादर्शीत्थं संग्रहान्मन्त्ररत्नस्यार्थो मन्दप्रज्ञिसुज्ञानतायै ।
प्रज्ञाशाली देशिकानां निबन्धैस्साध्वभ्यस्तैरस्य विद्यात्प्रपञ्चम् ॥
आकर्णनेन कलयन् कृतकृत्यभावमाम्रेडनेन वितरंश्च कृतार्थभावम् ।
श्रीशप्रपत्तिमनुरेषकरोतु वासमर्थोऽस्य वाङ्मनसयोर्मम सर्वकालम् ॥

श्रीमद्रङ्गनाथपरकालमहादेशिकैः पूर्वाश्रमे कारिकारूपेण
विरचिते श्रीरहस्यत्रयार्थसंग्रहे
द्वयाधिकारो द्वितीयः

अथ चरमश्लोकाधिकारः

यत उद्भवतिस्म पद्यमाप्तं त्रुटिता किंचन शोकमुत्तमार्थम् ।
शरणं तमजं प्रपद्यधर्मं विधिना कृष्णमभूम वीतशोकाः ॥

सम्प्रदायानुसारेण सुग्रहत्वाय संग्रहात् ।
सारभूतोऽथ चरमश्लोकस्यार्थःप्रदर्श्यते ॥

सदवनदुष्कृन्नाशनधर्मस्थापनकृतेऽवतीर्णइह ।
पार्थं रथिनं कृत्वा सारथिभूते स्वयं श्रीशे ।
रचयितु कामे दुष्कृन्नाशं पार्थे तदा विलोक्याग्रे ॥
बन्ध्वाचार्यप्रमुखानवस्थितानुद्यतान्योद्धुम् ॥
शोकभयादिव्याकुलचित्ते श्रेयोवबोधनस्यकृते ।
विज्ञापयति श्रीशं शोकाद्यपनेतुमस्यास्मिन् ॥
याथात्म्यमात्मनस्तद्विदुषोऽनुत्तमपुमर्थलाभाय ।
कर्मज्ञानोपासनरूपान्सद्द्वारकाद्वारान् ॥
उपदिष्टवत्युपायान्तसपरिकरंतेष्वधिक्रियाविरहम् ।
स्वस्यावलोक्य नितरां शोचन्तं पार्थमपदि(दे)श्य ॥

परमपुमर्थस्येतर पुरुषार्थानां च साधनतयोक्तम् ।
अनुकूलवृत्तिसङ्कल्पादि व्यतिरिक्तनिरपेक्षम् ॥
गुह्यतमं नाकसदामप्यपि सुकरं समाधिकविहीनम् ।
शरणव्रज्योपायं साध्यं क्षणमात्रकालेन ॥
सर्वहितैषी गीताचार्यश्श्रीशो दयापयोराशिः ।
श्रोतव्यशेषरहितं चरमश्लोकेन विदधाति ॥ १० ॥
अस्योपायविधायकमर्धं पूर्वं द्वितीयमर्धं तु ।
फलनिर्देशद्वारा तद्विधिशेषं विजानीयात् ॥
तेनोपायविधानप्रधान एषोऽभिधीयते श्लोकः ।
अस्यादिमोत्तरार्धे विवृतीद्वयखण्डयोः क्रमाद्भवतः ॥
शास्त्रैकसमधिगम्योभवति पुमर्थस्य साधनत्वेन ।
यस्तंधर्मपदस्य प्रचक्षतेऽर्थं विजानन्तः ॥
इह धर्मपदं मुक्त्यै प्रागुक्तं भक्तियोगमाचष्टे ।
बहुवचनं तु बहुत्वं सांद्व्यादिप्रभेदतस्तस्य ॥
मत्वा हरिविषयस्थित्यवताररहस्याचिन्तनप्रमुखान् ।
साक्षान्मोक्षोपायान्नसती तैरङ्गिधर्मबहुतोक्तिः ॥
श्रीमद्गीताभाष्यप्रभृतिषु यस्मात्समर्थितं तेषाम् ।
अपवर्गसाधनत्वं सद्वारकमेव नतु साक्षात् ॥
बहुता कपिञ्जलानां पर्यवसन्ना यथाहि तत्रित्वे ।
अत्र तथा माभूदिति सर्वेति विशेषणं धर्मे ॥
अनधिकृतिस्तेषु परित्यज्येत्यत्रावबोध्यते त्यजिना ।
परिमितदङ्गकर्मज्ञानानधिकारसूचकं विद्यात् ॥
एवं च साङ्गभक्तिष्वखिलास्वपियद्यधिक्रियाविरहः ।
शरणव्रजनउपाये तदाऽधिकारं विजानीयात् ॥
अथवा भक्तितदङ्गक्रिया धियां सर्वधर्मशब्दार्थः ।
त्रयमपि परिरिह तस्मिन्व्यनक्ति सर्वप्रकारनैराश्यम् ॥ २० ॥
पूर्णानुष्ठितिशक्तेर्विरहेऽपि यथास्वशक्त्यनुष्ठानम् ।
कुर्यां यदि तादृगनुष्ठित्यामपि मे समर्थता न स्यात् ॥

अनुकल्पान्वोपायान्वोपायानां तदाऽनुतिष्ठेयम् ।
एतादृक्षदुराशाहानं सर्वप्रकारनैराश्यम् ॥
इत्थंचानित्यमिति श्लोके नित्यासुखस्य लोकस्य ।
प्राप्तेरनित्यमसुखं लोकमिमं प्राप्य वर्तमान इति ॥
अनुवाद इति श्रीमद्यतिवरसंदर्शितप्रकारेण ।
अत्रापि सर्वधर्मानुक्तान्संत्यज्य वर्तमान इति ॥
क्रियतेऽधिकृत्य नूक्तिश्शरणव्रजनस्य तद्विधानार्थम् ।
इति गुरुदर्शितमादिममधिकृत्यनुवादपक्षमिह विद्यात् ॥
ल्यपि सति विधिना भाव्यं नचानुवादेन भावितव्यम् ।
इति यत्कैश्चिच्छङ्कितमत्र तदेतेन दूरतोऽपास्तम् ॥
न विधावनुवादे वा विहितो ल्यप्प्रत्ययश्शास्त्रे ।
किंत्वनुशिष्टःकाले पूर्वस्मिंस्तुल्यकर्तृकत्वे च ॥
एवं च यदिस्यात्तत्प्रकृतेरर्थोऽन्यतोऽप्राप्तः ।
सभवेत्तदा विधेयस्स्यादनुवाद्योऽन्यथेति जानीयात् ॥
एवमनङ्गीकरणे संसाराप्तेः प्रदर्शितश्लोके ।
शरणंगतस्तमेव त्रीन्लोकान्संपरिक्रम्य ॥
लशुनं भुक्त्वा चान्द्रायणं चरेदेवमादिवचनेषु ।
लोकाटनलशुनादनमुखस्य च स्याद्विधेयत्वम् ॥
तस्मादिहाधिकारश्शरणागत्या अनूद्यते प्राप्तः ।
अधिकारस्स च भक्त्याद्यधिकृतिविरहस्वरूइत्युक्तम् ॥
भक्त्यादेरधिकारश्शक्तिःप्रमितिस्त्रिवर्णजन्मत्वम् ।
कालविलम्बसहत्वं चत्वार्येतानि मिलितानि ॥
एतत्समूहविरहश्शरणागत्या अधिक्रिया भवति ।
विरहस्स च पञ्चदशप्रकार इत्थं प्रकारास्ते ॥
एकैकस्य निवृत्त्या शक्त्यादीनां द्विकद्विकनिवृत्त्या ।
भवति चतुर्धा षोढा पुनश्चतुर्धा त्रिकत्रिकनिवृत्या ॥
सर्वनिवृत्तिभिरेको वस्तुत एकोऽपि सन्नसौ विरहः ।
भेदात्प्रयोजकानां विरहाणां भिन्न उच्यते गुरुभिः ॥

शरणव्रजनउपाये विश्वासो नास्ति बुद्धिदौर्बल्यात् ।
येषां तेषां भक्तावधिकृतिरित्थं प्रचक्षते केचित् ॥
एवं सति प्रपत्तौ स्वीकरणीयो भवत्यविश्वासः ।
व्यासादिमहर्षीणां भक्तावधिकारिभूतानाम् ॥
यदि सोऽप्युररीक्रियते शरणव्रज्याविधायकानि तदा ।
विश्वसनीयानि कथं भवेयुरन्यैस्तदीयवचनानि ॥
यदि न भवन्ति जनानां विश्वसनीयानि तानि वचनानि ।
शरणव्रजन उपाये कथं तदा ते प्रवर्तेरन् ॥
तस्मादनुतिष्ठन्तश्शक्ता व्यासादयस्स्वयं भक्तिम् ।
विदधत्यकिंचनेभ्यः प्रपत्तिमित्येव सिद्धान्तः ॥ ४० ॥

इष्यत इतरउपायो नरस्य दौर्बल्यतो बुद्धेः ।
एतादृशस्य वचनस्येत्थमुपावर्णि देशिकैरर्थः ॥
निजमधिकारमविद्वानकिंचनो यःपुमाननुष्ठातुम् ।
अभिलष्यति भक्तिं तत्त्याजनहेतोस्सनिन्द्यते तेन ॥
शरणव्रजनाधिकृतेः पक्षोऽनूक्तेः प्रदर्शितइहेत्थम् ।
मानविरोधविहीना अथ विधिपक्षाः प्रदर्श्यन्ते ॥
भक्तौ योग इवाङ्गैः प्रपत्तियोगेऽपि कर्मयोगाद्यैः ।
सापेक्षत्वं प्रसजति तस्येव ब्रह्मविद्यात्वात् ॥
इत्थं प्रसक्तकर्मप्रमुखावयवत्ववारणस्य कृते ।
कर्मादि सर्वधर्मत्यागविशिष्टप्रपत्तिविधिरत्र ॥
त्यागोऽत्र नैरपेक्ष्यं परिस्तु सर्वाक्रियासु सामान्यैः ।
शौचामनादिभिरपि निरपेक्षत्वस्य सूचको बोध्यः ॥
अस्मिन्पक्षे माशुच इत्यत्र निषिध्यमानशोकेन ।
द्योततआकिंचन्यं शरणव्रज्याऽधिकार इत्याहुः ॥
प्रागुपदर्शितपक्षे निरपेक्षत्वं प्रपत्त्युपायस्य ।
वक्त्येकशब्द एतत्तदर्थविवृतौ भविष्यति व्यक्तम् ॥
अधिकार पुरस्कारस्वरूप कार्पण्यनामकाङ्क्षियुता ।
शरणागतिर्विधीयत इत्यप्यर्थं प्रचक्षत इहान्यम् ॥

निष्किंचनत्वरूपामधिक्रियामात्मनः पुरस्कृत्य ।
इत्यत्राभिप्रेतं पुरस्कृतिश्चानुसन्धानम् ॥ ५० ॥

एषविलम्बितधीकोऽप्यर्थोऽनेकप्रमाणसंवादी ।
मानविरुद्धादर्थात्परवाद्युक्तादुपादेयः ॥
शरणव्रजने लघुतासकृत्वमुखहेतुकादविश्वासात् ।
दुर्बलधीरितरस्मिन्नकिंचनो यः प्रवर्तत उपाये ॥
ततएव हेतुतस्तं वांछति तत्राप्रवर्तमानोऽपि ।
तंतामिहोद्दिश्य सततप्रवृत्तिवांछोज्झितप्रपत्तिविधिः ॥
नहि भिद्यते प्रवृत्तित्यागात्यागः प्रवृत्तिविषयाणाम् ।
वांछाया विषयाणां त्यागस्त्यागान्नहीतरस्तस्याः ॥
इत्यप्यदर्शिषातामिहाविरुद्धौ विशिष्टविधिपक्षौ ।
पार्थप्रत्युपदेशःस्यात्कथमन्यं प्रतीति नाशङ्क्यम् ॥
श्रीशस्सर्वहितैषी गीताचार्योऽखिलाधिकारिभ्यः ।
उपदिशतिस्म किरीटिनमपदिश्येतिह्यवोचमेव प्राक् ॥

भक्तेर्यथा प्रपत्त्या सापेक्षत्वं तथा प्रपत्तेश्च ।
भक्त्येति मन्यमानो यदिकुर्याद्भक्तियोगमपि ॥
इतरासहाप्रपत्तिः मारुतिवेधोऽस्त्रवत्तदा विगळेत् ।
तस्मात्प्रपत्तिमितरोपायान्हित्वाऽनुतिष्ठेति ॥
इतरोपायासङ्गासहत्वाविधिना प्रपत्त्युपायस्य ।
ब्रह्मास्त्रतुला सूच्यत इति षष्ठः पक्षइह बोध्यः ॥
इतरानपेक्षतायासपि प्रपत्तेरपेक्षणं स्वाङ्गैः ।
अस्त्येव पूर्वमुदितैर्यथा निजाङ्गैरजास्त्रस्य ॥ ६० ॥

नहि तत्करणं लोके वेदे वा किंचिदस्ति परिदृष्टम् ।
नानुग्रहणे यस्य स्थितिरितिकर्तव्यतासाध्ये ॥
षट्स्वपि पक्षेष्वेषु स्वाहार्णां कर्मणामनुष्ठानम् ।
न विरुध्यते यदेषामनुष्ठितिर्न प्रपत्त्यर्थां ।
स्वर्गाद्यर्थं परभक्त्यर्थं वर्णाश्रमार्थमिति भेदात् ।
त्रिविधं कर्माचरणं प्रचक्षते शास्त्रनिष्णाताः ॥

अमुमुक्षूणां तस्मिन्नुभयविधं कर्मणामनुष्ठानम् ।
स्वर्गप्रभृतिफलार्थं वर्णाश्रमरक्षणार्थमिति ॥
भक्ता मुमुक्षवो ये तेषामपि कर्मणामनुष्ठानम् ।
उभयविधं भक्त्यर्थं वर्णाश्रमरक्षणार्थमिति ॥

निष्किंचनास्स्वतन्त्रप्रपदननिष्ठा मुमुक्षवो येस्युः ।
तेषां तदनुष्ठानं केवलवर्णाश्रमार्थमेकविधम् ॥
तस्माद्वर्णाश्रमयोरुचितानां कर्मणां प्रपन्नजनैः ।
श्रीपतिकैङ्कर्याणां न विरोधः कश्चनाचरणे ॥
शरणागतिनिष्ठानां तदनुष्ठानं यदि प्रपत्त्यर्थम् ।
निरपेक्षता प्रपत्तेस्तदा विहन्येत नह्येवम् ॥
शरणव्रजनापायस्याखिलधर्मस्वरूपसत्यागः ।
अङ्गत्वेन विधीयत इति कथयन्तिस्म केचिदिह ॥
विधिरयमूरीकार्यश्शक्तं प्रत्येव पक्ष एतेषाम् ।
नाशक्तंप्रातियद्विधिरप्राप्तस्यैव तान्त्रिका आहुः ॥ ७० ॥

शक्तस्यैवाप्राप्तस्त्यागोऽशक्तस्य तु स्वतः प्राप्तः ।
तस्माद्भवेत्प्रपत्तौ शक्तस्यैवाधिकारइह पक्षे ॥
एवंसतिप्रपत्तेर्व्याहृतिरखिलाधिकारिकत्वस्य ।
कार्पण्यङ्गमस्यां निष्किंचनताऽप्यधिक्रिया न स्यात् ॥
नित्याशक्तउपायेष्वितरेष्वत्यन्तमीशपरतन्त्रः ।
आत्मेति दर्शयित्वा तेषां त्यागो विधीयतेऽस्येति ॥

परिहास्यमखिलशास्त्रस्ववाक्प्रवृत्त्यादिभिर्विरुद्धत्वात् ।
नघटेत तदा तुल्यन्यायाच्छरणं व्रजेति विहितश्च ॥
नित्याशक्तउपायेष्वितरेष्वात्मेत्यभाषि तेनैषाम् ।
स्थिरतैव कृता भवति स्वानिष्टानूक्तिपक्षस्य ॥

त्यजनस्य विधिरशक्तंप्रती तरं प्रत्यनूक्तिरितिचासत् ।
विध्यनुवादविरोधादर्थस्यैकस्य वाक्यएकस्मिन् ॥
फलवैषम्याभावाद्विरहादधिकारिणोऽपि भेदस्य ।
गुरुलघुनोस्समानधयोर्नखलु विकल्पोऽपि शक्यते वक्तुम् ॥

शक्तस्यापि गुरौ तत्त्यागविशिष्टं लघुं यदि विदध्यात् ।
लघुमपहायोपायं गुरौ न कश्चित्तदा प्रवर्तेत ॥
एवं सति धर्मं गुरुमवबोधयतामशेषशास्त्राणाम् ।
अननुष्ठापकतात्मकमप्रामाण्यं प्रसज्यते दोषः ॥
उपदिश्यगुरूपायान्प्ररोचनार्थं लघोरुपायस्य ।
क्रियते निषेधएषामित्यपि पक्षोऽसमीचीनः ॥ ८० ॥

विदधीरन्यदिशास्त्राण्यनुपायानप्युपायभावेन ।
मोहनशास्त्राणि तदा भवेयुरखिला अपि श्रुतिस्मृतयः ॥
सिद्धिस्तथासति कथं भवेच्छरण्यस्वरूपरूपादेः ।
अपि तस्य बोधकानां शास्त्राणामप्रमाणतापत्त्या ॥
कृषिमणिवाणिज्याद्यैरर्थाकाङ्क्षिणि जने विकल्पोऽपि ।
अधिकृतिभेदादेवेत्येतल्लोके प्रसिद्धतरम् ॥
उक्तैवानुपपत्तिर्विश्वासज्ञानपूर्तिमान्द्याभ्याम् ।
प्रपदनभक्त्यधिकारव्यवस्थितावभ्युपेतायाम् ॥
न्यासादेशदशायां व्यासाद्याः पूर्णबुद्धिविश्वासाः ।
कलुषितमतयः पश्चादुपासतेत्यत्र नेक्ष्यते मानम् ॥
स्वार्थं प्रपत्तिनिष्ठा भूत्वा ते लोकसङ्ग्रहार्थाय ।
चक्रुर्भजनप्रभृतीन्यपीत्यपि क्वापि नोदितं शास्त्रे ॥

अपिचाचरणं भक्तिप्रभृतेस्तेषां प्रपत्तिनिष्ठत्वे ।
स्वाधिक्रियाविरुद्धं कथं भवेल्लोकसङ्ग्रहार्थाय ॥
स्वस्य द्वौ यदि मार्गौ शास्त्रानुमतौ तदा तयोरेकम् ।
लोकाय हितं तेनाचरितुं शक्यं च मार्गमाश्रित्य ॥
तस्मिन्मार्गे लोकं प्रवर्तयति यतसएव यतिवर्यैः ।
श्रीमद्गीताभाष्ये प्रदर्शितो लोकसङ्ग्रहपदार्थः ॥
नहि गृहिधर्माचरणं भवति यतेः लोकसङ्ग्रहार्थाय ।
प्रत्युतविरुद्धमेतत्स्वाधिकृतेः प्रत्यवायमावहति ॥ ९० ॥

एवं प्रपत्तिनिष्ठैः कैङ्कर्यधिया निषिद्धधर्माणाम् ।
कृतिरपि निजाधिकृत्या विरुध्यते प्रत्यवायजननी च ॥

प्रोदितदिशा प्रपत्तावनपेक्षितकर्मणां श्रियःपत्युः ।
कैङ्कर्यधियाऽऽचरणे प्रसज्यते नैव कश्चन विरोधः ॥
वर्णाद्यनुरूपाणां शक्यानामपि समस्तधर्माणाम् ।
त्यागं स्वरूपतोऽत्र न्यासाङ्गतया विधत्त इत्यपि न ॥
वर्णाद्यनुगुणधर्मान् श्रीपतिकैङ्कर्यबुद्ध्यनुष्ठेयान् ।
साधारणान् अहिंसासत्योक्त्याचार्यवन्दनप्रमुखान् ॥
हित्वाऽखिलांश्च धर्मान्पशुमृगपक्ष्यादिवत्प्रपन्नानाम् ।
शास्त्रैर्निषिध्यमानं स्वैराचरणं प्रसज्यते यस्मात् ॥
प्रतिषेधशास्त्रसिद्धप्रतिषिद्धनिवृत्तिरूपधर्मेषु ।
विरहात्स्वरक्षणार्थस्वव्यापारात्मकत्वस्य ॥
अविरोधतः प्रपत्त्या विरोधिभूतप्रवृत्तिधर्माणाम् ।
उज्झितिरेव विधीयत इत्यपि पक्षो न साधीयान् ॥
व्यापार विशेषात्मा निवृत्तिरपि हि स्वरक्षणार्था च ।
त्याज्यत्वं च प्रसजति कैङ्कर्यस्य श्रियःपत्युः ॥
उभयविधानपि धर्मान्हित्वैतद्विधिबलात्प्रपन्नानाम् ।
स्थितिरेव यथाकामं शास्त्रार्थतयोररीक्रियेत यदि ॥
प्राचामाचार्याणामाधुनिकानामपि प्रपन्नानाम् ।
स्यातां तदा विरुद्धौ विहितानुष्ठितिनिषिद्धपरिहारौ ॥ १०० ॥
प्राज्ञेषु सम्प्रदायप्रवर्तकेषु प्रभूतकरुणेषु ।
नहिकल्पयितुं न्याय्यं भ्रान्तिर्वा विप्रलम्भकत्वं वा ॥
यावज्जीवं त्यजनं यदा विधीयेत सर्वधर्माणाम् ।
प्रसजति तदा विरोधो नतु प्रपत्तेरनुष्ठितेस्समये ॥
तस्मादिह प्रपत्तेरनुष्ठितेः कालएव सर्वेषाम् ।
त्यागे स्वरूपतोऽङ्गे भवति न कश्चिद्विरोध इति चेन्न ॥
शरणव्रजनानुष्ठितिसमयासम्भाव्य धर्मसंत्यागः ।
न भवति विधानयोग्यो निषेधइष्टः प्रसक्तिपूर्वो हि ॥
तात्कालिकधर्मोज्झितिविधिर्यदीष्टस्तदा प्रपित्सूनाम् ।
त्याज्यं भवेत्तदानीमुपवीतशिखोर्ध्वपुण्ड्रादि ॥

एवंसति स्वरूपत्यागविधिर्मास्तु सर्वधर्माणाम् ।
तेषूपायत्वमतित्यजनविधौ नो विरोध इतिचेन्न ॥
समुचितमिदं प्रपन्नस्योत्तरकृत्यावबोधि वाक्येषु ।
एतदुपायविधायकवाक्यं नोदीच्य कृत्यपरम् ॥
इहचोपायत्वमतित्यागविधाने फलत्यनुष्ठानम् ।
धर्माणां शरणागतिशेषतयोपायतामतिं त्यक्त्वा ॥
इत्थंसति नहि सिध्येत्स्वयम्प्रयोजनमधीशकैङ्कर्यम् ।
प्रपदननिष्ठस्योत्तरकृत्यं भवतीति सिद्धान्तः ॥
अपिचाभिधीयमानं मानैर्धर्मान्तरानपेक्षत्वम् ।
व्याहन्यते प्रपत्तेर्निष्किंचनताऽधिकारश्च ॥ ११० ॥

अनुपायउपायमतित्यजनविधेर्निष्प्रयोजनत्वेन ।
तद्विधिरङ्गीकार्यो भवत्युपायेषु पूर्वमुदितेषु ॥
शरणव्रजनाङ्गतया तथा च तेषामवश्यकार्यतया ।
अङ्गाङ्गित्वव्यत्ययमात्रं भवति प्रपत्त्युपासनयोः ॥
अङ्गित्वे धर्माणां पूर्णानुष्ठितिरपेक्षितावश्यम् ।
अङ्गत्वेसति तस्या नियमो नास्तीति मन्दोक्तिः ॥
उपसंहारेऽङ्गानां सकलानां काम्यकर्मणस्सिद्धिः ।
नच वैकल्ये तेषामिति हि वदन्तिस्म शास्त्रज्ञाः ॥
तस्मादिह धर्माणां स्वरूपमथवा स्वरूपतस्त्यागः ।
शरणागतिशेषतया विधेयमिति नोचितःपक्षः ॥

तदिह ग्राह्याः प्रथमं कथिताएवानुवादविधिपक्षाः ।
तेषुहि कोऽपि विरोधो न प्रसजति कर्मणामनुष्ठाने ॥
एवं च न्यस्तभरैर्वर्णाश्रमचोदितानि नित्यानि ।
नैमित्तिकान्यपि हरेराज्ञासिद्धानि नियमेन ॥
तदनुज्ञासिद्धान्यपि तन्मन आह्लादमात्रफलकानि ।
दीपारोपणमालाकरणादीन्यात्मनोरुच्या ॥
कर्माण्याचरणीयान्युदितं शास्त्रे प्रकारमनुसृत्य ।
त्याज्यश्च मन्तव इति ज्ञेयो निष्कण्टकःपन्थाः ॥

शरणागतिर्हि साध्योपायःसाध्यं फलं श्रियःपत्युः ।
अनुभूतिशेषवृत्ती इति भेदस्स्पष्टएवतयोः ॥
इदमेकपदं प्रधानवाचीत्यपि पक्षं जगुरन्यमत्र पक्षे ।
उभयोर्विनिवार्यते प्रपत्तेस्तदनुष्ठातुरपि प्रधानभावः ॥
ब्रह्मेशादि सुदुर्लभपदसमवाप्तौ प्रपत्तिरपि लघ्वी ।
सकृदेव च करणीया नहि खलु पर्याप्तसाधनं भवति ॥ १५० ॥
अपितु श्रीशप्रसदनकरणाय व्याजमात्रभूतैषा ।
अभिमतराज्यप्राप्त्यै लिकुचफलस्य प्रदानमिव राज्ञे ॥
श्रीपतिरेव दयालुस्तया प्रसन्नः फलप्रदस्साक्षात् ।
भजनप्रभृत्युपायं स्थलेऽपि विद्यात्प्रकारममुमेव ॥
तस्मात्प्रधानभूतोपायो मुक्तौ सएव नत्वन्यः ।
अयमेकपदेनार्थोऽभिप्रेतो मुख्यवाचिनाऽत्रैकः ॥
फलमतउपपत्तेरिति सूत्रकृताऽप्यर्थएष समदर्शि ।
उदघोषि त्रय्यन्तैरप्यमृतस्यैषसेतुरित्याद्यैः ॥
इदमाशयेन केचित्प्रपदनविषयेऽतिवादमातेनुः ।
सम्वन्धबुद्धिमात्रं प्रतिपत्तिस्साधनस्य सिद्धस्य ॥
अधिकारिणो विशेषणमनुमतिमात्रं निवारणाकरणम् ।
चित्तसमाधानमाचिव्यावृत्तिश्चेतनस्य कृत्यमिति ॥
दोषा बहुप्रकाराभवन्त्यमीषां प्रपत्तिरूपत्वे ।
संदर्श्यन्ते कतिचनतेषामन्येबुधैस्स्वतोभाव्याः ॥
सम्बन्धमतिस्सिद्धोपायप्रतिपत्तिरित्युभे स्याताम् ।
यदिवाक्यजधीमात्रे न विधेयत्वं तदा घटेत तयोः ॥
एवं सत्यविधेयज्ञानादपवर्गवादिनां पक्षे ।
ध्यानस्येव विधानं विधिः प्रपत्तेर्विरुध्यतेऽत्र मते ॥
शास्त्रोद्भव तत्त्वधियः पश्चात्कर्तव्यधीविशेषत्वे ।
प्रपदनविधानलक्ष्मानुष्ठितिवाक्योदितात्मतैव तयोः ॥ १६० ॥
फलकामनादिभिन्नं शरणव्रजनं विधेयभूतं च ।
अधिकारिणो विशेषणमित्यभिधातुं न शक्यते प्राज्ञैः ॥

अनुमतिमात्रं यस्मात्प्रपदनभजनादिनिष्ठसामान्यम् ।
तस्माच्छरणव्रज्या शब्दार्थतयोररीकृतेर्नार्हम् ॥
गोपायिताऽखिलेशःप्रबलैर्जीवैर्निवारितःपूर्वम् ।
नैतद्रक्षामकरोत्करोति पश्चान्निवारणाकरणात् ॥
यद्येवमभिप्रायक इष्येत निवारणाकरणशब्दः ।
प्रतिहन्यते तदानीं प्रतिहतिरहिता स्वतन्त्रतेशस्य ॥
स्वानुष्ठितापराधैर्निवारणं चेद्भवेदभिप्रेतम् ।
अधिकृतिमनुसृत्य तदाऽनुष्ठेयस्तन्निवर्तनोपायः ॥
निजरक्षाव्यापारान्निवारणंचेत्सुषुप्तिवेलायाम् ।
जागरणेऽप्यव्यापृतिसमये मुक्तिः प्रसज्यते नृणाम् ॥
चित्तसमाधानमाचिव्द्यावृत्तिश्चेतनस्य कृत्ये च ।
तौल्याद्भजनप्रमुखाचरणे प्रतिकूलकरणेऽपि ॥
सर्वेषामपि नृणां युगपन्मुक्तिप्रसङ्गतश्चापि ।
शरणव्रज्या शब्दस्यार्थो भवितुं नचार्हन्ति ॥
पक्षेष्वेष्वपि शरणं व्रजेति विहितेर्विरुद्धता तुल्या ।
तस्मादिमे प्रपत्तावतिवादा व्याजमात्रता विषयाः ॥
अथवा निजरक्षायै प्रपत्त्यनुष्ठानतस्स्वरक्षायाम् ।
कर्तृतया स्वस्यापि श्रीशसमोपायताभिमानेन ॥ १७० ॥

आशङ्क्यमानसिद्धोपायद्वित्वं निवर्त्यतेऽनेन ।
अभिदधतैकपदेन प्रधानभावं समस्तजगदीशे ॥
जीवस्य कर्तृभावो यद्यपि शास्त्रस्य सम्मतोऽथापि ।
श्रीपतिकर्तृत्वसमं तस्य न कर्तृत्वमभिमतं भवति ॥
सर्वैरपि प्रकारैः श्रीशायत्तं हि तस्य कर्तृत्वम् ।
तस्मात्प्रधानभूतोपायः पद्मासहायएवैकः ॥
तत्परतन्त्रे जीवेत्वात्मनि नैव प्रधानभावोऽस्ति ।
इममर्थमेकशब्दः प्रकटीकुरुते प्रधानवाच्यत्र ॥
एवं केवलवाचकमेतत्पदमित्यपीह पक्षोऽन्यः ।
भजनेन तदङ्गैर्वा बोध्या निरपेक्षताऽत्र केवलता ॥

न्यस्तभरस्य श्रीशे विवेकिनोहि स्वरूपधीरेव ।
हेयादेयभिदा या निर्णेत्री न प्रयोजनं शास्त्रैः ॥ १२० ॥
तस्मात् प्रपदननिष्ठस्स्वरूपवश्यो न शास्त्रवश्य इति ।
कथयन्ति केचिदेतन्निरूपकाणां न शोभते सदसि ॥
ज्ञातेऽपि च स्वरूपे तस्यादेयौ पुमर्थतदुपायौ ।
त्याज्यौ च विनिर्णेतुं नहि शक्येते विनाशास्त्रात् ॥
अपिचैतद्विधयैभिर्द्रव्यैःकरणीयमीशकैङ्कर्यम् ।
नैतैर्वस्तुभिरनयाविधयेत्यादिप्रभेदनिर्णीतिः ॥
कथमिव शास्त्रेणविना भवेत्स्वरूपावबोधमात्रेण ।
औचित्यमात्रबुद्धिर्जायेतैनेन शेषिकैङ्कर्ये ॥
शास्त्रमनादृत्य यथारुचिकैङ्कर्यं यदीष्यते कर्तुम् ।
द्रव्यैस्तदा निषिद्धैरपि तत्करणं प्रसज्यतेऽनिष्टम् ॥
एवं सत्युपचारापचारयोरापतत्यवैषम्यम् ।
भाव्यं ततआमुक्तेरपि प्रपन्नेन शास्त्रवश्येन ॥
सर्वैश्च पूर्वगुरुभिश्शास्त्रीयैवान्वसारि मर्यादा ।
तदनुल्लङ्घनमेव स्वीयनिबन्धेष्वपि प्रोचे ॥
श्रीमद्भाष्यकृतोऽपि श्रीशाय हविर्निवेदनस्य कृते ।
शास्त्राप्रतिषिद्धानां द्रव्याणां सम्भृतिं प्राहुः ॥
यदगायि श्रीपतिनाकार्याकार्यव्यवस्थितौ शास्त्रम् ।
मानमितीदं सर्वाधिकारिसाधारणं भवति ॥
भगवच्छास्त्रे शरणागतिमाधिकृत्यैव वैदिकाचारः ।
अनतिक्रमणीय इति प्रोचे बहुषु प्रदेशेषु ॥ १३० ॥
वर्णाश्रमकर्माणि व्यामिश्राण्यन्यदेवताभिरतः ।
ऐकान्त्यविरोधीनीत्याहुरनभ्यस्तवेदान्ताः ॥
श्रुत्यन्तविदोह्याहुर्देवान्तरवाचिनां च शब्दानाम् ।
ब्रह्मपरत्वं साक्षादथवा तत्तच्छरीरिवृत्ततया ॥
तस्मान्नैकान्त्यस्य व्याघातः कर्मभिःप्रपन्नानाम् ।
कर्मसु नियतेष्वेतन्नातश्शङ्काऽप्यतिप्रसङ्गस्य ॥

नित्येऽदर्शि च देवानृषीन्पितॄन्भगवदात्मकान्ध्यात्वा ।
संतर्प्येति यतीन्द्रैः कर्मभिरैकान्त्यभङ्गपरिहारः ॥
अन्यैरप्याचार्यैर्निजनित्येष्वेवमेव समदर्शि ।
ऋषयोऽपि सर्वकर्मभिराराध्यं विष्णुमेवाहुः ॥
वर्णाश्रमोपाधित्वात्त्याज्यत्वं कर्मणां यदीष्येत ।
कैङ्कर्यं च तदा स्यात्त्याज्यं वपुरिन्द्रियोपधित्वेन ॥
अभिलषितं यदि कर्तुं कैङ्कर्यं स्यात्तदा तदधिकारम् ।
आपादयन्ति कर्माण्यपि प्रपन्नैरवश्यकार्याणि ॥
चरमदशायां विरहेऽप्युत्थितिशक्तेः कथंचिदुत्थाता ।
यतिपतयश्चक्रुः किल सन्ध्याकाले जलाञ्जलिक्षेपम् ॥
अष्टाक्षरद्वयादेश्श्रीवैष्णवधर्मशास्त्रगद्यादौ ।
उदितस्सदानुसन्धिः कर्मानवरुद्धकालएवमतः ॥
एवं प्राचार्याणां धीमद्भिस्सम्प्रदायमवगत्य ।
तत्रैव स्थिरमतिभिर्भाव्यं न विरुद्धजल्पितभ्रान्तैः ॥ १४०

दर्शितइत्थं प्रथमस्यार्थश्चरणस्य देशिकादिष्टः ।
संदर्शयामि सम्प्रतिपादस्यार्थं द्वितीयस्य ॥
मामितिपदं शरण्यं प्रणमद्रक्षोपयुक्तगुणयुक्तम् ।
दिव्येन विग्रहेण च सहितं वक्तीह लक्ष्मीशम् ॥
प्रागेव तद्गुणानां स्वरूपमुपयोगिताप्रकारश्च ।
द्वयगतनारायणपदविवरणसमयेन्यरूप्येताम् ॥
एकपदं संख्यायां न तत्परं मां पदैकवचनेन ।
तल्लाभान्नान्यतरव्यर्थं सम्भेदइति गतिस्त्वगतौ ॥
जगुरेकपदं तस्मादभिन्नवाचीति पक्षमेकमिह ।
इहपक्षेबोधयति प्राप्य प्रापकभिदा विरहम् ॥
अन्यत्रैव प्रकृतेऽप्युपाय तदुपेयभेदशङ्कायाः ।
विनिवृत्त्यै तदभेदः प्रतिपाद्यत एकशब्देन ॥
फलसाधनयोर्यइहाभेदो बोध्यस्ससिद्धयोरेव ।
साध्यौ तु फलोपायौ भिन्नावेवेह जानीयात् ॥

व्याख्येयं शरणपदं शरणव्रज्यामनाविवात्रापि ।
पद्यतिधातोरीरितमर्थं व्रजतेरपीह जानीयात् ॥
उत्तमपुरुषस्तत्र प्रपदनकर्तुर्यतोऽनुसन्धानम् ।
अत्रतु मध्यमपुरुषो यत उपदेशो विशेष एतावान् ॥

अत्रानुकूल्यसङ्कल्पादीन्यङ्गानि चावबोध्यानि ।
पूर्वस्मिन्निव मन्त्रे पदेषु धीमद्भिरुचितेषु ॥
ईश्वरपरतन्त्रतया शास्त्रैरवबोधितस्वरूपस्य ।
जीवस्य कथं शरणागतिशास्त्रनियोज्यतोपपद्येत ॥
यो बुद्धिपूर्वकारी भवति नियोज्यः सएव नत्वन्यः ।
इति केचन शङ्कन्ते परतन्त्रत्वप्रकारधीरहिताः ॥
अत्र च समाधिरित्थं यद्यपि परतन्त्रईशितुर्जीवः ।
तन्निघ्नमथाप्यस्य स्वीकार्यं बुद्धिपूर्वकर्तृत्वम् ॥
इत्थमनङ्गीकरणे वैयर्थ्यं विधिनिषेधशास्त्राणाम् ।
आपि सर्वेषां प्रसजति तदा कथं स्यात्प्रमाणमाम्नायः ॥ २१० ॥

एतत्कृतप्रयत्नापेक्षस्त्वित्यादि सूत्रभाष्यादेः ।
सम्यक्परिशीलनतो विशदतरं धीमतां भवति ॥
तस्मात्स्वबुद्धिपूर्वप्रवृत्तिशक्त्या नियोगयोग्यत्वम् ।
जीवस्यास्त्येवेति व्रजेति विहितेर्नबाधकं किंचित् ॥
एतेन कर्तृताया विरहाज्जीवं स्वरूपतत्त्वविदम् ।
कर्माणि न लिम्पन्ति प्रतिषिद्धानीत्यपि प्रतिक्षिप्तम् ॥
आम्नायशिरस्युक्तं कृत्यं बालस्य यन्मुमुक्षूणाम् ।
तन्निजमाहात्म्यस्यानाविष्करणं न कामचारादि ॥
प्रकृतेःक्रियमाणानीत्यादौ जीवे न्यषेधि कर्तृत्वम् ।
यत्तद्गुणानधीनं कर्मसु सांसारिकेषु जानीयात् ॥
कर्तृत्वमेतस्य जगे च कर्ता शास्त्रार्थवत्त्वादिति सूत्रकारैः ।
न कर्तृताचेदुपगम्यतेऽस्य कैङ्कर्यमीशस्य कथं घटेत ॥
इत्थं शरणव्रज्यां कथितां द्वयमन्त्रपूर्वखण्डेन ।
धर्मेष्वखिलेषु सताऽसताऽपि विभवेन समुपेताम् ॥

चेतनसमनुष्ठेयामधिकृतिनिरपेक्षतादिना साकम् ।
अर्थेन समुपदिश्य प्रथमेनाथोत्तरार्धेन ॥
पुरुषार्थं तत्र मनौ प्रतिपादितमुत्तरेण खण्डेन ।
तच्छकलस्थनमःपदसङ्क्षिप्तानिष्टविनिवृत्तेः ॥
विवृतिमुखेन शरण्यस्स्वेनस्वीकृतभरेण कार्यायाः ।
संपरिकीर्त्य स्वस्मिन्यस्तभरं वीतशोकयति ॥ २२० ॥

उत्तमपुरुषादहमित्यप्यवगम्ये प्रयुज्यमानमिह ।
अधिकं भवत्पदं तत्स्वभावतोऽर्थस्य सर्वपापानाम् ॥
निर्मोचनउपयुक्तान् भक्तिस्वातन्त्र्यधीदयाप्रमुखान् ।
ईशस्य विवक्षित्वासर्वगुणान्सप्रयोजनं भवति ॥
अपराधिनांजनानां संसृतिपाशेन बन्धनं कृतवान् ।
रहितस्समाधिकाभ्यां व्याजात्कस्माच्चिदुल्लसत्करुणः ॥
अहमेव तदपराधान्सहमानस्तद्विमोचनसमर्थः ।
नान्यो नापि निवारणशक्तः कोऽपीह भावमिह विद्यात् ॥
श्रीशस्य सहजकरुणाव्याजेनाल्पेन संश्रिताघानाम् ।
कुर्वाणमनन्तानां सहनयित्वं प्रसादमाधत्ते ॥
एषप्रसादईशस्योपश्लिष्टोऽनुकम्पमातनुते ।
नमदमिताघनिवर्तनउपयोगिनिरङ्कुशस्वतन्त्रत्वम् ॥
इत्थं कृपास्वतन्त्रत्वादिमदीशस्य पापमोचित्वे ।
निरपेक्षकर्तृतापरएतच्छब्देऽवधारणं फलति ॥
स्वातन्त्र्यादिविशिष्टस्यात्मनएतादृशप्रधानत्वम् ।
अभिसंधायेशेन प्रयुक्तमासीदहंपदं प्रथमम् ॥
नत्वेवाहं प्रमुखैरुपदेशैश्चिदचिदीशतत्त्वधिया ।
ऐश्वर्यादिपुमर्थेष्वल्पास्थिरतादिदोषदृष्ट्या च ॥
संप्राप्तुमभिनिविष्टं मत्समवाप्त्यात्मपरमपुरुषार्थम् ।
उपदिष्टानि तदर्थं दुष्करहेत्वन्तराणि संत्यज्य ॥ २३० ॥

सर्वविरोधिनिवर्तनदक्षे प्राप्ये च मयि भरं न्यस्य ।
न्यस्यानुष्ठितकृत्यं भवन्तमित्यर्थकं पदंत्वेति ॥

श्रीशस्याङ्गप्रपदननिष्ठायैवापवर्गफलदाने ।
भजनोपायापेक्षणमपि स्वतन्त्रप्रपत्तिनिष्ठाय ॥
अदसीयाङ्गैरेवं सापेक्षत्वं च कर्मयोगाद्यैः ।
निरपेक्षत्वं वदता विनिवर्त्यैते इहैकशब्देन ॥
अत्र च विधीयमानप्रपदनाभिन्नानपेक्षतामेव ।
विद्यान्निरपेक्षत्वं नतु प्रपत्त्याप्यपेक्षणाभावम् ॥
नैकप्रमाणबाधाद्विहतेश्शरणं व्रजेति विहितेश्च ।
सर्वेषामपि भविनां युगपन्मुक्तिप्रसङ्गदोषाच्च ॥
निरपेक्षत्वस्य परित्यज्येत्यत्रोदितस्य पुनरत्र ।
कथनेऽयमेव दोषस्स्यादिति शङ्कानिवर्तनीयेत्थम् ॥ १८० ॥
तत्र च निरपेक्षत्वस्यार्थस्य स्वीकृतौत्विहान्योऽर्थः ।
स्वीकार्योऽत्र च पक्षे शोकद्योत्योऽधिकारइत्युक्तम् ॥
अत्रतु तत्स्वीकारे स्वीकरणीयोऽन्यएव तत्रार्थः ।
अत्र च तत्र च बहवः सन्त्येवार्था अतो न पुनरुक्तिः ॥
पूर्वं निरपेक्षत्वं विवक्षितं साधनस्य साध्यस्य ।
अत्रतु सिद्धस्येत्यपि चक्रुः पुनरुक्तिदोषपरिहारम् ॥
एवं प्रतिसम्बन्धी पूर्वोत्तर सर्वशब्दयोर्भूत्वा ।
ब्रूतेऽयमेकशब्दस्साधारणमर्थमित्यपि प्राहुः ॥
यंयं पुरुषार्थंप्रति योय उपायस्समीरितश्शास्त्रैः ।
तत्तदुपायेऽधिकृते विरहात्केनापि हेतुना शोचन् ॥
तत्तत्पुमर्थकाङ्क्षी यो यस्यात्तस्यतस्य पुरुषस्य ।
तत्तत्पुमर्थदाताऽहमेव सुकरप्रपत्त्युपायेन ॥
उपगमितःप्रसदनमिति साधारण्यं फलेषु सर्वेषु ।
आत्मन एकपदेन ख्यापयति श्रीपतिस्समस्तहितः ॥
एतेन मोक्षकाङ्क्षिभिरिव त्रिवर्गाभिलाषिभिश्च जनैः ।
अधिकृतिसत्त्वे शरणागतिकर्तव्यत्वमीरितं भवति ॥
एवंपदमिदमन्यं ब्रूतेऽन्यत्वंतु देवतान्तरतः ।
वैलक्षण्यं तच्च श्रुत्युक्तं श्रीपतित्वमिति विद्यात् ॥

अस्य पदस्यर्थान्तरपरतायांत्वार्थमेतदवसेयम् ।
श्रीशस्योक्तौ श्रीरपि कथिता भवतीति हीरितं गुरुभिः ॥ १९० ॥
श्रीयोगमेषशब्दो व्यवच्छिनत्तीति नोचितःपक्षः ।
वक्तव्यमत्र यत्तत्प्रागेवोक्तं विजानीयात् ॥
एवं गुरूपदिष्टःप्रदर्शितोऽत्रार्थ एकशब्दस्य ।
आचार्यवर्यकथिता अपि सङ्ग्रहकारिकाः प्रदर्श्यन्ते ॥
प्राप्यस्यैव प्रापकत्वं स्वप्राधान्यानिवारणम् ।
प्रपत्तेर्व्याजमात्रत्वमन्योपायैरनन्वयः ॥
तदङ्गैरप्यसम्बन्धस्सर्वसाध्येष्वभिन्नता ।
इत्थमर्थाष्षडाचार्यैः एकशब्दस्य दर्शिताः ॥
केचित्त्विहैकशब्दार्थं शरण्यैक्यं प्रचक्षते ।
विशिनष्टि तदाऽपि श्रीर्गुणविग्रहवत्प्रभुम् ॥
ईश्वरे सर्वभूतानामियं भगवतःप्रिया ।
संश्रितत्राणदीक्षायां सहधर्मचरी स्मृता ॥
एकं जगदुपादानमित्युक्तेऽपि प्रमाणतः ।
यथापेक्षितवैशिष्टयं तथाऽत्रापि भविष्यति ॥
एकोपास्तिविधानेऽपि गुणादीनां यथाऽन्वयः ।
तथैकशरणव्रज्या विधानेऽप्यनुमन्यताम् ॥
यथा गुणादिवैशिष्ट्ये सिद्धोपायैक्यमक्षतम् ।
एवं पत्नीविशिष्टत्वेऽप्यभीष्टं शास्त्रचक्षुषाम् ॥
प्रभाप्रभावतोर्यद्वदेकोक्ताावितरान्वयः ।
एवमन्यतरोक्तौ स्यात्सहवृत्त्यभिधानतः ॥ २०० ॥
स्मरन्तिचैनां मुनयस्संसारार्णवतारिणीम् ।
ऊचतुस्स्वयमप्येतत्सात्वतादिषु तावुभौ ॥
उपायोपेयदशयोः द्वयेऽपि श्रीस्समन्विता ।
इष्टा च शेषिणि द्वन्द्वे शेषवृत्तिर्यथोचिता ॥
अतोऽनन्यपरानेक श्रुतिस्मृत्यनुसारतः ।
पत्नीविशिष्टएवैकः प्रपत्तव्यइहोदितः ॥

इत्थं बन्धनमोचनशक्तं मुक्तिप्रदं (स) स्वमात्तभरम् ।
शक्तिविहीनं स्वस्मिन्विन्यस्तभरं मुमुक्षुं च ॥
निर्दिश्याहंत्वाभ्यामथ सर्वपदान्वितेन निर्दिशति ।
पापपदेन विरोधीन्यखिलान्यपि मोचनीयानि ॥
यदनर्थसाधनतया शास्त्रेणोक्तं तदुच्यते पापम् ।
इष्टनिवृत्तिरनिष्टप्राप्तिश्चानर्थशब्दार्थः ॥
स्वर्गादिफलार्थं यत्कर्म तदप्यत्र पापपदवाच्यम् ।
यस्मात्तदपि मुमुक्षोरनिष्टफलसाधनं भवति ॥
अतएवहि परमात्मस्थानस्योक्तास्स्वरादिकानिरयाः ।
भेदः कियानिव स्यात्कनकायश्शृङ्खलाबन्धे ॥
अतएव मुमुक्षूणां त्रैवर्गिकधर्मसन्त्यागः ।
विहितःखलु प्रमाणैः पापानां कर्मणामिव त्यजनम् ॥
श्रुतिरप्युपासकानां पापनिवृत्तेरुदीरणावसरे ।
अपिसुकृतं दुष्कृतवत्पाप्मतयोचे समं तदत्रापि ॥
इहबहुवचनस्यार्थो भवकारणभूतपुण्यपापानाम् ।
पापपदस्यार्थतया विवक्षितानामनन्तत्वम् ।
सर्वपदं तद्विविधा विद्याविपरीतवासनाभिरुचीः ।
द्विविधाचिताऽपि सङ्गं मेलयितुं पाप्मनां राशौ ॥ २४० ॥
मुक्तीभवितुं भवता काले सङ्कल्पिते करिष्यामि ।
मुक्तमिति मोक्षयिष्यामीत्याख्यातेन बोधयति ॥
केषांचन पापानामन्यत्रासह्यता कथिता ।
अत्र च सहनस्य फलं मोचनमुक्तं समस्तपापेभ्यः ॥
अतएवैतदुपच्छन्दनमेवेतरथा विरोधस्स्यात् ।
एवं न शङ्कनीयं विषयविभेदाद्द्वयोर्हि न विरोधः ॥
प्रायश्चित्ताभासैरसहनमभिधीयतेऽन्यत्र ।
सहनमिहाखिलपापप्रायश्चित्तप्रपत्त्युपायेन ॥
आत्मीयाशयमाशो यदिवा रावण इतिह्यूचे ।
तदिदं नोपच्छन्दनमपितूपादेशिवस्तुसन्नर्थः ॥

इत्थमनङ्गीकरणे न्यासोपासाविधायि शास्त्राणाम् ।
प्रसजति सर्वेषामप्यत्यन्तव्याकुलीभावः ॥
जीवानां विपरीताचरणेनानादिना समुत्पन्नम् ।
तन्निग्रहसङ्कल्पं यत्स्वयमीशो जहातीति ॥
एतद्धि तद्विनिग्रहनिवृत्तिफलकं समस्तपापेभ्यः ।
मोचनमुपाश्रितानामुदीरयामासुराचार्याः ॥
निग्रहनिवृत्तिरेषा निग्रहकार्याण्यनादीनि ।
विनिवर्तयत्यविद्याप्रभृतीन्यखिलानि जीवानाम् ॥
ईशेन मत्प्रसादादित्युक्तस्वप्रसन्नतारूपम् ।
स्वाभिप्रायविशेषं विद्यान्निग्रहनिवृत्तिमेतस्य ॥ २५० ॥
एवमविद्यादीनां विनिवृत्तिश्चापि जीवानाम् ।
ज्ञानविकासाद्यात्मा कथयामासे पदार्थतत्त्वज्ञैः ॥
इह मोचनस्य विद्यात्सर्वेषां पाप्मनां प्रकारमिमम् ।
पापमुभयप्रकारं जानीयात्पूर्वमुत्तरंचेति ॥
यदुपायानुष्ठानात्पूर्वकृतं पापमुच्यते पूर्वम् ।
यत्ततउत्तरकाले करिष्यमाणं तदुत्तरंपापम् ॥
द्वेधाऽत्र पूर्वपापं प्रारब्धं सांचितंचेति ।
आद्यं फलप्रदाने प्रवृत्तमितरत्वनुन्मुखं तत्र ॥
प्रारब्धमपि द्वेधा स्वीकृतमस्वीकृतंचेति ।
प्रथममिहैतद्वपुषाऽनुभाव्यमितरद्वपुर्भिरेष्याद्भिः ॥
धीपूर्वमधीपूर्वकमिति भेदेन द्विधोत्तराघमपि ।
धीपूर्वं च द्वेधाकृतनिष्कृत्यकृतनिष्कृतित्वाभ्याम् ॥
तत्र प्राचीनानि प्रारब्धफलेतराणि सर्वाणि ।
विनिवर्तन्त उपायारम्भक्षणएव पापानि ॥
एतदुपासननिष्ठप्रपदननिष्ठोभयस्य सामान्यम् ।
प्रारब्धनिवृत्तौतु द्वयोर्विशेषोऽयमवसेयः ॥
कृत्स्नमपि प्रारब्धं भुक्तं नश्यत्युपास्तिनिष्ठस्य ।
शरणागतिनिष्ठस्यतु भुक्तमभुक्तं च नाशमुपयाति ॥

प्रपदननिष्ठो द्विविधो दृप्तश्चार्तश्च दृप्त एषतयोः ।
यो वर्तमानदेहावसान इच्छत्यवाप्तुमपवर्गम् ॥
आर्तोऽयमुच्यते यो ज्वालापञ्जरसमं वपुर्जानन् ।
अभिलष्यति समवाप्तुं प्रपदनसमनन्तरक्षणे मोक्षम् ॥
दृप्तस्य तत्र केवलमनुभाव्यं वर्तमानदेहेन ।
प्रारब्धफलं कर्मावशिष्यते नश्यतीदमुपभोगात् ॥
देहान्तरानुभाव्यंत्वारब्धफलं प्रपत्तिमाहात्म्यात् ।
भवति निवृत्तंसद्यो भोक्तुमनङ्गीकृतेर्न भोक्तव्यम् ॥
आर्तस्यतु कृत्स्नमपि प्रारब्धं तत्क्षणे क्षयं याति ।
किंचिदपि तदुपभोक्तुं यस्मान्नैवोररीकृतं तेन ॥
उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी ।
साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी ॥
आर्तानामाशु फलदा सकृदेव कृताह्यसौ ।
दृप्तानामपि जन्तूनां देहान्तरनिवारिणी ॥
इत्यादिभिः प्रमाणैरेषविशेषस्समीरयामासे ।
भजनं व्यसनमिहाहतुरुपायभक्तिपदसाध्यभक्तिपदे ॥
यदघेषूदीचीनेष्वबुद्धिपूर्वं धियातु रचितेषु ।
यद्देशकालत्रिगुणत्वादिभवं तत्समस्तमपि ॥
न श्लिष्यते प्रपत्तेर्माहात्म्येन प्रपत्तिनिष्ठस्य ।
यद्वदुपासननिष्ठस्योपासायाःप्रभावेन ॥
येऽनापदि धीपूर्वकमपराधाविरचिता उदीचीनाः ।
प्रपदननिष्ठोऽप्येतैरुपास्तिनिष्ठइव भवति संश्लिष्टः ॥
एतादृशापराधा न भवन्ति विवेकिनः प्रपन्नस्य ।
मध्यस्य भवन्तोऽपि प्रायश्चित्तेन नाशमुपयान्ति ॥
तेषां प्रायश्चित्तं शक्तस्स्यात्प्रतिपदोक्तमाचरितुम् ।
कुर्वीत तदेव तदा यद्यसमर्थः पुनः प्रपद्येत ॥
एवंसति सकृदेव प्रपत्तिकरणं यदीरितं शास्त्रैः ।
व्याहतमेतद्भवतीत्येषा शङ्का न करणीया ॥

एतद्धि सकृत्करणं मतं प्रपत्तेःफलं यदुद्दिश्य ।
आचरिता सा न पुनस्तत्फलमुद्दिश्य कार्येति ॥
प्रकृतेनैकफलार्थं प्रपत्तियुग्मं यतोऽविरुद्धं स्यात् ।
अपवर्गाय प्रथमा कृता परा प्रत्यवायपरिहृत्यै ॥
प्रथमा प्रपत्तिरथवा तस्यास्स्मरणं भवत्युदीच्यानाम् ।
अपराधानां प्रायश्चित्तं न पुनः प्रपत्तिरिति केचित् ॥
एषां मते विरोधं गच्छेयुरपायसंप्लवे सद्यः ।
निष्कृतिविधायिशास्त्रं शिष्टाचारार्यसम्प्रदायौ च ॥
तस्मात्तादात्विकधीपूर्वाघानां निवृत्तयेऽवश्यम् ।
कुर्याद्यथाऽधिकारं प्रायश्चित्तं प्रपत्तिनिष्ठोऽपि ॥
कठिनहृदयाःप्रपन्ना य आचरन्तोधियोत्तरान्मन्तून् ।
प्रायश्चित्तं तेषां नकुर्वते नोदितानुतापाश्च ॥
अनघांस्तानपि कुरुते श्रियःपतिश्शिक्षया दयासिन्धुः ।
शिक्षाऽपि वर्तमाने जन्मन्येवावसीयतां न परे ॥ २८० ॥
साऽपि च लघ्वी तेषामाम्नाता काणतादिरूपैव ।
अपराध्यन् राजसुतो नहि लभते भृत्यवद्दण्डम् ॥
धीपूर्वकृताघानामकृतवतां निष्कृतिं प्रपन्नानाम् ।
केषांचन निगमोक्तं काणत्वाद्यं न दृश्यतेऽघफलम् ॥
मैवं तत्र च कतिपयकीर्तनमन्योपलक्षणार्थमिह ।
केचिदुपक्लेशा इति समुदायोक्त्याऽवगम्यमानत्वात् ॥
अन्यान्युपयुक्तधियोमान्द्यं तापत्रयानुभूतिश्च ।
शिष्टबहिष्कृतिगर्हे एतत्प्रभृतीनि जानीयात् ॥
केषांचन यद्दृष्टं काणत्वाद्यं प्रपत्तिनिष्ठानाम् ।
प्रारब्धस्यैव फलं तद्भवतीत्येषनिर्णयोऽशक्यः ॥
काणत्वादिकमुत्तरपापफलत्वेनवचनबलसिद्धम् ।
प्रारब्धस्यैव कथं निर्णेतुं शक्यते फलत्वेन ॥
तस्मात्तदुपक्लेशात् विविधादपि कर्मणो भवन्त्येव ।
अतएव सात्त्विकजना बिभ्यति धीपूर्वकोत्तराघेभ्यः ॥

तस्मात्प्रपत्तिनिष्ठैर्हित्वा धीपूर्वकोत्तराघानि ।
अवहितचित्तैःस्थेयं ज्ञात्वा शास्त्रीयमर्यादाम् ॥
अपराधसम्भवेऽपि प्रोक्ता शिक्षैव नैव निरयाप्तिः ।
एतान्यत्र च विबुधैरवसेयानि प्रमाणवचनानि ॥
देवं शार्ङ्गधरं विष्णुं ये प्रपन्नाः परायणम् ।
नतेषां यमसालोक्यं नच ते नरकौकसः ॥ २९०

यस्मिन् कस्मिन् कुले जाता यत्र कुत्र निवासिनः । ॥
वासुदेवरता नित्यं यमलोकं न यान्तिते ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमःकिल तस्य कर्णमूले ।
परिहरमधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां नवैष्णवानाम् ॥
कमलनयनवासुदेवविष्णो धरणिधराच्युत शङ्खचक्रपाणे ।
भव शरणमितीरयन्ति येवै त्यजभट दूरतरेण तानपापान् ॥
इत्थं नष्टाश्लिष्टप्राचीनोदीच्यसर्वपाप्मानः ।
उपयन्ति श्रीशपदं प्रपदननिष्ठा अपेक्षिते काले ॥
अभिसंधेः कर्मफलप्रदानविषयस्य हानमीशेन ।
कर्मविनाशो विद्यामाहात्म्यादित्युदीरितं पूर्वम् ॥
अश्लेषउत्तरेषामवसेयः कर्मणामेषः ।
ईशितुराश्रितविषये योऽनुदयस्तादृगभिसन्धेः ॥
येषां नाशाश्लेषौ यानि च धीपूर्वपुण्यकर्माणि ।
प्रबलैःकर्मभिरितरैः प्रतिबद्धफलान्युदीच्यानि ॥
तत्कर्तृणां मित्रेष्वरिषु च तेषामुदैरि सङ्क्रमणम् ।
श्रुत्या चरमदशायां मित्रत्वारित्वफलभूतम् ॥
विदुषो मित्राणि यदा मैत्रीं जह्युर्भवेयुररयो वा ।
अरयोऽपि यदारित्वं त्यजेयुरथवा भवेयुरनुकूलाः ॥
तदुचितमेव तदानीं करणीयमिति प्रतीक्षमाणस्सन् ।
विदुषो मित्रेष्वरिषु प्रथमं तत्कर्मसङ्क्रममकृत्वा ॥ ३०० ॥

चरमदशायामेव श्रीशस्तत्कर्मसङ्क्रमं तेषु ।
कुरुते नच कुरुते सुहृदरितोदासीनताविचारेण ॥

मित्रेषु पुण्यसङ्क्रममपुण्यसङ्क्रममामित्रेषु ।
कुरुत उदासीनेषुतु नच कंचिदपीति जानीयात् ।।
समुपाश्रितजनविषये योऽभूनिष्टोऽभिसन्धिरीशस्य ।
नोदैदुदेतुमर्हो यश्चैतत्तुल्ययोरस्य ।।
अभिसंध्योस्समफलयोरिश्रतजनमित्रद्विषत्सु यज्जननम् ।
अयमिह सङ्क्रमशब्दस्यार्थो विद्वद्भिरवसेयः ।।
इत्थमशेषविरोधिप्रणाश उक्ते स्वतःप्राप्तम् ।
परिपूर्णभगवदनुभूत्याविर्भावादिकं भवत्युक्तम् ।।
यथा नक्रियते ज्योत्स्ना मलप्रक्षाळनान्मणेः ।
दोषप्रहाणान्नज्ञानमात्मनः क्रियतेतथा ।।
यथोदपानकरणात्क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतस्सम्भवःकुतः ।।
तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्याएवात्मनोहिते ।।
इत्थं शौनकभगवानिममर्थं स्फुटमुदीरयामास ।
सम्पद्याविर्भावस्स्वेनेत्यूचे हि सूत्रकारोऽपि ।।
एवमुपायफलैक्ये तात्पर्यं स्याद्यदेकशब्दस्य ।
भगवत्प्राप्तिरभीष्टा स्पष्टमिह श्लोकईर्यते च तदा ।। ३१० ।।
तस्मात्पूर्वश्लोके यो मामेवैष्यसीति कथितोऽर्थः ।
सोऽत्र प्राप्तिविरोधिप्रध्वंसोक्त्यैकशब्दतश्चोक्तः ।।
एवं च पूर्वपद्यस्यैषश्लोको न शेषतामेति ।
सापेक्षभावविरहादित्याचार्यैरुपावर्णि ।।
कथमुदितास्याद्भगवत्प्राप्तिस्सर्वाघमोचनोक्त्येह ।
विध्वस्त समस्ताघा भगवत्प्राप्त्याविनाऽपि सन्त्येव ।।
तेऽमी ये परमपदं विष्णोः प्राप्यार्चिरादिमार्गेण ।
शेष्यनुभूतिविहीनस्वानुभवात्मानमीरितां शास्त्रैः ।।
कैवल्यमुक्तिमाप्य व्यपदिष्टाः केवलाभिधानेन ।
कोणे क्वापि वसन्ति स्थाने तत्रेति मन्दधीचोद्यम् ।।

कैवल्यमुपगतानां यदि सर्वाघप्रणाश इष्येत ।
भगवत्प्राप्तेर्विरहेप्रयोजकं दुर्वचं तदा तेषाम् ॥
तस्मात्तेषां भगवत्प्राप्तिविरोधीन्यघान्यनष्टानि ।
प्राकृतभोगप्रापककर्माण्येव प्रणष्टानि ॥
तात्कालिकमात्मैकानुभवानन्दं वदन्ति कैवल्यम् ।
अचिदनुभूतिब्रह्मानुभूतिसम्बन्धविरहेण ॥
भगवत्समवाप्तौ यत्कैवल्यपदं प्रयुज्यते तस्य ।
कृत्स्नस्यापि निवृत्तौ विरोधिवर्गस्य तात्पर्यम् ॥
स्वात्मानुभूतिरिति या किल मुक्तिरिति प्रयुज्यमानमपि ।
मुक्तिपदं निर्वाह्यं विगतेच्छेत्यत्र मुक्तशब्दइव ॥ ३२० ॥

जरामरणमोक्षोक्तिस्त्रिदशामरतोक्तिवत् ।
आपेक्षिकीं मुक्तिमेव वक्ति वा क्रमभाविनीम् ॥
एतादृशैव विधया जानीयाद्व्यूहलोकादेः ।
प्राप्तौ मुक्तिपदस्य प्रयुज्यमानस्य निर्वाहम् ॥

लोकेषु विष्णोर्निवसन्ति केचित् समीपमृच्छन्ति च केचिदन्ये ।
अन्येतु रूपं सदृशं भजन्ते सायुज्यमन्ये सतु मोक्ष उक्तः ॥
एतद्वचनविमर्शाद्भवतिहि सायुज्यमेव साक्षान्मोक्षः ।
नव्यूहसलोकत्वप्रभृतिक इत्येष भवति विज्ञातोऽर्थः ॥
इह सायुज्यपदार्थे प्राप्तवतः श्रीपतेः पदं परमम् ।
तेन सह भोगसाम्यं श्रुतिसूत्र स्मृतिभिरीरितं विद्यात् ॥

चतुर्विधा मम जना भक्ता एवहि ते श्रुताः ।
तेषामेकान्तिनश्श्रेष्ठास्तेचैवानन्यदैवताः ॥
अहमेव गतिस्तेषां निराशीःकर्मकारिणाम् ।
येतु शिष्टास्त्रयो भक्ताः फलकामाहि ते मताः ॥
सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ।
इति श्रीशस्य वाक्येन सिध्यतोहि निजात्मनः ॥
अनुभूतेः केवलाया विनाशप्रतियोगिता ।
साक्षान्मोक्षपदार्थत्वविरहेऽपीति बोध्यताम् ॥

चिरकालस्थायित्वं स्वात्माऽनुभवस्य नाशविरहोक्तिः ।
चातुर्मास्यफलस्याक्षय्यत्वोक्तिवदभिप्रैति ।। ३३० ।।
योगिनाममृतं स्थानं स्वात्मसन्तोषकारिणाम् ।
इत्यात्मानुभवस्थानं मुनिराह पराशरः ।।
स्थानमिदं तन्नभवति यद्वै पश्यन्ति सूरयस्सततम् ।
ब्रह्मप्राप्तिपराणामेव पदं तत्सएवाह ।।
एतच्च तत्प्रकरणं विमृशद्भिस्सम्यगवगतं भवति ।
तस्मात्प्राकृतमण्डलएव मतं स्वात्मवेदिनां स्थानम् ।।
अतएव नापि तेषामर्चिःप्रमुखाध्वना गमनम् ।
परमं पदं हि विष्णोर्गन्तॄणामेव तेन गतिः ।।
उपकोसलविद्याया विषयस्याक्षिस्थपुरुषस्य ।
ब्रह्मत्वं सूत्रकृता साधितमर्चिर्मुखाध्वलिङ्गेन ।।
स्वात्मविदामपि सोऽध्वा यद्यभ्युपगम्यते तर्हि ।
साधारणेन तेन ब्रह्मत्वं साध्यते कथं तस्य ।।
अचितायुतमयुतं वा चिद्वस्तूपासते स्वरूपेण ।
ब्रह्मतया वा ये तान्नयत्यर्चिर्मुखोऽतिवाहि गणः ।।
इत्युक्तमप्रतीकेत्येतत्सूत्रे यतीश्वरैर्यत्तत् ।
भवति विरुद्धं गमने स्वात्मविदामर्चिरादिमार्गेण ।।
गीताभाष्ये यदुदितमात्मविदामर्चिरादिना गमनम् ।
ब्रह्मशरीर स्वात्मोपासकपरमेव तद्विजानीयात् ।।
निर्वाहमित्थमेवावेयात्पञ्चाग्निविद्यायाम् ।
समुदीरितस्य गमनस्यार्चिःप्रमुखाध्वनाऽत्मविदाम् ।। ३४० ।।
स्वशरीरितया ब्रह्मोपासकवद्ब्रह्मणश्शरीरतया ।
स्वात्मन उपासकोऽपि ब्रह्मोपासक इतीरितं सारे ।।
तस्माद्ब्रह्मप्राप्त्या रहितानां केवलात्मविदाम् ।
नास्त्येव सर्वपापप्रध्वंसः प्रोच्यमान इह ।।
ध्वस्तसमस्ताघानां सङ्कोचो नास्ति भगवदनुभूतेः ।
अत इह भगवत्प्राप्तिस्सिध्यत्येवाखिलाघमुक्त्युक्त्या ।।

अथ माशुच इत्येतद्वाक्यस्यार्थं वदाम्यभिप्रेतम् ।
एतत्करोति दार्ढ्यं विश्वासस्यार्थउपदिष्टे ॥
अत्र च निषिध्यमानो न बन्धुनाशादिहेतुकश्शोकः ।
प्रागेवह्यपगमितस्सआत्मतत्त्वोपदेशनप्रमुखैः ॥
अपितूदितधर्माणां सुदुष्करत्वाद्विरोधिभूयस्त्वात् ।
फललाभविलम्बादपि सिद्धश्शोको निवार्यतेऽनेन ॥
सर्वविरोधिनिवर्तक सुकराशुफलप्रदप्रपदनस्य ।
उपदिष्टत्वात्सर्वप्रकारशुगपाकृतेरुपायस्य ॥
सम्भाव्यमानसर्वप्रकारशोकापनोदनार्थतया ।
बहुधाऽदर्शिषतार्था गुरुवर्यैरस्यतान्वच्मि ॥
अत्रहि विहितस्यानुष्ठेयस्य प्रपदनाख्यधर्मस्य ।
कर्मादेरिव वर्णाश्रमादिसापेक्षताविरहात् ॥
प्राप्याभिरुचिप्रापकविश्वासाकिंचनत्वमुखसत्त्वे ।
आशङ्क्यानधिकारं शोकःकार्यो न केनापि ॥ ३५० ॥
अस्योपायविशेषस्याङ्गैस्साकं क्षणेन साध्यत्वात् ।
अन्योपायव्यवहितिदुष्करकर्मादिपरिकराभावात् ॥
सुकरत्वादावर्तननिरपेक्षत्वादपेक्षितं कालम् ।
अनतिक्रम्यापेक्षितसकलपुमर्थोपधायकत्वाच्च ॥
निकरेण परिकराणां सह चिरमनुवर्तनीयताभाजि ।
अत्यन्तमवहितैरपि साध्ये कृच्छ्रेण तादृगङ्गयुते ॥
कालविलम्बेन फलप्रदेऽप्युपाये श्रमःकिमस्माभिः ।
कर्तव्य इति न शोच्यं विलम्बफलभीत्यकिंचनत्वयुतैः ॥
लघुसाधनमात्रवशीकार्येऽभिमुखे फलप्रदानाय ।
सर्वस्यापि शरण्ये मयि सुलभेऽतीव परमकारुणिके ॥
कामं विश्वसनीये प्रतिहतिरहितस्वतन्त्रताकेच ।
जाग्रति सिद्धोपाये तस्मिन्विषयेऽपि शुङ्नकर्तव्या ॥
शरणव्रज्यानुऽष्ठित्युत्तरकाले करिष्यमाणेषु ।
आज्ञाऽनुज्ञाकर्मसु शरणव्रज्याऽङ्गभावविरहेण ॥

अपितेषां वैगुण्येसति वैगुण्येन देशकालादेः ।
भक्तेरिव प्रपत्तेःकिमङ्गवैकल्यमिति न शुक्कार्या ॥
मत्सेवनाद्यनर्हावस्थापादीनि बुद्धिपूर्वाणि ।
भागवतगोचरादीन्यागांस्युत्पाद्य दग्धपटवत्स्वम् ॥
कुर्वत आरब्धफलात्पापाद्भीत्याऽऽदिमे प्रपदनस्य ।
कालेऽथवोत्तरस्मिन्काले शरणं तदर्थमुपगम्य ॥
आगोरहितामुत्तरवृत्तिं शेषीमपेक्षमाणेन ।
धीपूर्वकोत्तरागोभीत्या शोको न जातु करणीयः ॥
इत्थमनपेक्षमाणस्यागोविरहितमुदीच्यकैङ्कर्यम् ।
धीपूर्वकापराधोद्भवेऽपि न कथं चन त्यजेयमिति ॥
सङ्कल्पवति शरण्ये मय्यनुतापादिजनयित्वा ।
प्रायश्चित्तविशेषे पुनःप्रपत्त्यात्मके प्रवर्त्यैनम् ॥
कठिनप्रकृतेरनुदितपश्चात्तापस्य निष्कृतौ तत्र ।
विमुखस्य कांश्चन लघून्प्रदर्श्य शिक्षात्मकानुपक्लेशान् ॥
पुनरपराधाचरणप्रसङ्गरहितं भिया विधाय च तम् ।
तदपेक्षितफलसमयात्प्रागेवेत्थं समस्तपापानि ॥
विनिवर्त्य मुक्तिदातरि जाग्रतिसति बुद्धिपूर्वपापेभ्यः ।
नरकादिमहाक्लेशास्युश्चेत्किंकार्यमिति न शुक्कार्या ॥
आर्तप्रपत्तिनिष्ठस्योत्तरएवक्षणेऽपवर्गाप्तेः ।
शोच्यं न तेन नरकप्रतिमशरीरानुवृत्तिमाशङ्क्य ॥
नेहाभिक्रमनाशोऽस्तीति यदुक्तं निवृत्तिधर्मेषु ।
कर्मसु तस्य प्रपदनविषये कैमुत्यनीतितस्तौल्यात् ॥
वचसाऽपि विशेषेण प्रपन्नविषयेण न त्यजेयमिति ॥
यावन्निजसङ्कल्पितकालं दृप्तप्रपात्तिनिष्ठस्य ।
सत्यपि फले विलम्बे तत्सिद्ध्यै संशयस्य विरहेण ॥
विस्मयमिथ्यावचनप्रमुखेन तपोऽध्वरादि धर्मइव ।
केनापि दुष्कृतेन प्रपत्तिधर्मोऽपिनाशमुपयातः ।
यदि न ददाति फलं किं कार्यं स्यादिति न तेन शुक्कार्या ॥

एतद्वपुरवसाने मुक्त्यै शरणागतेरनुष्ठानात् ।
अनतिक्रम्यापेक्षितकालं तस्याः फलप्रदत्वाच्च ॥
जन्मान्तरादिहेतुप्रारब्धविशेषकर्मभिर्जातु ।
जन्मान्तरादियदि नः स्यात्किंकर्तव्यमिति न शुक्कार्या ॥
हित्वा पुमर्थमन्यं भगवत्प्राप्त्यै उपेयुषश्शरणम् ।
तत्प्रतिबन्धकभूताशेषाघानां निवृत्तत्वात् ॥

केवलनिजानुभूतिप्रमुखैर्विघ्नैःफलस्य परमस्य ।
स्यात्किं विलम्ब इत्याशङ्कय च शोको न करणीयः ॥
इत्थं समस्तविधशुक्कारणविनिवृत्तिमुपदधानस्य ।
मदनुग्रहस्य विषयेणेतःपश्चात्त्वया शुचःकरणम् ॥
पूर्वं मामक निग्रहविषयदशायामिवाकृतिं तस्याः ।
अनिपुणकृत्यं नार्हं विलक्षणस्यास्य साधनस्य तथा ॥
मय्यात्मभरन्यासात् कृतकृत्यतयास्थितेस्त्वदीयायाः ।
स्वीकृतवतो भरं ते ममानुभावस्य चेति तात्पर्यम् ॥
शरणव्रजनोपायानुष्ठानात्पूर्वकालजश्शोकः ।
अधिकृतिकोटिनिविष्टस्समुचितएवेति जानीयात् ॥
इत्थं चरमश्लोके मा शुचः इत्यस्य चरमवाक्यस्य ।
सारतमस्याचार्याः सच्छिष्येभ्योऽर्थमुपदिशन्त्यन्ये ॥ ३८० ॥

इह केचन यत्त्वाहुर्माशुच इत्यस्य वाक्यस्य ।
विधिरूपतया शरणव्रज्यानिष्ठस्य शोचतःपश्चात् ॥
विधिशास्त्रविलङ्घित्वादुपायभूतश्शरण्योऽस्मिन् ।
कलुषितचित्तो भूत्वा स्वतएव स्वार्थसाधकोऽयमिति ॥
एनं त्यजतीत्येतद्वीपूर्वाण्यप्युदीच्यानि ।
आगांसि मेळयित्वा निजकृतया सर्वपापशब्दस्य ॥
व्याकृत्याऽपि शरण्यो नच केनापि प्रकारेण ।
त्यजति प्रपदननिष्ठानिति वाक्यैरपि विरोधतो हेयम् ॥
तस्मात्प्रपत्त्युपाये प्रवर्तमानस्य शोकहेतूनाम् ।
निश्शेषनिवृत्तत्वाच्छोकं कुर्यान्न कस्यचिद्धेतोः ॥

इत्थं समुदायार्थे प्रोक्ते विश्वासदार्ढ्यमाधाय ।
निस्संशयं प्रपन्नं विधत्तइत्यर्थएव तात्पर्यम् ॥
मितधीर्मितशक्तिर्मितजीवनकालोऽसहो विलम्बस्य ।
त्वं साधनान्तराणिज्ञातुमनुष्ठातुमप्यशक्यानि ॥
कालविलम्बेन फलप्रदानि सर्वाणि संपरित्यज्य ।
सुलभं सर्वशरण्यं शरण्यभावोपयोगमुपयाद्भिः ॥
सर्वाकारैस्संयुतमेकं मामध्यवस्य शरणतया ।
पञ्चभिरङ्गैस्सहितं निजसंरक्षणभरार्पणं कुर्याः ॥
इत्थं निजसंरक्षणभरार्पणान्मयिकृतस्वकरणीयम् ।
मम संरक्ष्यमवश्यं निस्सीमप्रेम्ण आस्पदं च त्वाम् ॥
अनवधिदयःप्रसन्नः प्रतिहतिरहितस्वतन्त्रताशाली ।
स्वार्थप्रवृत्तिकोऽहं मदीयसङ्कल्पमात्रसहकृत्या ॥
अमितानेकविधानां मत्समवाप्तेर्विरोधिनां वर्गात् ।
प्रविमोच्य मामकीनं नीत्वाऽन्यैर्दुर्लभं पदं परमम् ॥
मामनुभाव्य विभूतिद्वयेन सत्राप्यनन्तदिव्यगुणैः ।
भोगेन समानत्वं गमयित्वा मन्निरूपितं परमम् ॥
तादृक्पूर्णमदीयाऽनुभूतिपरिवाहरूपकैङ्कर्यम् ।
विरचय्य सर्वदेशानेहोवस्थोचितं समस्तविधम् ॥
नेष्यामि कृतार्थत्वं हेतोः कस्यापि मा शुचं कार्षीः ।
एवं विभावनीयश्चरमश्लोकस्य पर्यवसितोऽर्थः ॥
अत्रापि यथास्थानं तत्त्वत्रयमर्थपञ्चकं चापि ।
पूर्वस्मिन्निव मन्त्रे प्रज्ञाशाली विजानीयात् ॥
सारतमभूत इत्थं चरमरहस्यस्य सङ्ग्रहेणार्थः ।
सुग्रहणायाल्पधियां प्रादर्शि गुरुप्रदर्शितेन पथा ॥
शास्त्रप्रोदितबहुविधपरीक्षणैः शोधिताय पात्राय ।
ब्रूयादिमं रहस्यत्रितयार्थं देशिकःकृपया ॥
न ख्यातिलाभपूजासक्तोऽपात्राय जात्वपि ब्रूयात् ।
शाण्डिल्यस्मृतिसात्याकितन्त्रप्रमुखेऽत्र मानमवसेयम् ॥

शिष्योऽप्यस्य रहस्यत्रितयस्यार्थं गुरूपसदनाद्यैः ।
गुणवतिविनियोक्तुमिमं महता यत्नेन गोपयेद्धीमान् ।। ४०० ।।

ज्ञात्वा रहस्यत्रितयार्थमित्थं श्रीशं शरण्यं शरणं प्रपद्य ।
उदीच्यकालं सकलं रहस्यत्रयार्थचिन्ताप्रमुखैर्मुमुक्षुः ।।
नयन्ननागा वपुषोऽवसाने वैकुण्ठवैमानिकदर्शिताध्वा ।
अप्राकृतस्थानमुपेत्य मुक्तः कैङ्कर्यसाम्राज्यमुपैति नित्यम् ।।
वाधूलान्वयजनिना रङ्गाचार्येण विरचितामेताम् ।
ऊरीकुर्वन्तु कृतिं सुधियो निर्मत्सरास्सन्तः ।।

आचार्यैस्समुदीरितो निजकृतिष्वर्थो निवद्धो मया
मन्दप्रज्ञमुमुक्षुबोधनकृतेग्रन्थेऽत्र सङ्क्षेपतः ।
कोऽप्यर्थोऽत्र न कल्पितो निजधिया तस्मात्तदीयैरयं
ग्राह्यो यद्युररीक्रियेत न परैः का वा क्षतिस्तावता ।। ४०४ ।।

श्रीशाय नमश्श्रीमद्रामानुजयोगिपुङ्गवाय नम ।
कविवादिदन्ति हरये श्रीमन्निगमान्तदेशिकाय नमः ।।

नम उर्वनुभावेभ्यः कृपया मां विद्यया जनयितृभ्यः ।
हयवदनासनरसन श्रीमत्परकालदेशिकेन्द्रेभ्यः ।।

इति श्रीमद्रङ्गनाथपरकालमहादेशिकैः पूर्वाश्रमे

कारिकारूपेण विरचिते

श्रीरहस्यत्रयार्थसंग्रहे

च र म श्लो का धि का र स्तृ ती यः

शुद्धपत्रम्

पु	पङ्क्ति	शुद्धपाठः
३	५	रीप्सिता
,,	११	शोषदम्पति
,,	२०	(दिः)
,,	२२	समधिकता
५	१३	न्यास
६	१६	स्थाप्यमानाः
१२	६	अधिजिगमिषु
,,	२६	महानस
२०	२३	चरणानिति
२२	१६	कलिकोलाहल
२३	१५	मात्रनिदानता

रहस्यत्रयसारार्थे

पु	पङ्क्ति	शुद्धपाठः
२	९	प्रतिपादकत्वमेतन्मन्त्रा
,,	२२	निहितं (निहतं)
३	१	नविविच्य
,,	१२	सर्ववाच्य
,,	१७	भगवतो
,,	२८	नित्येच्छयासिद्धा
४	१०	वेरपृक्तस्येति
,,	१३	दृश्यसे
५	२	भगवतएव
६	१५	स्मर
,,	२७	विप्रतिपत्तिभूय
७	१७	उणादयो
८	१५	अत्रायमर्थः

पु	पङ्क्ति	शुद्धपाठः
११	४	भागवतशेषत्व
,,	१२	तस्मात्परतरं
,,	१८	प्रतिपत्तिः
,,	२५	भरसमर्पणं
१२	१४	साध्यफलं
१३	३	ल्युट्प्रत्ययस्य
,,	१२	विग्रहेण
१३	१८	मितिवत्
,,	२२	इदंचात्र
१५	९	अकारार्थो
,,	१०	मकारार्थो
१९	४	शरणशब्देन
,,	२६	प्रातिकूल्यवर्जनं
२०	२४	प्रतिपाद्य
२९	७	अयंच
,,	१८	मन्यद्वाक्यं
,,	२३	मुपापादि
,,	२६	निरवधिक
२२	९	साध्यं
२३	१३	क्षेपक्षमत्वं
,,	२४	विधित्वं
२४	२५	सूत्रकारैः
२७	२६	सहकारि
२८	१३	येतु
३०	७	क्रोडीकरोति
८०	२९	परमपदं

पु	पङ्क्ति	शुद्धपाठः
३१	१५	मेवापद्येत
३२	२६	परे
३४	१९	वोपिसंभवतीति
३४	२७	सर्वकर्मविनि
		रहस्यत्रयार्थसङ्ग्रहे
३६	१०	सर्वेप्सितार्थ
,,	१४	प्रचीयते
३८	१०	अखिललक्ष्यगामि
४०	१४	ह्यचितं
४१	१४	अमुष्यामथ
,,	२०	णयित्वयमद्य
४२	१७	नारायणो
४५	२०	भङ्गार्थमपीति
४६	१	द्वितयस्यधर्मयोः
,,	१६	मर्थं
४६	१९	नमसोच्यते
४६	२८	त्वविशेष
४७	९	वागपदानुभावः
४८	१५	पारतारः
५०	१५	स्वयंचेतिचेत्
,,	१९	निरुक्तिरेका
५५	२	हरिताप्रकृते
६०	५	पद्युत्तराख्यातं
६१	५	अधिकृतिरपि

पु	पङ्क्ति	शुद्धपाठः
६१	५	शेषिदम्पत्योः
,,	२४	विष्कृतं
,,	२५	प्रार्थनवा
६२	२९	पूरुषार्थ
६३	३	स्वन्वयरहित
६४	१	प्रज्ञसुज्ञा
६५	५	चार्यश्रीशो
६६	२०	स्वरूपइ
,,	२६	चतुर्धा
६७	२२	शौचाचमना
६८	८	वांछोज्झित
६९	११	नोपायस्या
,,	७८	कार्पण्यमङ्गमस्यां
,,	२२	विहितिश्च
७०	११	ज्यद्यैरर्था
७१	२०	भ्रान्तिवा
७२	२८	त्याज्याश्च
७४	९	दुत्थाय
७७	२०	धिकृतेर्विरहा
८०	१७	अनुकम्पया
८०	२७	भरं स्वस्य
८४	२७	द्विविधादपि
९०	२८	यदिनददाति
९३	१३	नमः